राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला – ३१७ ISSN: 2231-0452

# महस्विनी

## राष्ट्रियसंस्कृतविद्यापीठस्य षाण्मासिकी शोधपत्रिका

कुसुमम् : दशमम् (२०१७) सम्पुटम् : १ & २

प्रधानसम्पादकः
आचार्य वि.मुरलीधरशर्मा
कुलपतिः

सम्पादकः
आचार्य कोराड सूर्यनारायणः

राष्ट्रियसंस्कृतविद्यापीठम्
(विश्वविद्यालयानुदानायोगस्य १९५६ अधिनियमस्य
तृतीयधारया अनुमोदितः विश्वविद्यालयः)
तिरुपतिः - ५१७५०७, आन्ध्रप्रदेशः
२०१७

राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला -३१७

# महस्विनी

(विद्यापीठस्य षाण्मासिकी शोधपत्रिका)

**ISSN : 2231-0452**

कुसुमम् : दशमम्
सम्पुटम् : १ & २

प्रकाशनवर्षम् : २०१७
प्रतिकृतयः : ५००

© राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, आन्ध्रप्रदेशः

प्रकाशकः
**कुलसचिवः**
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

संयोजकः
**अनुसन्धानप्रकाशनविभागः**
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

मूल्यम् : ₹ १७०/-

मुद्रकः : प्रजाशक्ति प्रिण्टर्स एण्ड पब्लिषर्स प्राइवेट लिमिटेड, तिरुपति

Rashtriya Sanskrit Vidyapeetha Publication Series-317 **ISSN: 2231-0452**

# MAHASVINĪ

## ( Research Journal )

**VOL. :** 10 [2017] **No. :** I & II

**General Editor**
**Prof. V. Muralidhara Sharma**
VICE - CHANCELLOR

**Editor**
**Prof. Korada Suryanarayana**

RASHTRIYA SANSKRIT VIDYAPEETHA
**(University established under Section 3 of UGC Act, 1956)**
TIRUPATI - 517 507 (A.P.)
**2017**

Rashtriya Sanskrit Vidyapeetha Publication Series – 317

**MAHASVINĪ**

( Half yearly Research Journal of Vidyapeetha )

ISSN : 2231-0452

Volume : Tenth

Part : I & II

Year of publication : 2017

Copies Printed : 500

© Rashtriya Sanskrit Vidyapeetha, Tirupati, (A.P.)

Publisher :

REGISTRAR
Rashtriya Sanskrit Vidyapeetha, Tirupati

Co-ordinator :

Department of Research and Publications
Rashtriya Sanskrit Vidyapeetha, Tirupati

Price : ₹ 170/-

Printed at: Prajasakti Printers & Publishers Pvt. Ltd., Tirupati

**Disclaimer:** The views expressed in the Research papers are those of the authors and not of the editors.

Grams: Vidyapeetha

**RASHTRIYA SANSKRIT VIDYAPEETHA**

(University established under sec.3 of UGC Act, 1956)

**TIRUPATI – 517 064 (A.P.)**

(Accredited at A+ Level by NAAC)

**Prof. V.MURALIDHARA SHARMA**

VICE - CHANCELLOR

Office: Ph.: 0877-2287680
Fax : 2287838
Residence : Ph.: 2287826
Fax : 2286349

# पुरोवाक्

श्रवण-भाषण-वाचन-लेखनाधिगमसोपानैस्सह अधिगतभाषाया: पुष्टीकरणाय विशेषत: लेखनकौशलस्य अभ्यासाय सारलेखन-निबन्ध-पत्राचार-पत्रकारिता-काव्यरसास्वाद-काव्यप्रणयनाभिरुचिवर्धनमपि अनिवार्यं भवति। पूर्वोक्तचतुष्टयेन सह अनन्तरोक्तपञ्चकमाध्यमेन भाषासाहित्यस्य अभिरुचि: दशावतारा विभुर्महाविष्णुरिव नवनवायमानां प्रतिभां जागरयति भाषाधिजिगमिषूणाम् । अत एव ''नाटकान्तं साहित्यम्'' ''नाटकान्तं कवित्वम्'' इति आभाणके प्रसिद्ध्यत:। सर्वे न कवयो भवन्ति, केचन विमर्शका अपि भवन्ति । अत: वाङ्मयस्य मूल्याङ्कनाय विमर्शनशक्तिरपेक्षिता भवति। तद्विमर्शनशक्ते: उन्मेषाय शोधप्रविधय: उद्भाविता:। एभि: शोधलेखनसामर्थ्यमपि उन्मिषितं भवति। अनेन सह पूर्वदर्शितभाषाधिगमसोपानसरणि: एकादशमूर्तिरियं परमेश्वरीयं सत्यं शिवं सुन्दरं तत्त्वं निस्सारयति ।

उच्चशिक्षासंस्थासु विशेषत: शोधकार्यप्रवृत्तये अनेका: शोधपत्रिका: मासिका:, वार्षिका:, अर्धवार्षिका:, सांवत्सरिका: प्रकाशिता:, प्रकाश्यन्ते, प्रकाशयिष्यन्ते च । तदनुक्रमं, विद्यापीठमिदम् उपविंशं वर्षेभ्य: ''महस्विनी'' इति शोधपत्रिकां प्रकाशयति। अनेकेषां विदुषां शास्त्रनदीष्णानां पद्मभूषण नावल्पाक्कं शठकोप रामानुजताताचार्यादि-प्रमुखाणां नैके शोधलेखा: प्राकाश्यन्ते। तन्माध्यमेन अनेके ग्रन्थग्रन्थय: विश्लयिता:। साहित्यविमर्शने, निगूढशास्त्ररहस्यपरिज्ञाने च पत्रिकेयं स्वमहांसि प्रद्द्योत्य अन्वर्था जायत इति पाठकानां न परोक्षम् ।

तस्मिन्नेव क्रमे महस्विनी षाण्मासिकीयं संकलिता। प्राचीनतथ्यनिरूपणेन सह अधुनातनधारासंगम अवश्यं निमज्जनीय: । शास्त्रं न लोकविरुद्धम् । अधुना वैज्ञानिकयुगम्, अस्मिन् गवेषकाणां प्रवृत्ति: समाविष्टा भवेत्। तदर्थमियं पत्रिका कटिबद्धा भवति। आगामिसञ्चिकासु तादृशानामपि शोधविषयाणां समावेशो भवतीति अस्ति मदीयो द्रढीयान् विश्वास:।

अत्र भविष्णूनां शोधार्थिनां निबन्धा: अविरलतया समाकलिता: । एतेन तेषामपि मनोबलं सुदृढं भवतीति आशासे।

असामान्यं पत्रिकासम्पादनमिति सर्वे वयं जानीम: । तदसमान्यं कार्यं स्वभुजस्कन्धयो: ऊढ्वा प्रतिवर्षं षाण्मासिकीं पत्रिकां प्रकाशयितुं तत्परो भवति विद्यापीठशोधप्रकाशनविभाग: इति मोमुदीति मेऽन्तरङ्गम्। एवमेव स विभाग: अग्रेऽपि कार्यरतो भविष्यतीति निश्चप्रचम् ।

अस्या: पत्रिकाया: सम्पादने, पत्राणां संग्रहे, तद्विभागीयप्रयास: प्रशंसनीय:। अस्या: पत्रिकाया: पुरोनयने दक्ष: विभागाध्यक्ष: आचार्य कोराड सूर्यनारायणमहोदय: साधुवादार्ह:, तत्सहयोगी आयुष्मान् डा. दिलीपकुमारमिश्र: वर्धापनैरलङ्क्रियते ।

पाठकसुधीवराणाम् मानसानन्दो भवति चेदयं प्रयास: सफलो भवति । तदुक्तं खलु कविकुलगुरुणा **आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्** इति ।

विलम्बि-मकरसंक्रान्ति: | विदुषां वशंवद:

१५.१.२०१९

**आचार्य विरिवेण्टि मुरलीधरशर्मा**

## महस्विनीसम्पादकमण्डली

**प्रधानसम्पादकः**

**आचार्य वि.मुरलीधरशर्मा**, कुलपतिः

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

**सम्पादकः**

**प्रो. कोराड सूर्यनारायणः**

विभागाध्यक्षः, अनुसन्धानप्रकाशनविभागः

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

**सदस्याः**

*प्रो. सी.ए. सिन्दे*

निदेशकः, आड्यारमातृकागारस्तथा गवेषणागारः, चेन्नाई

*प्रो. राणी लक्ष्मीनरसिंहशास्त्री*

शैक्षिकसङ्कायप्रमुखः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

**प्रो.सिहेच्.पि.सत्यनारायणः**

साहित्यसंस्कृतिसङ्कायप्रमुखः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

**प्रो.जे.रामकृष्णः**

वेदवेदाङ्गसङ्कायप्रमुखः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

*प्रो. विरूपाक्ष वि. जड्डीपालः ,*

*डा. सोमनाथदाशः , डा.सीहेच्. नागराजु*

अनुसन्धानप्रकाशनविभागाध्यापकाः

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

# महस्विनी

## (तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठशोधपत्रिका)

१. एषा षाण्मासिकी शोधपत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं जनवरी–जुलाईमासयोः भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेरुद्बोधनं प्रोत्साहनं विविध–दृष्ट्याऽनुसन्धेयविषयाणां प्रकाशनं च।

४. अस्यां तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धाः प्रकाश्यन्ते।

५. अप्रकाशितानां दुर्लभानां प्राचीनाचार्यरचितानां लघुग्रन्थानां सम्पादन–भावानुवाद–टिप्पण्यादिपुरस्सरं प्रकाशनमप्यस्यां क्रियते।

६. प्रकाशितनिबन्धस्य प्रतिमुद्रणानि पत्रिकायाश्च स एव अङ्कः लेखकाय निःशुल्कं दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

७. अस्यां पत्रिकायां विशिष्टानां संस्कृतवाङ्मयसम्बद्धानां विविधासु भाषासु प्रणीतानां ग्रन्थानां समालोचना अपि प्रकाश्यन्ते। तदर्थं द्वे प्रकाशितप्रतिकृती प्रेषयितव्ये। आलोच्यग्रन्थस्य समालोचना यस्मिन्नङ्के प्रकाशिता सोऽप्यङ्को ग्रन्थकर्त्रे निःशुल्कं दीयते, समालोचना–पत्राण्यपि यथासौविध्यं दीयन्ते।

८. अस्या वार्षिकमूल्यं वार्षिकशुल्कं रू.२५५/–, द्विवार्षिकशुल्कं रू.४२५/–, त्रिवार्षिकशुल्कं रू.६८०/– सन्ति, इदं शुल्कं **कुलसचिवः, राष्ट्रियसंस्कृत–विद्यापीठम्, तिरुपतिः–५१७५०७** इति सङ्केतेन बैंकड्राप्ट द्वारा प्रेषणीयम्।

९. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः **सम्पादकः, महस्विनी–शोधपत्रिका, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः–५१७५०७** इति सङ्केतेन विधेयः।

— **सम्पादकः**

**सू.** — शोधलेखप्रणेतारः यथाकालं स्वकीयान् संस्कृताङ्ग्लभाषाप्रणीतान् शास्त्रविषयकान् अनुसन्धानलेखान् प्रेषयन्तु, यथावसरं सम्पादकमण्डलस्यानुशंसानुरूपं लेखाः प्रकाशयिष्यन्ते।

# सम्पादकीयम्

विदितचरमेतत् तत्रभवतां समेषां यत् श्रीमदखिलाण्डकोटिब्रह्माण्डनायकस्य पद्मावतीजानेः भगवतः श्रीनिवासस्य पदारविन्दे भारतसर्वकारेण अधीतिबोधाचरण-प्रचारणादिना संस्कृतभाषायाः योगक्षेमनिर्वाहाय स्थापितमद्वितीयमिदं विद्यापीठमिति। अधीतिबोधाचरणप्रचारणादिषु सुप्रथितमिदं विद्यापीठमित्यत्र एतदेव प्रमाणं यत् भारतस्य अतिदूरे वर्तमानेभ्यः वङ्ग-हिमाचलादिप्रदेशेभ्यः छात्राः तत्रस्थान् संस्कृतविद्यालयान् परिहृत्य अत्र पठितुमुत्सुकास्समागच्छन्तीति।

अधुना उच्चतमविद्याध्ययनक्षेत्रे, अनुसन्धानक्षेत्रस्य कृते समेषां महती अवधारणा भवति। विश्वविद्यालयस्तरेषु गवेषणाक्षेत्रे अध्ययनरतानां छात्राणां समेषां अध्यापकानाञ्च शोधलेखप्रकाशनाया अनिवार्यता महती अनुभूयते। अतः अनुभवसम्पन्नाः अध्यापकाः तथा गवेषकच्छात्राश्च स्वकीयबहुमूल्यगवेषणात्मकपत्राणि विलिख्य पत्रिकायामस्यां प्रकाशयन्ति। अनेन समाजस्य कृते गवेषणातरच्छात्राणां कृते ज्ञानविज्ञानयोः प्रशस्तः मार्गः समुपलब्धो भवतीति नास्ति सन्देहः।

अस्माकं विद्यापीठस्य अनुसन्धानप्रकाशनविभागपक्षतः प्रकाशितायाः शोधपत्रिकायाः महस्विन्याः दशमं कुसुमं अधुना प्रकाश्यते। अवसरेऽस्मिन् सर्वेषां पत्रसमर्पकाणां कृते मम हर्दिकाभिनन्दनं प्रोत्साहनं च विज्ञापयामि।

महस्विन्यामस्यां सञ्चिकायां एकविंशति शोधलेखाः संस्कृतभाषायां, तथा उपनिषद्-सङ्गणकविषयसम्बद्धशोधपत्रद्वयं आङ्गलभाषायाञ्च विलसन्ति। विषयविभागानुरोधेन लेखानां संख्या अधोलिखितक्रमेण विद्यते। महाभारतम् -१, ज्योतिषम् -२, दर्शनम् -३, साहित्यम् -६, शिक्षाशास्त्रम् -८, तथा पर्यावरणम् -१ इत्येवं शोधलेखाः सन्ति।

पण्डितानां शोधकर्तॄणां चात्यन्तोपकारकेऽस्मिन् कार्ये प्रोत्साहानुकूलतया सहकृतवद्भ्यः श्रीमद्भ्यः कुलपतिमहाभागेभ्यः आचार्य मुरलीधरशर्ममहाभागेभ्यः, अस्याः सञ्चिकायाः प्रकाशने स्वानुकूल्यप्रदानेन सहकृतवद्भ्यः कुलसचिवेभ्यः आचार्य जी.एस्.आर.कृष्णमूर्तिमहोदयेभ्यः, अनुसन्धानप्रकाशनविभागीयाध्यापकेभ्यः, सम्पादकमण्डलीसदस्येभ्यः, सहकृतवद्भ्यः सर्वेभ्यश्च हार्दिकधन्यवादाः समर्प्यन्ते।



— प्रो. कोराड सूर्यनारायणः
सम्पादकः

# शोधलेखानुक्रमणी

कुसुमम् : दशमम् (२०१७) सम्पुटम् : 1 & 2

| | | |
|---|---|---|
| | | पुटसंख्या |
| १. | आधुनिककाले राजनैतिक-सामाजिकरीत्या महाभारतीयतत्त्वानां प्रासङ्गिकता<br>- डा.टी.महेन्द्रः | 1 |
| २. | सामन्तचन्द्रशेखरोक्तग्रहकक्षाक्रमस्य समीक्षा<br>- सूर्यप्रकाश गौतम | 15 |
| ३. | षोडशसंस्कारेषु नामकरणसंस्कारमुहूर्तविचारः<br>- जयकृष्णन् नम्पूतिरि एन्.डि. | 23 |
| ४. | पातञ्जलयोगदर्शनस्य अद्वैतदर्शनानुकूलता<br>- भजहरि दास | 31 |
| ५. | मायानिरूपणम्<br>- सौम्या | 35 |
| ६. | सिद्धान्तशिखामण्यनुसारेण जीवस्वरूपविचारः<br>- प्रभय्यास्वामी | 41 |
| ७. | किरीटिवेङ्कटाचार्यैः विरचिते शृङ्गारतरङ्गिणीनाटके रसपोषणम्<br>- ए. चन्द्रज्योती | 55 |

८. **चक्रकविप्रणीतं रुक्मिणीपरिणयाख्यं महाकाव्यम्, तस्य सम्पादनञ्च** 63
- चन्द्रावली गोस्वामी

९. **कालिदासदृशा भाग्यवादः** 71
- जि.वीरब्रह्मम्

१०. **विद्यामाधवकृतस्य कुमारसम्भवमहाकाव्यव्याख्यानस्य वैशिष्ट्यम्** 77
- दिननाथ दास

११. **जानकीपरिणयनाटके इतिवृत्तपरिवर्तनानां विवरणम्** 87
- शिवगणेशः नागोतु

१२. **श्रीकृष्णलीलातरङ्गिण्यां भक्तितत्त्वम्** 97
- कोमाण्डूरि माधवी

१३. **संस्कृतोपलब्धौ शिक्षणक्षमतायाः प्रभावः** 105
- शुभश्री दाश

१४. **न्यायदर्शने शैक्षिकतत्त्वानि** 113
- विद्याधर हरिचन्दन

१५. **उपनिषत्संवर्णिता शिक्षणप्रक्रिया** 121
- आर्.शिवरामकृष्ण सिंह

१६. **साम्प्रतिकपर्यावरणं तथा तस्य प्रभावः** 131
- दत्तहरि बेहेरा

१७. **संस्कृताध्ययनाभिरुचेर्विकासे प्रहेलिकानां योगदानम्** 137
- एन्.वि.श्रीनिवास

१८. **माध्यमिकस्तरे संस्कृतपद्यशिक्षणविधीनां प्रयोगः तद्वैशिष्ट्यञ्च** 143
- मदन सिंह

१९. **ज्ञाननिर्मितिवादे क्रीडाविधिः** 151
- धन्या, पी.वी.

२०. **शैक्षिकोपलब्धौ अभिप्रेरकतत्त्वानां योगदानम्** 155
- कैलाश सैनी

२१. **सर्जनात्मकतासंवर्धने परिवारस्य भूमिका** 159
- डा.दिल्लीप कुमार मिश्र

२२. **The Two Wonderful Birds** 165
- Prof. K. Gayathri Devi

२३. **Spectral features of Vedic Phonemes for Speech Processing** 171
- Dr. B. Chandrasekharam

ISSN: 2231-0452

# आधुनिककाले राजनैतिक-सामाजिकरीत्या महाभारतीयतत्त्वानां प्रासङ्गिकता

*डा. टी. महेन्द्रः*
*(सहायकाचार्यः, विशिष्टसंस्कृताध्ययनकेन्द्रम्, जवाहरलालनेहरूविश्वविद्यालयः, नवदेहली)*

पुराकाले भारतदेशवासिनो न केवलं धार्मिक-आध्यात्मिक-दार्शनिक-विषयाणामाविष्करणे समुत्सुकाः आसन् अपि तु ऐहिकविषयान् प्रत्यपि तेषां योगदानमत्यन्तमेव वैशिष्ट्योपेतं वरीवर्तीति वक्तुं शक्यते। आधुनिके काले अस्माभिः पठ्यमानानि श्रूयमाणानि नानाशास्त्राणि तेषां तपःफलरूपेण बीजवत्स्थितानि कालान्तरे विकासमीयुरिति कथने नास्ति लेशमात्रोऽपि सन्देहः। यद्यपि कानिचन शास्त्राणि तैः पृथक्तया विशदतया च न प्रणीतानि तथापि प्रत्येकं शास्त्रस्य विषयस्य वा आविर्भावः बीजवत्स्थितिर्वा तेषां कृतिषु अवश्यं द्रष्टुं शक्यते। तत्र पञ्चमवेदत्वेन प्रख्याते महाभारते विद्यन्ते नैकशास्त्ररत्नानीति '**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचि**'[1] दिति वाक्येनैव स्पष्टीभवति। आधुनिककालापेक्षया राजनैतिकदृष्ट्या सामाजिकरीत्या च महाभारतीयकालः अत्युत्कृष्टः आसीदिति वक्तुं शक्यते। अतः आधुनिककाले महाभारतीयतत्त्वानां का प्रासङ्गिकता इत्यत्र सोपपत्तिकं निरूप्यते। अत्र आधुनिककालीयविषयाणां सन्तोलनावसर भारतसंविधाने प्रोक्तानि तत्त्वानि प्रामाणिकत्वेन स्वीकृतानि।

## राजनैतिकांशाः

राजनैतिकदृशा महाभारतमत्यन्तं महत्त्वपूर्णविषयान् प्रकटयति। महाभारते विशिष्य शान्तिपर्वणि भीष्मपितामहेन प्रोक्तानि राजनैतिकतत्त्वानि सार्वकालिकानि वर्तन्ते।

प्रधानमन्त्रिणः योग्यतां निर्दिशद् भारतसंविधानं कथयति यत् **कोऽपि भारतस्य नागरिकः, लोकसभायाः राज्यसभायाः वा सदस्यत्वेन निर्वाचितः प्रधानमन्त्री भवितुमर्हतीति।**[2] किन्तु महाभारतं कथयति यत्–

**कीर्तिप्रधानो यस्तु स्याद्यश्च स्यात्समये स्थितः।**
**समर्थान्यश्च न द्वेष्टि नानार्थान्कुरुते च यः।।**
**यो न कामाद्भयाल्लोभात् क्रोधाद्वा धर्ममुत्सृजेत्।**
**दक्षः पर्याप्तवचनः स ते स्यात्प्रत्यनन्तरः।।**[3]

अत्र संविधानलक्षणापेक्षया महाभारतीयं लक्षणमेव श्रेष्ठमिव प्रतीयते। यतो हि संविधानप्रोक्तलक्षणोपितः गुणशीलादिरहितोऽपि प्रधानमन्त्रिपदमलङ्कर्तुं प्रभवति, न तु महाभारतीयलक्षणेन। महाभारतं प्रत्येकस्मिन्नपि पदे गुणशीलादियुक्तं जनमेव नियोजयेदिति आदिशति। यतो हि राष्ट्रस्य नेता प्रधानमन्त्री यदि भ्रष्टाचाराद्यकृत्येषु व्यापृतो भवति तर्हि तत्सहयोगिमन्त्रिणः अन्येऽपि जनाश्च तमेवानुसरन्ति। तेन '**अविनीतमनुष्यं तत्क्षिप्रं राष्ट्रं विनश्यति**'[4] अत राष्ट्रस्य नेता प्रधानमन्त्री आदर्शगुणान्वितः स्यात् तादृशैरेव गुणोपेतैः सह एव व्यवहरेदिति न तु दुराचारिभिरिति महाभारतं प्रबोधयति, यतो हि–

**मुख्यानमात्यान्यो हित्वा निहीनान्कुरुते प्रियान्।**
**स वै व्यसनमासाद्य गाधामार्तो न विन्दति।।**[5]

आधुनिककाले भ्रष्टाचाराद्यकृत्येषु दोषिणोऽपि बहवः कथं मन्त्रिपदेषु विलसन्तीति अस्माभिः प्रतिदिनमवलोक्यते एव। अत्र प्रधानसमस्या इयमेवास्ति यत् तेषां नैतिकतायाः परीक्षणार्थं निर्धारणार्थं वा संविधाने अन्यत्र कुत्रापि वा कोऽपि तादृशः उल्लेखः एव नैव दृश्यते । महाभारतं न केवलं प्रधानमन्त्रिणः विषये अपि तु प्रत्येकस्मिन् मन्त्रिणि के के गुणाः भवेयुः, तेषां संख्या कियती स्यादित्यादिविषयेषु स्पष्टतया निर्दिशति। मन्त्रिणः योग्यतां निर्दिशद् भारतसंविधानं कथयति यद् **कोऽपि भारतस्य नागरिकः, लोकसभायाः राज्यसभायाः वा सदस्यः मन्त्रिपदार्हः भवति।**[6] किन्तु महाभारतं न केवलं मन्त्रिणः नागरिकतां

सूचयति अपि तु तस्मिन् के के गुणाः भवेयुरित्यपि निर्दिशति। यतो हि **मन्त्रिणां मन्त्रमूलं हि राज्ञो राष्ट्रं विवर्धते**[7] अतः **नापरीक्ष्य महीपालः सचिवं कर्तुमर्हति।**[8] तस्मात् मन्त्रिणि कुलीन-प्राज्ञादि 36 गुणाः अवश्यं भवेयुरिति, तथैव सः पञ्चाशद्वर्षीयः भवेदिति च महाभारतं वेदयति। अनेन आधुनिके काले महाभारतीयराजनीतितत्त्वानां का प्रासाङ्गिकता इति ऊहितुं शक्यते। अथ च मन्त्रिमण्डले कियन्तः जनाः स्युः इत्यपि महाभारतं स्पष्टतया प्रकटयति-

**चतुरो ब्राह्मणान्वैद्यान्प्रगल्भान्स्नातकान्शुचीन्।**
**क्षत्रियांश्च तथा चाष्टौ बलिनः शस्त्रपाणिनः।।**
**वैश्यान्वित्तेन सम्पन्नानेकविंशतिसंख्यया।**
**त्रींश्च शूद्रान्विनीतांश्च शुचीन्कर्मणि पूर्वके।।**
**अष्टाभिश्च गुणैर्युक्तं सूतं पौराणिकं तथा।।**[9]

अनेन सुस्पष्टं यत् महाभारतकालीनायां मन्त्रिपरिषदि 38 मन्त्रिणः सर्वेऽपि समाजगतस्य विविधवर्गानां प्रतिनिधिभूताः आसन् इति। आधुनिके कालेऽपि मन्त्रिपरिषदः घटनावसरे अमुमेव सिद्धान्तमाधारीकृत्य विविधवर्गाणां प्रातिनिध्यं प्रकल्पयन्तीति राजनीतिज्ञाः आचक्षन्ते।

**प्रजारक्षणम्**

प्रजां विना राष्ट्रस्य राज्ञश्च अस्तित्वमेव असम्भवत्वात् शासकस्य नानाविध-कर्मसु प्रजारक्षणमेव आद्यं कर्तव्यमिति भावयेत्। एनं विषयमुद्दिश्य महाभारतं विशदीकरोति यत् शासकः जिघांसुपापकादिरक्षकजनेभ्यः प्रजां संरक्षेदिति। तच्चोक्तम्-

**जिघांसवः पापकामाः परस्वदायिनः शठाः।**
**रक्षाभ्यधिकृता नाम तेभ्यो रक्षेदिमाः प्रजाः।।**[10]

इदानीन्तनकालेऽपि आरक्षकादिजनाः स्वीयाधिकारबलेन प्रजां परिपीडयन्तः दृश्यन्ते। तस्मात् दुष्टेभ्यः प्रजारक्षणं शासकस्य परमकर्तव्यमिति महाभारतं सार्वकालिकं विषयं प्रकाशयति। अपि च यः शासकः प्रजारक्षणं विधास्यामीति

तन्त्र कुरुते, तादृशं शासकं प्रजा उन्मादशुनकमिव मारयेदिति निगदति–

**अहं वो रक्षितेत्युक्त्वा यो न रक्षति भूमिपः।**
**स संहत्य निहन्तव्यः श्वेव सोन्माद आतुरः।।**[11]

**भ्रष्टाचारनिरोधः**

आधुनिकभारतस्याभिवृद्धौ भ्रष्टाचार आद्य अवरोधोऽस्ति। आप्राचीनकालादेव पल्लवितोऽयं विषपादपः साम्प्रतं महावृक्षायते। समग्रे भारते एव न, निखिले विश्वेऽपि अस्य शाखा व्यापृता दृश्यन्ते। एतेन भ्रष्टाचारस्य व्याप्तिः कियतीति ऊहितुं शक्यते। अत एव सर्वकारेण भ्रष्टाचारनिरोधाय सतर्कता (Vigilence) भ्रष्टचारनिरोधकसंस्थाः (Anti Corruption Bureau) इत्यादिसंस्थाः संस्थापिता दृश्यन्ते।

महाभारतकालेऽपि भ्रष्टाचारनिरोधाय प्रयासा कृता इत्यवभासते। यथा –

**नरश्चेत्कृषिगोरक्ष्यं वाणिज्यं चाप्यनुष्ठितः।**
**संशयं लभते किञ्चित्तेन राजा विगर्ह्यते ।।**[12]

तस्माद्राज्ञा ते अधिकधनसङ्ग्रहका अधिकारिणः दण्ड्या एव –

**दण्ड्यास्ते च महाराज धनादानप्रयोजकाः।**
**प्रयोगं कारयेयुस्तान् यथा बलिकरांस्तथा।।**[13]

अथ च महाभारते कालकवृक्षीयोपाख्यानसन्दर्भे भीष्मेण प्रोक्तं यत् – शासकः भ्रष्टाचारनिरोधाय स्वयं प्रयतेत इति –

**ह्रियमाणममात्येन भृत्यो वा यदि वा भृतः।**
**यो राजकोशं नश्यन्तमाचक्षीत युधिष्ठिर।।**
**श्रोतव्यमस्य च रहो रक्ष्यश्चामात्यतो भवेत्।**
**अमात्या ह्यपहर्तारो भूयिष्ठं घ्नन्ति भारत।।**

**राजकोशस्य गोप्तारं राजकोशविलोपकाः।**
**समेत्य सर्वे बाधन्ते स विनश्यत्यरक्षितः।।**[14]

तस्मात् प्रजाहितैषी शासकः तादृशान् निर्मूलयेत् -

**वैश्वानर इव क्रुद्धः समूलमपि निर्दहेत्।**[15]

अतः एतेषां दुष्टानाम् अमात्यादीनां नियन्त्रणे शासकः श्रद्धावान् भवेत्।

**समाजिकांशाः**

अनुशासनपर्व वस्तुतः सामाजिकपर्व इति वक्तुं शक्यते। यतो हि तत्रत्याः सकलाः विषया अपि समाजे कीदृक्कर्म समाचरेत्, किञ्च नेति प्रत्येकं प्रजां वैशद्येन प्रबोधयन्ति।

साम्प्रतं प्रजाः प्रमादगतजनान्, गर्भिण्यादिजनान् च अत्यवसरतया वैद्यालयं प्रति नयतां वाहनानां (Ambulance) कृते, अग्निशमनादिवाहनानां (Fire Engine) कृते च मार्गेषु पर्याप्तस्थानं यथोचिते समये नैव प्रददति, तेन बहवः जनाः मार्गेष्वेव प्राणत्यागं कुर्वन्तस्सन्ति। अत्र आधुनिकप्रजायाः सामाजिकस्पृहाराहित्यं प्रस्फुटति। किन्तु त्रिकालज्ञानिना महर्षिणा व्यासेन प्रणीतं महाभारतं वेदयति यत्-

**पन्था देयो ब्राह्मणाय गोभ्यो राजभ्य एव च।**
**वृद्धाय भारतप्ताय गर्भिण्यै दुर्बलाय च।।**[16]

अनेन महाभारतकालिकसमाजौन्नत्यं कीदृशमिति विज्ञायते। नानाविध जनसमूहात्मके समाजे विद्या-रूप-द्रविण-अङ्गादिसहितरहितादिभेदेन जनाः बहवः भवन्ति, किन्तु अङ्गादिभिर्वञ्चितान् जनान् नैवाक्षिपेदिति महाभारतं ज्ञापयति -

**हीनाङ्गानतिरिक्ताङ्गान् विद्याहीनान्वयोधिकान्।**
**रूपद्रविणहीनांश्च सत्त्वहीनांश्च नाक्षिपेत्।।**[17]

राज्ये प्रजाश्रेयस्कामो शासक अनाथादीनां संरक्षणं कुर्यादिति संज्ञापयतीदं वचनम् -

**कृपणानाथवृद्धानां विधवानाञ्च योषिताम्।**
**योगक्षेमं च वृत्तिं च नित्यमेव प्रकल्पयेत्।।**[18]

वस्तुतः सर्वकारेण साम्प्रतं वृद्धादिभ्यः जीवनभृतिरूपेण (Pension) यत्किञ्चन धनं प्रदीयते तस्य समुत्प्रेरकत्वं महाभारते एवास्तीति एतेन स्पष्टम्। साम्प्रतं शासनेन वृद्धनाथादिभ्यः प्रदीयमाना जीवनभृतिः शासनस्य विद्युक्तधर्म एवेति महाभारतं विवृणोति। यथा च -

**कृपणानाथवृद्धानां यदाश्रु व्यपमार्ष्टि वै।**
**हर्षं सञ्जनयन्नृणां स राज्ञो धर्म उच्यते।**[19] इति।

आधुनिकेन सर्वकारेण अस्माभिः वृद्धादीनां संक्षेमाय एतावती भृतिः प्रदीयते इति महाडम्बरेण यदुद्घोष्यते तत्सर्वकारस्य ख्यातिमापकत्वेन न परिगण्येत अपि तु तस्य मूलकर्तव्यत्वेन चिन्तयेदिति विज्ञापयतीदं महाभारतवचनम्।

मानवस्य सर्वाङ्गीणविकासं काङ्क्षमाणं महाभारतं नानाविषयैः तं सञ्चोदयति।

आधुनिके समाजे स्वीयमनोरथसाधनाय, विविधसङ्घटनानि, प्रजा च आन्दोलनपथं समाश्रयते, तेन व्याजेन सामाजिकसम्पत्तेः नाशनं कुर्वन्तः दृश्यन्ते। अतः महाभारतं सामाजिकैः सर्वैरुपयुज्यमानानां सेतु-सभादीनां संरक्षणाय सततं प्रयतेतेति न तु विनाशनाय इत्यादिशति। तदुक्तम् -

**प्रपाणां च सभानाञ्च संक्रमाणाञ्च भारत।**
**अगाराणां च भेत्तारो नरा निरयगामिनः।।**[20]

तत्र प्रपाभिर्जनानां पिपासा, सभाभिः जिज्ञासा च उपशमेते। सेतुभिश्च प्रजाः नद्यादीन् सन्तीर्य स्वीयं कर्मानुतिष्ठन्ति। गृहाणि च प्रत्येकं जनं वृष्ट्यातपशैत्यबाधाभिः संरक्षन्ति। एवं समाजगतं प्रत्येकं प्राणिनम् आर्तिच्छेनादिभिः कर्मभिः अनुगृह्णीयमानानां प्रपा-सभा-सेत्वादीनां माहात्म्यावश्यकता च अत्यतमेवेति वक्तव्यम्। अतः तन्नाशनं नोचितं, नैव कार्यमित्युद्घोषयतीदं सुभाषितम्।

साम्प्रतं ग्रीष्मकाले जनानां तापोपशमनाय कैश्चित् वदान्यैर्जल-वितरणकेन्द्राणि संस्थाप्यन्ते। एतेषां जलवितरणकेन्द्राणां सत्ता महाभारत-कालेऽप्यासीदिति ज्ञायते। वस्तुतः महाभारतं न केवलं सत्कर्मानुष्ठानाय प्रेरयति अपि तु प्रत्येकं कर्म किमर्थं समनुष्ठेयमित्यपि विशदतया विवृणोति। तत्र जलवितरणेन किं प्रयोजनमिति विशदयत् – **पानीयस्य प्रदानेन कीर्तिर्भवति शाश्वती**[21] इति प्रोक्तम्। एतेन पानीयप्रदानेन किं फलमिति स्पष्टम्। महाभारतं संसूचयति यत् अनाथवृद्धाबलबालादीनामशक्तानां जनानां वञ्चनं नैव कुर्यादिति। यतो हि –

**अनाथां प्रमदां बालां वृद्धां भीतां तपस्विनीम्।**
**वञ्चयन्ति नरा ये च ते वै निरयगामिनः।।**[22]

**राष्ट्रोन्नतोपायाः**

राष्ट्रस्योन्नतिः तद्गतप्रजानां कर्म अनुसृत्य भवति। तस्मात् राष्ट्रगतः प्रत्येकं जनोऽपि स्वीयकर्मणा राष्ट्रस्योन्नतये प्रयतेत। भारतस्य संविधानं राष्ट्रोन्नतिं निर्वचदमुमेव आशयं व्यनक्ति –

**"राज्यं लोककल्याणस्य अभिवृद्धये सामाजिकव्यवस्थायाः यथाशक्यं कार्यसाधकतया स्थापनेन, संरक्षणेन च प्रयतेत यस्यां सामाजिकः आर्थिकः राजनीतिकश्च न्यायः राष्ट्रियजीवनस्य सर्वा संस्था अनुप्राणयेत्।।"**[23] इति।

सकलशास्त्रसारभूतं महाभारतं विज्ञापयति यत् तस्मिन् काले प्रजानां जीवनं कृषि-गोरक्ष्य-वाणिज्यादिकर्मणैव प्राचलदिति। यथोक्तम् –

**कृषिगोरक्ष्यवाणिज्यं लोकानामिह जीवनम्।**
**ऊर्ध्वं चैव त्रयी विद्या सा भूतान् भावयत्युत।।**[24]

अत एव भीष्मपितामहः युधिष्ठिराय प्रतिबोधयति यत् –

**कृषिगोरक्ष्यवाणिज्य यच्चान्यत्किञ्चिदीदृशम्।**
**पुरुषैः कारयेत्कर्म बहुभिः कर्मभेदतः।।**[25]

एतेन महाभारतकालिकराज्यस्योन्नतौ अन्यकर्मणामपेक्षया कृषिगोरक्ष्यादि-कर्मणः स्थानं नितान्तमुत्कष्टमिति ज्ञायते। तत्र कृषिकर्म विज्ञापयतीयं भीष्मपितामहोक्तिः -

**आसनं शयनं यानं गृहं रत्नं धनं तथा।**

**सस्य जातानि सर्वाणि गाः क्षेत्राण्यथ योषितः।।**[26] इति।

इदं कृषि-गोरक्ष्यकर्म उद्दिश्य भारतसंविधाने विशेषावधानं प्रदत्तं दृश्यते। तत्रोट्टङ्कितं यत् -

**"राज्यम् आधुनिकीभिः वैज्ञानिकीभिश्च प्रणालिभिः कृषिं, पशुपालनञ्च सङ्घटयितुं प्रयतेत, विशेषतया च बीजवंशानां परिरक्षणाय, सुधारणाय च, गवां, वत्सानाम्, अन्येषां दोह्यानां वाह्यानां च पशूनां वध प्रतिषेधाय प्रक्रमेत च।"**[27] इति।

अन्येषां भरणं पोषणञ्च कुर्वाणाः कृषकाः एव राज्यस्य धुरं भारं वहन्तीति महाभारतं तन्माहात्म्यं प्रकटयति। तदुक्तम् -

**कश्चित् कृषिकरो राष्ट्रं न जहात्यतिपीडया।**

**ये वहन्ति धुरं राज्ञां ते भरन्तीतरानपि।।**[28]

वस्तुतः राज्योन्नतये कृषकाणां निःस्वार्थं योगदानम् अत्यन्तमेवासीत् अस्ति च। ते भगवन्तं विना नैकस्य उपरि आधारिता भवन्ति। यतो हि तेषां कृषिकर्मणः जीवातुर्भवति हि जलम्। तच्च भगवता कालपुरुषेणैव वृष्टिमाध्यमेन प्रदीयते। यदि काले वृष्टिर्भवति तर्हि आ वर्षं परिश्रम्य सुधान्यमुत्पादयन्ति। ततः षड्भागं कररूपेण राज्योन्नतये प्रयच्छन्ति च। अत एव तान् कृषकान् महाभारतम् ऋजुजीविनः, क्रियावन्तः, सुव्रताश्चेति प्रशंसति यथा -

**कृषिगोरक्षवाणिज्यमुपजीवत्यमायया।**

**अप्रमत्ताः क्रियावन्तः सुव्रताः सत्यवादिनः।।**[29] इति।

एतेन सुस्पष्टं यद्राज्योन्नतौ कृषिकर्मण: प्राधान्यं योगदानञ्च अत्यन्तमेव उत्कृष्टमिति।

**दुराचाराणां निषेध:**

लोके प्रजानां स्वास्थ्यहानिकरेषु मद्यपानस्यैव आद्यं स्थानम्। अत एव भारतसंविधानं समुद्घोषयति यत् **"राज्यं मादकपेयानां स्वास्थ्यहानिकराणाञ्च औषधानां भेषज्यप्रयोजनं व्यतिरिच्य उपभेगस्य प्रतिषेधाय प्रयतेतेति।"**[30]

साम्प्रतं प्रजानां स्वास्थ्यस्य हानिकरा: मद्यपानशाला: प्रत्येकं ग्रामस्य कोणे कोणे संदृश्यन्ते। किन्तु प्रजाहितमेव शासकस्य हितमिति विश्वसत् महाभारतं साक्रोशं न केवलं राष्ट्रस्य विनाशकानां मद्यापानशालादीनां गर्हणं करोति अपि तु वेश्य-कितवादीनां जनानामपि। तदुक्तम् -

**पानागारनिवेशाश्च वेश्या: प्रापणिकास्तथा।**
**कुशीलवा: सकितवा ये चान्ये केचिदीदृशा:।।**
**नियम्या: सर्व एवैते ये राष्ट्रस्योपघातका:।**
**एते राष्ट्रेऽभितिष्ठन्तो बाधन्ते भद्रिका: प्रजा:।।**[31]

अत: पानागार-वेश्यागृहादीनि स्थानानि प्रजाहितैषिणा शासकेन अवश्यमेव नियन्त्रणीयानि। अन्यथा मद्यपाने रक्तो जन: कामे आसक्तो भवति। आसक्ते कामे स लज्जाभयादिकं सन्त्यज्य मांसभक्षण-परधनापहरणादिषु अकार्येषु व्यापृतो भवति। सङ्गविवर्जितेषु परस्व-परदारा-परधनलुण्ठनादिष्वकर्मसु व्यापृतं जनं य: प्रजाधिप: न नियन्त्रयति स: तस्य पापस्य चतुर्थभागं भुङ्क्ते। यतो हि शासकस्य कर्तव्यमिदमेवास्ति यत् -

**नित्यं यस्तु सतो रक्षेदसतश्च निवर्तयेत्।**
**स एव राजकर्तव्यस्तेन सर्वमिदं धृतम्।।**[32]

**आन्तरेभ्य: परान् रक्षेत्परेभ्य: पुनरान्तरान्।**
**परान्परेभ्य: स्वान्स्वेभ्य: सर्वान्पालय नित्यदा।।** [33]

एतत्पर्यालोचनेन महाभारतकाले साम्प्रतमिव पानागार-वेश्यागारादयः आसन्निति, तेषां नियन्त्रणे प्रजाधिपः सततं जागरूक एवासीदिति। एतन्नियन्त्रणे अशक्तः शासकः चतर्थांशपापं भुङ्क्ते इति च विज्ञायते।

वस्तुत इमानि वचनानि आधुनिकैः शासकैः आत्मसात्कर्तव्यानि वर्तन्ते। दौर्भाग्यवशाद् आधुनिकशासकाः एतदेव विचिन्तयन्ति यत् कथं वा प्रजाभ्यः धनं सङ्ग्रहणीयमिति। वस्तुतः प्रजानां हितं नाम तासां स्वास्थ्यादीनां संरक्षणमेव। यथेच्छं पानागारादिषु संसक्तायाः प्रजायाः स्वास्थ्यं नष्टमेव भवति। नष्टे स्वास्थ्ये प्रजायाः जीवनस्तरोऽपि नश्यति। तस्य च प्रभावः राष्ट्रस्योपरि अवश्यं प्रतिबिम्बति।

तस्मात् आधुनिकेन प्रत्येकं शासकेन राष्ट्रे प्रजायाः स्वास्थ्यस्य जीवनस्तरस्य च विनाशकानां मद्यपानागारादीनां नियन्त्रणायैव सततं प्रयतेत न तु सवंर्धनायेति महाभारतमुद्बोधयति। सन्दर्भेऽस्मिन् संविधानेन प्रोक्तानि वाक्यानि अवश्यमेव संस्मरणीयानि।

**वृत्तिप्रकल्पनम्**

साम्प्रतं लोके बहवः जना विद्याभ्यासं कृत्वापि वृत्तिक्षीणेन जीवनं कष्टेन यापयन्तो दृश्यन्ते। किन्तु महाभारतं कृतविद्यानां वृत्तिक्षीणानाञ्च जनानां क्षुद्बाधानिवारणं सामाजिककर्तव्यमित्यावेदयति। यथा-

**कृशाय कृतविद्याय वृत्तिक्षीणाय सीदते।**
**अपहन्यात् क्षुधां यस्तु न तेन पुरुषः समः।।**[34]

शासकः प्रत्येकं स्नातकस्य योगक्षेमं विचारयेदिति महाभारतादेशः। यतो हि -

**यस्य स्म विषये राज्ञः स्नातकः सीदति क्षुधा।**
**अवृद्धिमेति तद्राष्ट्रं विन्दते सह राजकम्।।**[35]

राज्ञः तादृशं जीवनं विगर्हयत् महाभारतं कथयति यत् -

**धिक्तस्य जीवितं राज्ञो राष्ट्रं यस्यावसीदति।**
**अवृत्त्यान्यमनुष्योऽपि यो वैदेशिक इत्यपि।।**[36]

एतेन सुविशदतया अवगम्यते यत् महाभारतं राजनैतिकं सामाजिकञ्च विषयं संस्पर्श्य तत्र प्रजया किं कार्यं, शासकेन कथं व्यवहरणीयमित्यादिविषयान् सुष्ठूपदिशति।

## सङ्घस्य वैशिष्ट्यम्

महाभारतं सर्वादौ निर्दिशति यत्प्रजा सर्वविधासु अवस्थासु समष्टिरूपेण व्यवहरेदिति। यतो हि परस्परं कलहमानानां प्रजानां कारणतः राष्ट्रस्य उन्नतिरधोमुखी भवति, तदैव शत्रुराज्यमपि प्रजानाम् अनैक्यं दृष्ट्वा राष्ट्रनाशाय प्रयतते। तेन राष्ट्रनाशं सम्भवतीति हेतोः सदा सङ्घटनरूपेण भाव्यमित्यादिशति महाभारतम्। तदुक्तम् -

**भेदाच्चैव प्रदानाच्च भिद्यन्ते रिपुभिर्गणाः।**
**तस्मात्सङ्घातमेवाहुर्गणानां शरणं महत्।।**[37]

यतो हि - **भेदमूलो विनाशो हि गणानामुपलक्षये।**
**भिन्ना विमनसः सर्वे गच्छन्त्यरिवशं भयात्।।**
**भेदे गणा विनश्युर्हि भिन्नास्तु सुजयाः परैः।**
**तस्मात्सङ्घातयोगेन प्रयतेरन्गणाः सदा।।**[38]

अत एव भारतसंविधाने प्रत्येकं नागरिकस्य मूलकर्तव्यत्वेन समुल्लिखितं यत् -

**"भारतस्य सर्वेषु लोकेषु समरसतायाः समानभ्रातृत्वभावनायाश्च तथा अभिवर्धनं यथा धर्म-भाषा-प्रदेश-वर्गादिमूलः भेदभावः निरसति, तथा च नारीगरिम्णः विरोधिनीनां प्रथानां त्यागः भारतस्य सर्वेषां नागरिकाणां कर्तव्यं भवेत्।"**[39] इति।

आधुनिकैः वाक्यान्येतानि सादरम् आदर्तव्यानि वर्तन्ते। यतो हि आधुनिके समाजे जाति-कुल-मत-आर्थिकादिबहवः भेदाः संदृश्यन्ते। अयमेव भेदभावोऽद्य समाजं नितान्तं परिपीडकानां मावोवाद-आतङ्कवादादीनां चेष्टानाम् उद्भवकारक इति वक्तुं शक्यते। अत एव महाभारतमुद्घोषयति यत् सर्वदा सर्वैः सङ्घरूपेण भाव्यमिति।

वस्तुतः महाभारतीयाः राजनैतिकाः सामाजिकाश्च विषयाः न केवलं तत्कालिकप्रजाजीवनप्रतिबिम्बका अपितु आधुनिकजनानां कृते पथप्रदर्शकाः, नेत्रोन्मीलनकारकाश्च सन्तीति मुक्तकण्ठेन वक्तुं शक्यते।

## सन्दर्भाः

1. आदि.56.33
2. भा.सं अनु 74,85अ
3. शान्ति 81.25,26
4. शान्ति.93.2
5. शान्ति.93.32
6. भा.सं अनु 84अ
7. शान्ति 83.47
8. शान्ति 118.4
9. शा.85.7.9
10. शान्ति.87.12
11. अनु.96.35
12. शान्ति.58.28
13. शान्ति.88.26
14. शान्ति.82.2-4
15. शान्ति.82.5
16. अनु.26.65
17. शान्ति.87.25
18. अनु.23.72
19. अनु.23.77
20. नु.58.26
21. अनु.59.11
22. अनु.61.30
23. भा.सं अनु.47
24. शान्ति.89.7
25. शान्ति.88.10
26. अनु.145.5
27. भा.सं.अनु 48
28. शान्ति.88.11
29. शान्ति.88.12
30. भा.सं अनु.47

31. शान्ति.88.14,15
32. शान्ति.79.44
33. शान्ति.89.12
34. शान्ति.59.11
35. अनु.61.30
36. शान्ति.130.34
37. शान्ति.107.32
38. शान्ति.107.13-14
39. भा.सं. अनु. 51(ङ)

## सहायकग्रन्थाः


1. धर्मकोशः -(सं)जोशी लक्ष्मणशास्त्री, प्रज्ञापाठशालमण्डलम्, वायि(सतरा)भागः-4, द्वितीयखण्डः, 2000, तृतीयखण्डः, 1974
2. भारतस्य संविधानम् - विधायिविभागः, भारतशासनम्, नवदेहली, 1958
3. महाभारतम्- नीलकण्ठीयव्याख्यासहितम्, चित्रकला प्रेस्, पुणे, 1932
4. महाभारतम्- (सं)सात्वलेकर,श्रीपाददामोदर, स्वाध्याय मण्डल, पारडी,1952
5. महाभारतम्- (सं)सुक्तङ्कर वी.एस्,भण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्, पुणे 1956
6. महाभारतम्- नीलकण्ठव्याख्योपेतम्, (सं) रामचन्द्रशास्त्री, ओरियण्टल बुक्स् कार्पोरेशन्, दिल्ली, 1979
7. नीतिविधिविमर्शः- त्रिपाठी हरिहरनाथः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1993
8. धर्म और समाज- सर्वेपल्लि राधाकृष्णन्., राजपाल सन्स्, दिल्ली, 1961
9. Altekar, A.S., State and government in ancient India, Motilal banarasidas, Delhi, reprint 1984.
10. Chaudhari, p.k., Political concepts in ancient India, S.chand's company , New Delhi, 1977
11. Dandekar, R.N., The Mahabharata revisited, Sahitya Academy, New Delhi, 1990.
12. Goel, Aruna., Good governance and ancient Sanskrit literature, deep & deep publications, Delhi ,2003

13. Michael., (Ed) The Concept of Rajadharma, Sandeep prakasan, New Delhi, 2005

14. Sharma, Ram karan., Elements of poetry in the Mahabharata, Motilal Banarasidas, Delhi,1988

15. Sukthankar, V.S., On the meaning of the Mahabharata, The Asiatic Society of Bombay, 1957

16. Spellman, John w., Political theory of Ancient India, Oxford University Press, New Delhi , 1964

17. Vaidya C.V., The Mahabharata : A Criticism, Mehar Chand Lachmandas, New Delhi.1966

ISSN: 2231 - 0452

# सामन्तचन्द्रशेखरोक्तग्रहकक्षाक्रमस्य समीक्षा

*सूर्यप्रकाश गौतम*

*(शोधच्छात्रः, ज्योतिषविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

श्रीचन्द्रशेखरसिंहसामन्तमहोदयेन ग्रहसंस्थाविषये एवं निगदितम्-

**भूगोलः सौम्यशुक्रावनितनयसुराचार्यसूर्यात्मजानाम्**
**कक्षावृत्तैर्वृतः स्यात् स्फुटदिवसकृतः कक्षयावेष्टितोऽयम्।**
**मध्ये मध्यार्कस्य दूरेऽन्तिके च स्फुटरविभगणर्क्षेशकक्षापरोतः**
**तिष्ठत्यण्डस्य मध्ये नभसि किल सदाधारशून्यः स्वशक्त्या।।**[1]

अत्र बुधशुक्रभौमगुरुशनीनां पञ्चताराग्रहाणां कक्षाकेन्द्रे सूर्यः वर्तते। किन्तु एषः सूर्यः स्फुटः नैव, अपि तु मध्यमसूर्यः। एतस्य मध्यमसूर्यस्य कक्षाकेन्द्रे पृथ्वी स्थिता वर्तते। मध्यमसूर्यः कदाचित् पृथिव्याः समीपे कदाचिच्च दूरे भ्रमति। एवं ब्रह्माण्डमध्ये पृथिव्याधारशून्या भूत्वा स्वशक्त्या स्थिता वर्तते। इयं पृथ्वी स्फुटसूर्यनक्षत्रसमूहचन्द्रकक्षाभिश्चावृता वर्तते। तद्यथा चित्रे -



**अथ समीक्षा -**

सामन्तमहोदयेन यत् ग्रहसंस्थानिरूपणं कृतं तत्तु द्विकेन्द्रिकं वर्तते। अत्र पञ्चताराग्रहाणां कक्षाकेन्द्रे मध्यमसूर्यः तथा मध्यमसूर्यस्याऽपि कक्षाकेन्द्रे भूमेः स्थितिः कल्पिता। प्राचीनार्वाचीनाचार्यैः ग्रहसंस्थाविषये एतादृशी व्यवस्था न कल्पिता। अतः नूतनोऽयं विषयः। विषयस्यास्य स्पष्टीकरणार्थमत्र प्राचीनमतं तथा अर्वाचीनमतं सोपपत्तिकं प्रस्तूयते -

प्राचीनैः ग्रहाणां भ्रमणकेन्द्रं भूः इति स्वीकृतम्। अतस्तेषां मतानुसार-मुत्तरोत्तरं दूरत्वक्रमेण चन्द्रबुधशुक्ररविभौमगुरुशनीनां कक्षा वर्तन्ते। यथा आर्यभट्टीये - **भानामधः शनैश्चरबृहस्पतिकुजार्कशुक्रबुधचन्द्राः।**[२] इति। ब्रह्मगुप्तो यथा - **शशिबुधसितार्ककुजगुरूशनिकक्षावेष्टितो भकक्षान्तः।**[३] इति। लल्लोऽपि यथा - **चन्द्रज्ञभार्गवदिनेश-कुजार्यसौरि-भानि-क्षितेः क्रमत ऊर्ध्वगतिस्थितानि।**[४] इति। तथा चाह वटेश्वराचार्यः वटेश्वरसिद्धान्ते - **ब्रह्मा-वनीन्दुबुध-शुक्रदिवाकरा- जीवार्कसूनुभ।**[५] इति। तथा श्रीपतिः सिद्धान्तशेखरे - **अधो भचक्राच्छनिजीवभौम-सूर्यास्फुजिद्बोधनशीतभासाम्।**[६] इति। सूर्यसिद्धान्ते यथा - **मन्दामरेज्य-भूपुत्र-सूर्य-शुक्रेन्दुजेन्दवः।**[७] इति। तथा भास्करोऽपि- **भूमेः पिण्डः शशाङ्कज्ञ-कविरविकुजेज्यार्किनक्षत्रकक्षा।**[८]

एवं सर्वैः प्राचीनाचार्यैः इदमेव स्वरूपं प्रतिपादितम्। अत्र प्रथमं चन्द्रबुधशुक्रादिग्रहकक्षावृत्तानां कथमीदृश्युपर्युपरि स्थितिरस्ति प्राचीनमतानुसारं तत् प्रदर्श्यते -

ग्रहकक्षानिवेशः कथमीदृश एतज्ज्ञानं बिम्बीयकर्णज्ञानाधीनमस्ति। यस्माद् ग्रहबिम्बीयकर्णाद्यस्य बिम्बीयकर्णमानमधिकं भवेत्तत्कक्षा महती भवति, अर्थाद्यस्य

कर्णमानमल्पमस्ति तत्कक्षातः सा कक्षा (यस्य कर्णमानमधिकं तदीया) परिगता भवति। अतो वेधेन बिम्बीयकर्णसाधनं क्रियते। यथा चित्रे-




अत्र भू = भूकेन्द्रम्। पृ = भूपृष्ठस्थानम्। वि = ग्रहबिम्बक्रेन्द्रम्। दृ = दृष्टिस्थानम्। पृदृ = नरोच्छ्रितिः। भूवि = बिम्बीयकर्णः। भूपृ = भूव्यासार्धम्।

अत्र भूव्यासार्धं विदितमस्ति तथा नरोच्छ्रितिरपि विदितमस्ति। विपृदृ, विदृपृ कोणौ तुरीययन्त्रद्वारा मापनेन विदितौ ततः १८० - (∠ विपृदृ + विदृपृ) = पृविदृ। एवमयमपि कोणो विदितो जातस्तदा विपृदृ त्रिभुजेऽनुपातेन -

$$\frac{\text{पृदृ x ज्या } \angle \text{ पृदृवि}}{\text{ज्या } \angle \text{ पृविदृ}} = \text{पृवि।}$$

अत्र कोणज्या कोणोनभार्धांशज्ययोस्तुल्यत्वात्-

ज्या ∠ विपृदृ = ज्या (१८० - ∠ विपृदृ) ∠ विपृभू कोणस्यापि ज्ञानं जातम्। तदा विपृभू त्रिभूजे विपृ, भूपृ भूजयोस्तदन्तर्गतकोणस्य ज्ञानात् भूसंमुखास्त्रोद्भवकोशिञ्जिनीत्यादिप्रकारेण भुवि भुजस्य ज्ञानं भवेदयमेव

बिम्बीयकर्णः। एतद्वेधेन कर्णानयनेन सर्वग्रहकर्णापेक्षया चन्द्रस्य कर्णोऽल्प उपलब्धोऽतः सर्वेषां ग्रहाणां कक्षापेक्षया चन्द्रकक्षा लघ्वी चन्द्रबिम्बीयकर्णाद् बुधबिम्बीयकर्णोऽधिकस्ततोऽधिकः शुक्रस्येत्यादेर्यथा यथाऽधिकः कर्ण उपलब्धः तथातथोपर्युपरिचन्द्रबुधशुक्ररविकुजगुरुशनैश्चराणां कक्षाः प्राचीनाचार्यैः निगदिताः। यथा चित्रे -




परमिदं सिद्धान्तोक्तं मतं न वास्तवम्। यतः प्राचीनानां मते बुधशुक्र-कर्णयोर्महदन्तरं तयोर्दृश्यादृश्यत्वञ्च न घटते तथा च तत्संस्थावलम्बनेन मन्दफलशीघ्रफलवासनाया नैपुण्येन स्फुटीकरणं कर्तुं न शक्यते। ग्रहगतेरुपपत्तिलाभाय ग्रहा नीचोच्चवृत्तेषु भ्रमन्तीति प्रकल्पितं तैः। परमत्र कल्पने मन्दशीघ्रकर्णयोरभेदापत्तेर्व्याकुलत्वप्रसङ्गः। तद्दूरीकरणाय पूर्वाचार्या अप्यसमर्थाः।

फलवासनावैचित्र्यात्किमपि नाशङ्कनीयमिति श्रीभास्कराचार्याः स्वशिष्यान्प्रति कथयन्ति स्म। तद्वाक्यं यथा - **दलीकृताभ्यां प्रथमं फलाभ्यां ततोऽखिलाभ्यामसकृत्कुजस्तु। नाशङ्कनीयं न चलेकिमित्यं यतोविचित्रा फलवासनात्र**[१] इत्यनेन सिद्धान्तमतं न समीचीनमिति न चोपपत्तियुक्तमित्यपि स्फुटमेवेति।

अर्वाचीनैस्तु सूर्यकेन्द्राभिप्रायेण दीर्घवृत्ताकारकक्षायां ग्रहभ्रमणं स्वीक्रियते। दीर्घवृत्तस्यैकनाभौ रविकेन्द्रं तस्माद् बहिर्मन्दकर्णाग्रे बुधशुक्रभूभौमगुरुशनि-युरेनसनेप्चूनप्लेटोग्रहाणां कक्षाः क्रमशः ऊर्ध्वाधररूपेण सन्ति। अत्र चन्द्रस्तु भुवः उपग्रहः। यथा चित्रे -



केतकरमहोदयेनाऽपि अर्वाचीनमतानुरोधेन ग्रहसंस्था निगदिता। यथा-

**विच्छुक्रक्षितिभौमजीवशनयो दीर्घेषु वृत्तेषु तत्**
**तन्नाभिस्थितसूर्यकर्षणबलात् शश्वद् भ्रमन्तीति सत्।**
**अर्वाचीनमतं प्रतीतिजनकं खेटस्थितेः साधने**
**सिद्धान्तोक्तमुहुः कृतेर्निरसकं चास्मिन् मया स्वीकृतम्।।**[१०]

अत्र बुधशुक्रभूकुजगुरूशनयः एते षट् व्योमचराः सूर्यस्य नैसर्गिकनियम-जालनियन्त्रिताकर्षणबलात् दीर्घवर्तुलकक्षायां सूर्यं परितो भ्रमन्ति। सिद्धान्त-स्योपपत्तिर्न्यूटनमहोदयेन निगदिता। न्यूटनमहोदयस्याकर्षणसिद्धान्तेन ग्रहगतिवेगवृद्धिः = दू। अत्र दू ग्रहभ्रमणकेन्द्राद् ग्रहस्य दूरत्वम्। यथा यथा भ्रमणकेन्द्राद् दूरत्वं वर्द्धते, तथा तथा हरस्याधिकत्वाल्लब्धिरूपो ग्रहगतिवेगोऽप्यपचीयते। तेन येषां ग्रहाणां गतिरधिकोपलभ्यते, तेऽन्येषामपेक्षया भ्रमणकेन्द्रस्य निकटतराः सन्ति।

सामन्तमहोदयेन द्वयोः मतयोः निरीक्षणं परीक्षणञ्च कृत्वा निर्णीतं यत् ग्रहाणां कक्षाकेन्द्रे सूर्य एव वर्तते इति। परञ्च एषः स्फुटार्कः नैव अपि तु मध्यमार्कः। अत्र तेषां तर्कोऽस्ति यत् - ग्रहाणां कक्षाकेन्द्रे स्फुटार्कः नास्ति। यतोहि ग्रहाः स्फुटार्कं प्रत्याकर्षिताः न भवन्ति। ते तु स्वोच्चदेवेनाकृष्टाः भूत्वा चन्द्रवत् भ्रमन्ति। अतः सर्वग्रहाणां कक्षाकेन्द्रे मध्यमार्कः स्वीक्रियते तदेव स्पष्टग्रहाणां सार्वकालिकी दृक्सिद्धिः भविष्यति।[११]अत्र मध्यमरवि-कल्पनायाः रहस्यं किं तद् विचार्यते - वस्तुतः सर्वेऽपि गगने चराः अनियमितगत्या परिचरन्ति। एवमेतेषां प्रतिक्षणं विषमगतिमत्वात् तद्गतिसिद्धये समगतिर्मध्यमाख्यो ग्रहः कल्प्यते। तत्र मध्यमग्रहो वर्तुलकक्षायां

नियतमध्यगत्यैव समकाले समपथमाक्रम्य भ्रमति। स्पष्टग्रहस्तु दीर्घवर्तुल-कक्षायामनियतस्फुटगत्या समकाले समक्षेत्राण्याक्रम्य भ्रमति। अत्र मध्यमेति शब्देनैव तत्स्वरूपव्यक्तिर्भविष्यति। नाम मध्यमग्रहस्थानादग्रतः पृष्ठतो वा स्वल्पान्तरेणैव स्पष्टग्रहस्थानं भवति। मध्यमग्रहः स्पष्टग्रहश्च यथा द्वावप्युच्चनीचबिन्दुद्वये सङ्गच्छेते तथैव नाडीक्रान्तिवलयोर्यौ सम्पातौ तयोर्मध्यमार्कः स्फुटार्कश्च द्वावपि सङ्गच्छेते। अतः सामन्तमहोदयेन अनियमितगत्या संचरतः स्फुटार्कस्य स्थानं निश्चेतुं मध्यमगत्यनुसरणशीलं मध्यमार्कं पञ्चताराग्रहाणां कक्षाकेन्द्रं कल्पितम्।

अत्र दृश्यग्रहाणां भ्रमणकेन्द्रं तु पृथ्वी। अर्थात् अर्वाचीनमतानुसारं यथा पृथ्वी रविनाभित्वेन दीर्घवृत्तमार्गे भ्रमति। तथा रविरपि भूनाभित्वेन दृश्यं दीर्घवृत्तमार्गमुत्पादयति। अतः सामन्तमहोदयेन मध्यमसूर्यस्य भ्रमणकेन्द्रं पृथ्वी इति स्वीकृतम्। अत्र मध्यमसूर्यस्तु मन्दप्रतिवृत्ते भ्रमति। सूर्यस्य मन्दोच्चस्थाने स्थितत्वात् भूकेन्द्राद् दूरतरप्रदेशे तस्य स्थितिः तथा नीचस्थाने स्थितत्वात् निकटतरप्रदेशे तस्य स्थितिर्भवति। अतः सामन्तमहोदयेन मध्यमसूर्यः कदाचित् पृथिव्याः समीपं तथा कदाचित् दूरे भ्रमतीति प्रतिपादितम्।

## सन्दर्भाः

१. सिद्धान्तदर्पणगोलाधिकारः, भूगोलस्थितिवर्णनम् -३
२. आर्यभट्टीयम्, कालक्रियापादः -१५
३. ब्रह्मस्फुटसिद्धान्तः, गोलाधिकारः -२
४. शिष्यधीवृद्धीदम्, मध्यमाधिकारः -११ टीका.-१

५. वटेश्वरसिद्धान्तः, मध्यमाधिकारः -१

६. सिद्धान्तशेखरः, पञ्चदशाध्यायः -८

७. सूर्यसिद्धान्तः, भुगोलाधिकारः -३१

८. सिद्धान्तशिरोमणीगोलाधिकारभुवनकोशः -२

९. सिद्धान्तशिरोमणीगोलाधिकारछेदकाधिकारः -३७

१०. केतकीग्रहगणितम्, प्रास्ताविकाधिकारः -७

११. सिद्धान्तदर्पणगोलाधिकारः, भूगोलस्थितिवर्णनम् ८८-८९

ISSN: 2231-0452

# षोडशसंस्कारेषु नामकरणसंस्कारमुहूर्तविचारः

*जयकृष्णन् नम्पूतिरि एन्.डि.*

*(शोधच्छात्रः, ज्योतिषविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**उपोद्घातः**

मानवजीवनस्य समग्रविकासार्थं प्राचीनैः अस्मदाचार्यैः नैके उपायाः परिकल्पिताः। न केवलमाध्यात्मिकविकासार्थम्, भौतिकविकासार्थमपि च उपायाः समुपदिष्टाः तैराचार्यैः। शरीरमाद्यं खलु धर्मसाधनम् इत्युक्त्यनुरोधेन समुचितधार्मिककर्मणां समनुष्ठानार्थं स्वस्थं शरीरमपि परममावश्यकम्। मानवस्य शारीरिक-मानसिक-आध्यात्मिकविकासाः संस्काराधीनाः। यैः कर्मभिः विशुद्धस्सन्मानवः मोक्षपदस्याधिकारी सम्भवति ते संस्काराः इत्यभिधीयन्ते। एभिश्च संस्कारैः संस्कृतस्सन्नेव मानवः ब्रह्मैक्यपात्रं भवति। यथा दूषितजलस्य संस्कारेण तस्य विनियोगः सर्वत्र कर्तुं शक्यते तथैव संस्काराणामनुष्ठानेन मनुष्यस्य सर्वकर्मसु अर्हता आगच्छति। सर्वे इमे क्रियाकलापाः सुमुहूर्ते समनुष्ठिता एव यथार्थफलदायकाः भवन्तीति भारतीयानामस्माकं द्रढीयान् विश्वासः। ग्रहाणामानुकूल्यं विचिन्त्य एतेषां समनुष्ठानार्थं समुचितं समयं ज्योतिश्शास्त्रं निर्दिशति।

संस्काराः कति ? के च ते ? इत्यस्मिन्विषये आचार्याणां नैके मतभेदाः दरीदृश्यन्ते। अस्मदाचार्यैः मानवस्य सांस्कारिक-सामूहिक-आध्यात्मिकविकासाय ऋषिभिः मानवजीवने अनुष्ठीयमानाः बहवो संस्काराः निर्दिष्टाः। यथा मनुस्मृतौ गर्भाधानादित्रयोदशसंस्काराः मनुना निर्दिश्यन्ते। तथैव व्यासः षोडश, याज्ञवल्क्यः द्वादश, विष्णुस्मृतौ पञ्चदश, संस्कारप्रकाशे एकचत्वारिंशतं, गौतमः चत्वारिंशतं, बौधायनः त्रयोदश, आश्वलायनः पञ्चदश संस्कारांश्च निर्दिशति। एते संस्काराः व्यक्तेः

मानसिक-शारीरिकशुद्धतायै अनुष्ठेया भवन्ति। एते च संस्काराः सामान्येन षोडश इति स्वीक्रियन्ते। ते च मुहूर्तपदव्याम् –

**आधानं तनयस्य पुंसवविधिस्सीमन्तजाताह्वयाः**
**निष्क्रामोऽन्नविधिः क्षुरोपनयने त्रीणि व्रतानि क्रमात्।**
**गोदानञ्च समापनं व्रतविधेः पाणिग्रहोऽग्न्याहुतिः**
**विप्रादौ विहिताः श्रुतौ निगदिताः कार्याः क्रियाः षोडश।।**[१]

गर्भाधानम्, पुंसवनम्, सीमन्तः, जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, चौलम्, उपनयनम्, चत्वारि वेदव्रतानि (होतारम् औपनिषदम्, शुक्रियम्, गोदानम्), समावर्तनम्, विवाहः, अन्त्येष्टिः इत्येते षोडशसंस्काराः भवन्ति।

एतेषु षोडशसंस्कारेषु नामकरणसंस्कारमुहूर्तविचारे आचार्याणां मतैक्यं भेदाश्च प्रस्तूयन्ते।

**नामकरणसंस्कारः**

**नामाखिलस्य व्यवहारहेतुः शुभावहं कर्मसु भाग्यहेतुः।**
**नाम्नैव कीर्तिं लभते मनुष्यस्ततः प्रशस्तं खलु नामकर्म।।**[२]

अस्मिन् कर्मणि शिशोः नाम कथं भवेदिति जिज्ञासायां मनुः एवं निर्दिशति -

**माङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम्।**
**वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम्।।**[३]

मङ्गलद्योतकानि नामानि ब्राह्मणस्य, क्षत्रियस्य बलसूचकं, वैश्यस्य धनसंयुक्तं, शूद्रस्य दासीसूचकं च नाम स्थापयेत्। तथैव सरलतया उच्चारणयोग्यम्, अक्रूरं, स्पष्टम्, अर्थयुक्तं, मनोहरं, मङ्गलशब्दसहितं च नाम स्त्रीणां भवेत्। तन्नाम अनुग्रहद्योतकं, तथैव तस्य नाम्नः अन्तिमवर्णस्य दीर्घत्वं च भवेत्।

एवमेव मनुस्मृतौ विवाहचिन्तनावसरे स्त्रीणां नाम कथं भवेदित्यपि स्पष्टतया कश्चन विचारः दृश्यते। तदेवम् –

**नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम्।**
**न पक्ष्यहिप्रष्यनाम्नीं न च भीषणनामिकाम्।।**[४]

नाम कथं भवेदिति विचारे सति इत्थमपि कश्चनविचार: दृश्यते। नक्षत्रस्य यद्वर्णमुच्यते, तत्प्रथमाक्षरं यथा भवति तथा कुलदेवतासम्बद्धं कञ्चन नाम शिशो: स्थापयेदिति। संस्कारेऽस्मिन् स्थाप्यमानं नाम इदं सामान्यतया गोप्यमेव भवति। जन्मनाम तु गोपयेत् इत्युक्त्या यन्नाम संस्कारे शिशो: स्थाप्यते, तन्नाम गोप्यं भवेत्। शिशो: व्यवहारनाम अन्यद् भवेदित्याशय:।

**नामकरणमुहूर्तविचार:**

नामकर्म कस्मिन् दिवसे करणीयमिति शङ्कायां मनु: एवं समाधानं निर्दिशति -

**नामधेयं दशम्यां तु द्वादश्यां वास्य कारयेत्।**
**पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते।।**[५]

नामकरणसंस्कार: शिशो: जननानन्तरं दशमे वा द्वादशे दिने कुर्यात्। कालेऽस्मिन् न क्रियते तर्हि अग्रिमदिनेषु शुभतिथिनक्षत्रेषु समीचीनलग्ने नामकर्म कार्यम्। कालविधानं नाम्नि ग्रन्थे नामकरणमुहूर्त: एवं विचार्यते।

**नामकर्म दशमेऽथवाऽह्नि द्वादशे शुभतिथौ विधीयते।**
**स्वोच्चमित्रभवनस्थसद्ग्रहस्तादृशैर्यदि विलोकिताश्शुभा:।।**[६]

नामकरणसंस्कार: जननात् दशमे अथवा द्वादशे दिने शुभतिथौ क्रियते। स्वीय–उच्चस्थानेषु अथवा मित्रक्षेत्रेषु तिष्ठन् शुभग्रह:, तथैव तादृशै: उच्चमित्रक्षेत्रस्थितै: शुभग्रहै: विलोकिता: दृष्टा: राशय: शुभा:। उच्चसुहृद्भवनस्थै: शुभग्रहै: दृष्टेषु राशिषु लग्नमायाति चेत् शुभमिति।

**मित्रादित्यमघोत्तराशतभिषक्स्वातीधनिष्ठाच्युत–**
**प्राजेशाश्विशशाङ्कपौष्णदिनकृत्पुष्येषु राशौ स्थिरे।**
**छिद्रां पञ्चदशीं विहाय नवमीं शुद्धेऽष्टमे भार्गव:**
**ज्ञाचार्यामृतपादसूर्यजदिने नामानि कुर्याच्छिशो:।।**[७]

मित्रः अनुराधा। अदिती पुनर्वसुः। मघः। उत्तरा उत्तराफाल्गुनी उत्तराषाढः उत्तराभाद्रपदा च। शतभिषक्। स्वाती। धनिष्ठा। अच्युतः विष्णुः श्रवणः। प्राजेशः ब्रह्मा रोहिणी। अश्वि अश्विनी। शशाङ्कः चन्द्रः मृगशिरः। पौष्णः पूषा रेवती। दिनकृत् सूर्यः हस्तः। पुष्यः। एषु नक्षत्रेषु, स्थिरे राशौ स्थिरराशिलग्ने (वृषभसिंहवृच्छिककुम्भाः स्थिरराशयः), छिद्रा षष्ठी अष्टमी द्वादशी च। पञ्चदशी पूर्णिमा अमावास्या च। नवमी। इत्येतान् तिथीन् विहाय अन्येषु तिथिषु, अष्टमभावशुद्धियुक्ते लग्ने, भार्गवः शुक्रः। ज्ञः बुधः। आचार्यः गुरुः। अमृतपादः चन्द्रः। सूर्यजः शनिः। एषु वासरेषु च शिशोः नामकरणसंस्कारं कुर्यात्।

मुहूर्तचिन्तामणौ विषयोऽयमेवं दृश्यते-

**तज्जातकर्मादि शिशोर्विधेयं पर्वाख्यरिक्तोनतिथौ शुभेऽह्नि।**
**एकादशे द्वादशकेऽपि घस्त्रे मृदुध्रुवक्षिप्रचरोडुषु स्यात्।।**[८]

श्लोकेऽस्मिन् जातकर्मादि इत्यनेन जातकर्मनामकरणे इति स्वीक्रियते। यतो हि जातकर्मसंस्कारस्य मुहूर्तगणना तथा न क्रियते। शिशोः जननानन्तरं नाभिच्छेदनात्पूर्वमेव संस्कारोऽयमनुष्ठेयः भवति। अतः नामकरणमुहूर्तः श्रीरामदैवज्ञेन एवं निर्दिश्यते। चतुर्थी नवमी चतुर्दशी पूर्णिमा अमावास्या च इत्येतान् तिथीन् त्यक्त्वा व्यतीपातादिदोषरहिते शुभदिने शिशोः जननात् दशमे वा द्वादशे दिने, मृगशिरा रेवती चित्रा अनुराधा इत्येतेषु मृदुनक्षत्रेषु, उत्तराफाल्गुनी उत्तराषाढः उत्तराभाद्रपदा रोहिणी इत्येतेषु ध्रुवनक्षत्रेषु, हस्तः अश्विनी पुष्यः अभिजित् इत्येतेषु क्षिप्रनक्षत्रेषु, स्वाती पुनर्वसुः श्रवणः धनिष्ठा शतभिषक् इत्येतेषु चरनक्षत्रेषु च शिशोः नामकरणसंस्कारः कार्यः इति।

मुहूर्तपदव्याम् -

**नामाह्नि द्वादशेऽतः परमशुभमहः पूर्वमिष्टं तुरीयो**
**भागः कौषीतकानामिह दशमनिशि त्यज्यतेऽत्रापराह्णः।**
**चित्राशूर्पेन्द्रपूर्वाश्वहियमशिखिनोऽजैणजूकानिशाद्य-**
**त्र्यंशौ भौमार्किवारौ व्ययखगमृतिस्थासृजो जन्मभं च।।**[९]

जननदिनादारभ्य द्वादशे दिने बालानां नामकरणं कार्यम्। एकादशदिनमपि शुभम्। त्रयोदशदिनं त्याज्यम्। कौषीतकानां नामकरणे दशमनिशायाः चतुर्थयामोऽपि स्वीकार्यः। अपराह्णकालः नामकर्मणि वर्ज्यः। चित्रा विशाखा ज्येष्ठा पूर्वाफाल्गुनी पूर्वाषाढः पूर्वाभाद्रपदा अश्विनी आश्लेषा भरणी कृत्तिका इत्येतानि नक्षत्राणि अशुभानि। मेषमकरतुलाराशयः वर्जनीयाः। रात्रेः त्र्यंशभागस्य प्रथमद्वितीयांशौ वर्ज्यौ। कुजशनिवारौ त्याज्यौ। मुहूर्तलग्नात् द्वादशभावे सर्वे ग्रहाः, अष्टमे कुजः च वर्जनीयाः। शिशोः जन्मनक्षत्रं च वर्ज्यम्।

इत्येवं रीत्या बहुविस्तृतया मुहूर्तविचारे कृते सति कदाचित् मुहूर्तसमयः दुर्लभः भवति। कालेऽस्मिन् मुहूर्तः एवं स्वीकरणीयमिति आचार्याः अभिप्रयन्ति -

**दिवसो गुणदोषाभ्यां विमिश्रस्स्यात् परस्परं**
**केवलं गुणसंयुक्तो देवानामपि दुर्लभः।**
**दोषान् सर्वान् परित्यक्तुमशक्यं बहुवत्सरैः**
**तस्मात्परीक्ष्य कुर्वीत स्वल्पदोषगुणाधिके।।**[१०]

एकैकः दिवसः गुणदोषसम्मिश्रः भवति। केवलं गुणयुक्तमहोरात्रं देवानामपि दुर्लभं वर्तते। बहुवत्सराणि प्रतीक्षां कृत्वाऽपि सर्वान् दोषान् विहाय गुणयुक्तः मुहूर्तः न प्राप्येत। अतः मुहूर्त्तस्वीकरणावसरे स्वल्पदोषः गुणाधिकः कालः यदा भवति, सः स्वीकरणीयः।

कालपुरुषः सर्वत्र व्याप्तः, आदिमध्यान्तरहितश्च इत्यतः सर्वदा गुणदोषयुक्तो भवति। अतः दोषान् वा गुणान् विहाय एकः कालः न प्राप्यते। अतः मुहूर्तचिन्तनसमये स्वल्पदोषः गुणाधिकः यः कालः प्राप्यते, सः स्वीकरणीयः।

**मासप्रोक्तेषु कार्येषु समौढ्यजीवशुक्रयोः।**
**अधिमासाधिके दोषाः न स्युः कालविधेर्बलात्।।**[११]

मासाधिष्ठितकर्मसु (प्रत्येकस्मिन्मासे करणीयानि कार्याणि, यथा - तृतीयमासे पुंसवनम् इत्यादि) गुरुशुक्रयोः मौढ्यम्, अधिमासः इत्यादीनां विचारः, कालस्यैव

अधिकप्राधान्यम् इत्यत: न कार्य:। अत्रापि नामकरणसंस्कार: जननात् दशमे एकादशे द्वादशे वा दिने करणीय इत्यत: तदानीं प्राप्यमाण: स्वल्पदोषगुणाधिककाल: स्वीकरणीय:।

**उपसंहार:**

मानवा: सामूहिकजीविन:। समूहाश्रिता: भवन्ति तेषां प्रवृत्तय:। अत: परस्पराशयविनिमयाय, तथा प्रत्येकं मानवस्य अवगमनाय च प्रत्येकं जनस्यापि नाम अत्यावश्यकम्। तन्नाम सुप्रसिद्धं भवितुमाचार्यै: नामकरणसंस्काराय मुहूर्त: उपदिष्ट:। विषयोऽयं माधवीये एवं दृश्यते -

**उच्चस्थितेन विहगेन युतेऽथ दृष्टे लग्ने कृतं भवति नाम भुवि प्रसिद्धम्।**
**नीचस्थितेन विकलं सुहृदृर्क्षगेण लोकप्रियं परमपीत्यवदद्वसिष्ठ:।।**[१२]

यदि उच्चराशिगतस्य ग्रहस्य दृष्टि: वा युति: नामकरणलग्ने भवति तर्हि स: प्रसिद्ध: भवति। नीचगतस्य ग्रहस्य दृष्टि: वा युति: मुहूर्तलग्ने वर्तते चेत्तस्य नाम्न: नाश: जायते। यशस: क्षय: भवतीत्याशय:। मित्रक्षेत्रगतस्य ग्रहस्य दृष्टि: वा युति: नामकरणमुहूर्तलग्ने भवति तर्हि स: लोकप्रिय: भवति।

इत्थं सुमुहूर्ते कृतकर्मण: सुफलप्राप्तिरायाति। मानवस्य नाम सुप्रसिद्धं भवितुं नामकरणसंस्कार: निर्दिष्ट:। नाम प्रसिद्धं भवितुं स: नामयुक्त: मनुष्य: गुणवान् श्रेष्ठश्च भवेत्। अत: गुणयुक्तं मानवं निर्मातुमेव आचार्या: संस्कारोऽयमपि आचरणीय: इत्यवोचन्। अत: मानवकुलस्याभिवृद्धये तथा श्रेष्ठं परोपकारिणं मानवं निर्मातुमेव संस्कारा: आचरीणीया: भवन्तीति शम्।

## सन्दर्भा:

१. मुहूर्तपदवी – ५ श्लोकस्य व्याख्या
२. संस्काराणां पर्यालोचनम् – पृष्ट: ६५
३. मनुस्मृति: – ३ अध्याय:, श्लोक: ३१

४. मनुस्मृतिः – ३अध्यायः, श्लोकः ९
५. मनुस्मृतिः – २अध्यायः, श्लोकः ३०
६. कालविधानम् – श्लोकः ३०
७. कालविधानम् – श्लोकः ३१
८. मुहूर्तचिन्तामणिः – ५ प्रकरणम्, श्लोकः ११
९. मुहूर्तपदवी – श्लोकः ११
१०. कालविधानम् – श्लोकः २०
११. कालविधानम् – श्लोकः २२
१२. माधवीयम् – ६ अध्यायः, श्लोकः ९

## अनुशीलितग्रन्थसूची


१. कालविधानम् – व्याख्याता टि.एन्.नाणुपिल्ल आशान्, एस्.टि.रेट्टियार् आन्ट् सन्स, विद्याभिवर्धिनी पब्लिकेशन्स, कोल्लम्, केरल, १९९८.
२. ज्योतिषनिघण्डु (वाचस्पत्यम्) – ओणक्कूर् शङ्करगणकन्, करण्ट् बुक्स, कोट्टयम्, केरल, १९९९.
३. बृहज्जातकम् – वराहमिहिरः, व्याख्याता केदारदत्त जोशी, मोतीलाल् बनारसीदास्, वाराणसी, १९८५.
४. मनुस्मृतिः – व्याख्याता सिद्धिनाथानन्द स्वामी, श्रीरामकृष्णमठम्, पुरनाट्टुकरा, त्रिशूर्, केरल, १९९९.
५. माधवीयम् – व्याख्याता पि.एस्.पुरुषोत्तमन् नम्पूतिरि, एस्.टि.रेट्टियार् आन्ट् सन्स, विद्याभिवर्धिनी पब्लिकेशन्स, कोल्लम्, केरल, १९८७.
६. मुहूर्तपदवी (सर्वार्थबोधिनी व्याख्या) – पुलियूर् पि.एस्.पुरुषोत्तमन् पोट्टि, १९११.
७. मुहूर्तचिन्तामणिः – रामदैवज्ञः, व्याख्याता डा.रामचन्द्र पाठक, चौखम्भा संस्कृत संस्थान, वाराणसी, २००१.

८. मुहूर्तपदवी - व्याख्याता करालिक्कल् ए.वेलुपिल्ला, देवी बुक् स्टाल्, कोटुङ्ङल्लूर्, केरल, २००९.

९. षोडशसंस्कारङ्ङल् - स्वामि परमेश्वरानन्द, विश्वहिन्दु बुक्स्, कलूर्, एरणाकुलम्, केरल, २००४.

१०. संस्काराणां पर्यालोचनम् - डा. जयकृष्ण मिश्रः, धर्मशास्त्रविभागः, श्रीजगन्नाथ-संस्कृतविश्वविद्यालयः, पुरी-३, ओरिसा, २००५

ISSN: 2231-0452

# पातञ्जलयोगदर्शनस्य अद्वैतदर्शनानुकूलता

*भजहरि दास*
*(शोधच्छात्रः, अद्वैतवेदान्तविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

तापत्रयपीडिते निखिले जगतीतले कोऽन्वीदृशः पामरो जनो यो नेच्छति अतिक्रान्तुं शोकनिचयम्। जीवस्य चाविद्यागर्तपतितस्य कामक्रोधादिघोरमकर-सङ्कुलसंसारवैतरिण्यां निमज्जतः सन्तारणार्थं परमकारुणिकया अहैतुककृपामय्या भगवत्या श्रुत्या उपदिष्टो ज्ञानमार्गः।

**विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः।**
**सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्।।**[१]

इति श्रुतेरनुसारं मनः प्रगृह्यैव जनो मोक्षमाप्नोति। अगृहीतमनाः कदापि सुखं प्राप्तुं न क्षमो भवति।

श्रूयते च लोकेऽपि मनसो बन्धमोक्षकारकत्वम्। ''मन एव मनुष्याणां कारणं बन्धमोक्षयोः''[२] इति। अतः चित्तवृत्तिनिरोधपूर्वकमेकाग्रता सम्पादनीया। तदानीमेव ''दृश्यते त्वग्र्यया बुद्‌ध्या सूक्ष्मया सूक्ष्मदर्शिभिः''[३] इति निरवच्छिन्नं सुखं प्राप्नोति। एतदेव गीतायां - ''ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना''[४] इति भगवता प्रतिपादितम्।

''आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य''[५] इति आम्नायानुसारं योगाभ्यासोऽपि चित्तैकाग्र्यसम्पादनेन तत्त्वज्ञानोपायत्वेन उपकरोतीति कस्य वा संशीतिलेशः स्यात्। उक्तञ्च गीतायाम् -

**तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।**
**कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन।।**[६] इति।

**शाङ्करदर्शने योगदर्शनस्योपयोगः**

वेदे सम्यक् दर्शनस्य साधनरूपेण योगः विहितः ''श्रोतव्यो मन्तव्यो निदिध्यासितव्य'' इति, एवमेव ''त्रिरुन्नतं स्थाप्य समं शरीरम्''[७] इत्यादिना च आसनादिकल्पनापुरस्सरं बहुप्रपञ्चं योगविधानं दृश्यते। योगशास्त्रेऽपि - ''अथ तत्त्वदर्शनाभ्युपायो योग'' इति सम्यग् दर्शनाभ्युपायत्वेन एव योगोऽङ्गीक्रियते। ''तत्कारणं सांख्ययोगाभिपन्नम्'' इति दर्शने यदुक्तं वैदिकमेव तत्र ज्ञानं ध्यानं च साङ्ख्ययोगशब्दाभ्यां सान्निध्यकारणादवगन्तव्यम्। अतः साङ्ख्ययोगस्मृत्योः श्रुतेः कोऽपि विरोधो न दृश्यते। अतः शाङ्करदर्शने योगस्य उपयोगो भवत्येव।

तर्हि एतेन योगः प्रयुक्तः[८] इति सूत्रविरोधः। तथाहि स्मृत्यधिकरणे सांख्यस्मृतिप्रतिपादितं प्रधानं जगत्कारणं न भवति प्रधानपरिणामत्वेन कल्पितानि महदादीनि च लोके वेदे च नोपलभ्यन्ते इत्यर्थकेन ''स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्''[९] इतरेषां चानुपलब्धेः''[१०] इति सूत्रद्वयेन साङ्ख्यदर्शनं खण्डयित्वा तमेव खण्डनप्रकारं योगदर्शनेऽपि सूत्रकारः बादरायणः - एतेन योगः प्रयुक्तः इति सूत्रेण अतिदिशति। तत्कथं शाङ्करदर्शने योगदर्शनस्योपयोगः कर्तुं शक्यते इति चेदुच्यते। तथा हि -

येन त्वंशेन विरुध्येते तेनेष्टमेव सांख्ययोगस्मृत्योः सावकाशत्वम्। तद्यथा - ''असङ्गो ह्ययं पुरुषः''[११] इत्येवमादिश्रुतिसिद्धमेव पुरुषस्य विशुद्धत्वं निर्गुणपुरुष-निरूपणेन साङ्ख्यैरभ्युपगम्यते। तथा च योगैरपि जाबालश्रुतिप्रसिद्धमेव निवृत्तिनिष्ठत्वं प्रव्रज्याद्युपदेशेनानुगम्यते। तान्यपि तर्कोपपत्तिभ्यां तत्त्वज्ञानायोपकुर्वन्ति इति चेत् उपकुर्वन्तु नाम[१२] इति भगवत्पादीयं भाष्यम्।

एतद्भाष्यानुरोधेन ये अंशाः वैदिकदर्शनाविरुद्धाः तेषां स्वीकारे योगप्रत्युक्ताधिकरणविरोधो नास्ति। तथाह्यत्र शाङ्करदर्शने योगदर्शनस्योपयोगः दिङ्मात्रं प्रदर्श्यते।

अस्ति पातञ्जलयोगदर्शने साधनपादे षट्चत्वारिंशत्तमं सूत्रं ''स्थिरसुखमासनम्'' इति। पद्मस्वस्तिकादिना सादृश्येन देहस्थापनेन यस्य पुरुषस्यावयवव्यथानुत्पत्तिलक्षणं सुखं देहचलराहित्यलक्षणं स्थैर्यं च संपद्यते, तदेव सुखमासनमिति अस्यायमर्थः।

तथा वेदान्तदर्शनेऽपि चतुर्थाध्याये प्रथमपादे षष्ठमधिकरणमासीनाधिकरणमिति नाम्ना प्रसिद्धमस्ति। तत्र चत्वारि सूत्राणि भवन्ति। यथा - ''आसीनस्सम्भवात्'', ''ध्यानाच्च'', ''अचलत्वं चापेक्ष्य'', ''स्मरन्ति च'' इति। अस्याधिकरणस्यायं सारः भवति, यथा -

अङ्गावबद्धोपासनेषु कर्मतन्त्रत्वान्नासनचिन्ता। नापि सम्यग्दर्शने, वस्तुतन्त्रत्वाज्ज्ञानस्य। इतरेषु तूपासनेषु प्रवृत्तेरियमासनचिन्ता। तत्र किं तिष्ठन्नासीनः शयानो वोपासीतोतासीन एवेति संशये मानसत्वादुपासनस्यानियमः शरीरस्थितेरिति प्राप्तेऽभिधीयते। आसीन एवोपासीत। उपासनं नाम विजातीयप्रत्ययान्तरितसजातीयप्रत्ययप्रवाहकरणम्। कुतः? सम्भवात्। शयानस्य निद्राप्रसङ्गात्। गच्छतश्चित्तविक्षेपात्। तिष्ठतः शरीरधारणव्यग्रत्वान्नोपासनं सम्भवति। परिशेषादासीनस्यैवाव्यग्रत्वसम्भवात्। तस्मादासीन एवोपासीत।

एतेन ज्ञायते यत् योगशास्त्रप्रसिद्धानि पद्मकस्वस्तिकाद्यासनानि यथासम्भवम् आत्मदर्शनोपायभूतचित्तैकाग्र्याय उपादेयानीति। एवमन्येऽपि योगशास्त्रप्रसिद्धाः समाधिविशेषाः अन्येऽपि अंशाः वेदान्तशास्त्राविरुद्धाः ग्राह्या भवन्ति -

**उपेक्ष्य नामरूपे द्वे सच्चिदानन्दतत्परः।**
**समाधिं सर्वदा कुर्यात् हृदयेऽथवा बहिः॥**[१३]

इति आचार्योक्तिः।

अतः सत्यपि योगाद्वैतदर्शनयोः तात्त्विकभेदे तयोः सम्बन्धः अविच्छेद्य एव इति अनुमतं भवति।

## सन्दर्भाः

१. कठोपनिषद्, १.३.९
२. अमृतबिन्दूपनिषद्, श्लो. सं. २
३. कठोपनिषद्, १.३.१२
४. श्रीमद्भगवद्गीता, १३.२४
५. बृहदारण्यकोपनिषद्, २.४.५
६. श्रीमद्भगवद्गीता, ६.४६
७. श्वेताश्वतरोपनिषद्, २.८
८. ब्रह्मसूत्रम्, २.१.३
९. तत्रैव, २.१.१
१०. तत्रैव, २.१.२
११. बृहदारण्यकोपनिषद्, ४.३.१६
१२. ब्रह्मसूत्रशाङ्करभाष्यम्, २.१.३
१३. दृग्दृश्यविवेकः, श्लो. सं. २२

## परिशीलितग्रन्थसूची

१. उपनिषदां समुच्चयः - श्रीनारायणशङ्करानन्दः, आनन्दाश्रममुद्रणालयः,१९२५
२. कठोपनिषद् - गीताप्रेस, गोरखपुर
३. पातञ्जलदर्शनम् - पण्डित श्री आशुबोधविद्याभुषणभट्टाचार्यः (सम्पादकः), गोवर्द्धनयन्त्रालय, कलिकाता, १९०७
४. बृहदारण्यकोपनिषद्- गीताप्रेस,गोरखपुर
५. ब्रह्मसुत्रशाङ्करभाष्यम् - आचार्यः जगदीश शास्त्री (सम्पादकः), मोतिलाल वनारसीदास, १९८०
६. श्रीमद्भगवद्गीता गूढार्थदीपिकाटीका - डा. मदनमोहन अग्रवाल ( अनुवादकः), चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १९९६
७. श्वोताश्वतरोपनिषद् - गीताप्रेस, गोरखपुर

ISSN: 2231-0452

# मायानिरूपणम्

*सौम्या*
*(शोधच्छात्री, अद्वैतवेदान्तविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**उपोद्घातः**

वेदान्ताः, केनापि धर्मेण असंसृष्टमसङ्गं कूटस्थं विकाररहितं स्वप्रकाश-परिपूर्णानन्दात्मकं सद्रूपं ब्रह्म जगतः प्रकृतिं घोषयन्ति। सच्च त्यच्चाभवत् इति श्रुतिः ब्रह्मणः एव इन्द्रियग्राह्यभूतात्मना भवनमभिधत्ते। भूताधिरूपेण परिणामे सति ब्रह्म विकारि स्यात्। ततः निर्विकारं ब्रह्म कं सहायमवलम्ब्य जगतः प्रकृतिरभूत् इति विचिन्त्य, तत्त्वदर्शिनो महर्षयः ध्यानमास्थिताः सत्त्वरजस्तमोगुणमयीं मायां शक्तिं सहायभूतामपश्यन् इति श्वेताश्वतरोपनिषत् ब्रूते। ते ध्यानयोगानुगता अपश्यन् **"देवात्मशक्तिं स्वगुणैर्निगूढाम्"**[१] इति। **"दैवी ह्येषा गुणमयी मम माया दुरत्यया"**[२] इति भगवद्गीतास्मृतेः गुणमयी मायेत्यवगम्यते। **"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्"**[३] इति श्रुतिः मायां प्रकृतिमाह। ब्रह्मैव मायाऽपि जगतः प्रकृतिः। मृत्तिकायाः जडरूपायाः विकारो घटः स्वप्रकृतिगतजाड्यधर्मवान् भवति।

ब्रह्मणः सत्ता स्फुरणं च जगति भासते। घटोऽस्ति स्फुरति इति प्रतीमः। तथा घटो जड इत्यपि। मायारूपप्रकृतिगतं, सत्तादिकं ब्रह्मरूपप्रकृतिगतं च भासते। तथा च भूतादिप्रपञ्चः मायापरिणामः मायिनो न पारमार्थिकः। अतश्च मायिकविकारवतोऽपि ब्रह्मणः कूटस्थस्वरूपोपमर्दं विना जगत्प्रकृतित्वं माया साधयति। अमुमर्थं बादरायणाचार्याः **"योनिश्च हि गीयते"**[४] इति सूत्रात् प्रकृतिरिति पदं मण्डूकप्लुत्या अनुवर्तते। ततश्चायमत्र सूत्रार्थः। न केवलं ब्रह्मैव जगदुपादानं, किन्तु यो योनिः योनिमधितिष्ठत्येकः इत्यादिश्रुतिषु योनिशब्देनोक्ता मायाप्युपादानमिति गीयते - आत्मायते मायां तु प्रकृतिं विद्यात् इत्यादि

श्रुतिषु इति। ऐन्द्रजालिकमायानिमित्तवृक्षादीनां सम्बन्धेन भूतलस्य तात्त्विकं वृक्षादिविकाररहितत्वं च विहन्यते इति प्रसिद्धम्। विकारो मायिः इति चिन्तितम्। माया स्वयंप्रकाशमात्मानमाच्छादयति। आत्मनि नास्ति, न प्रकाशते इति व्यवहारं जनयति। प्रपञ्चं जीवेश्वरादिविभागादिकं च विक्षेपं जनयति।

इयं माया आवरणशक्तिः, विक्षेपशक्तिरिति शक्तिद्वयोपेता। नास्ति न प्रकाशते इति व्यवहारयोग्यता, तादृशव्यवहारो वा आवरणम्। तत्प्रयोजकशक्तिः आवरणशक्तिः। वियदादिकं कार्यं विक्षेपः। तत्प्रयोजकशक्तिः विक्षेपशक्तिः। एतादृशशक्तिद्वयम् अविद्याशब्दिताज्ञानस्यैव शास्त्रेषूच्यते। मायैव अज्ञानपदाभिधेया अविद्या। न तयोर्भेदोऽस्ति।

अविद्याभिधानमज्ञानमात्मचैतन्यस्यावारकं ज्ञानेन निवर्त्यते। **"अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः"**[५] इति भगवद्गीता ज्ञानशब्देन अभिहितस्यात्मचैतन्य-स्यावारकमज्ञानं ब्रूते। तथा ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः इति ज्ञानेन तस्य नाशनमभिधत्ते। एवमात्मस्वरूपावारकत्वं, ज्ञाननाश्यता चेति द्वयं मायायामपि प्रतिपादयति गीता।

**श्रीविद्यारण्यस्वामिपादानामभिप्रायः**

**स्वप्रकाशे कुतोऽविद्या तां विना कथमावृतिः।**
**इत्यादितर्कजालानि स्वानुभूतिर्ग्रसत्यसौ।।**[६]

एतावता मायायाः आवरणशक्तिः चिन्तिता। मायायां प्रलयकाले वियदादीनां सूक्ष्मरूपाणि संस्कारपदेनाभिधीयमानानि लीनानि सन्ति। सर्गकाले तानि ततो निस्सृत्य स्थूलतया अभिव्यज्यन्ते।

वर्षाकाले जलाधारेषु स्थितानि मण्डूकशरीराणि वर्षापाये तत्रत्यमुद्भावमापन्नानि, पुनः वर्षासु मृदः सकाशात् स्थूलरूपेणाविर्भवन्ति। तथा स्थावरजङ्गमलक्षणं जगत् प्रलये सूक्ष्मरूपेण लीनं स्वर्गादाविर्भवतीति मण्डूकमृदुदाहरणेन निरूपयन्ति श्री वाचस्पतिमिश्राः।

**भामतीकाराणामभिप्राय:**

यथा वावर्षापाये प्राप्तमृदुभावानि मण्डूकशरीराणि तद्वासनावासिततया घनाघनासारसुहितानि पुनर्मण्डूकदेहभावमनुभवन्ति। तथा पूर्ववासनावशात् पूर्वसमाननामरूपाण्युत्पद्यन्ते। इयं चैतन्यविषयिणी चैतन्याश्रिता चेति तद्बलात् भूतजातं स्वस्मिन् संहरति, विसृजति च। अत: सांख्योक्तत्रिगुणात्मकप्रकृतेर्विलक्षणेयं त्रिगुणात्मिका माया।

**अस्य सत्त्वमसत्त्वं च जगतो दर्शयत्यसौ।**
**प्रसारणाच्च सङ्कोचाद्यथा चित्रपटस्तथा।।**[७]

**सर्वज्ञात्मश्रीचरणानामभिप्राय:**

**आच्छाद्य विक्षिपति संस्फुरदात्मरूपं**
**जीवेश्वरत्वजगदाकृतिभिर्मृषैव।**
**अज्ञानमावरणविभ्रमशक्तियोगात्**
**आत्मत्वमात्रविषयाश्रयताबलेन।।**[८]

आत्मत्वं - सदण्डैकचैतन्यं, तन्मात्रमेव आश्रयो विषयश्च यस्य तस्य भाव: सत्ता। तद्बलेनेत्यर्थ:। अज्ञानस्य हि आत्माश्रयविषयत्वमेव परकीयप्रधानाद् बलं शक्तिद्वयश्रुत्या प्रयोजकं, न तु स्वत: इति प्रधानाद्विलक्षणमित्यर्थ: इति श्रीमधुसूदनश्रीचरणानां टीका।

चैतन्यप्रतिबिम्बवती चेयं माया जीवमीश्वरं च विभागेन कल्पयति। **"माया चाविद्या च स्वयमेव भवति, जीवेशावभासेन करोति"**[९] इति तापनीयश्रुति:। जीव:, ईश्वर:, प्रपञ्च इति विभागशून्ये शुद्धे चैतन्ये अध्यस्ता अनादिनी माया सत्त्वगुणप्राधान्येन, स्वच्छदर्पण: मुखस्य प्रतिबिम्बमिव, चैतन्यस्य प्रतिबिम्बं गृह्णाति। प्रतिबिम्बो जीव:। बिम्बभूत: ईश्वर:। बिम्बप्रतिबिम्बानुगतं चैतन्यं साक्षीत्युच्यते। तेनैव माया तत्कार्यं च प्रकाश्यते। मायाम् अन्त:करणेषु च चित: प्रतिबिम्ब: नाचेतन:। प्रतिबिम्बो नाम न बिम्बातिरिक्त: पदार्थ:। स च परिच्छिन्न: इन्द्रियादिना स्वसम्बद्धं कञ्चिदेव जानातीति

किञ्चिज्ज्ञा भवति। **“तस्मान्मायी सृजते विश्वमेतत्, तस्मान्मायी सृजते विश्वमेतत्, तस्मिंश्चान्यो मायया संनिरुद्धः”**[१०] इति श्वेताश्वतरश्रुतिः ब्रूते।

**अस्वतन्त्रता हि माया स्यादप्रतीतेर्विना चितिम्।**
**स्वतन्त्राऽपि तथैव स्यादसङ्गस्यान्यथा कृतेः।।**[११]

माया चेयं न परमार्थसती। क्षरं प्रधानममृताक्षरो हरः इति श्रुतौ प्रधानशब्दोदित-मायायाः ब्रह्मतत्त्वज्ञानबाध्यत्वरूपस्य क्षरत्वस्य बोधनेन अबाध्यत्वरूपसत्त्वायोगात्। नापि शशशृङ्गादिवदसती निःस्वरूपा। प्रत्यक्षप्रतीतिविषयत्वात्। नापि सदसती, सत्त्वासत्त्वयोर्विरुद्धयोरेकत्रासमावेशात्। अतः सदसद्विलक्षणा अनिर्वचनीया मिथ्याभूतैव।

**भागवते मायास्वरूपम्**

**ऋतेऽर्थे यत्प्रतीयेन न प्रतीयेन चात्मनि।**
**यद्विद्यादात्मनो मायां यथाऽभासो यथा तमः।।**[१२]

भागवतस्मृतिश्च मिथ्यात्वमेव मायापदप्रवृत्तिनिमित्तमाह - अर्थमृते अर्थं विना अर्थाभाववति यत् प्रतीयते, तत् माया विद्यात्। स्वाभाववति प्रतीयमानं मायापदार्थं जानीयात्। स्वप्रकारकप्रतीतिविशेष्ये विद्यमानाभावप्रतियोगित्वं मायात्वमित्युक्तं भवति।

**बृहन्नारदीये मायास्वरूपम्**

**नासद्रूपा न सद्रूपा माया नैवोभयात्मिका।**
**अनिर्वाच्या ततो ज्ञेया मिथ्याभूता सनातनी।।**[१३]

इति बृहन्नारदीयपुराणवचनं मायायाः सदसद्विलक्षणत्वमनिर्वचनीयत्वं बोधयति।

**उपनिषदि मायास्वरूपम्**

**विद्यां चाविद्यां च यस्तद्वेदोभयं सह।**
**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।।**[१४]

श्रवणादिकम् अनुष्ठितवत: परमेश्वरप्रसादाज्जाता अहं ब्रह्मास्मीति साक्षात्कारवती ब्रह्मविद्या स्वसमानविषयकाविद्यां बन्धकारणीभूतां मायां निवर्तयति, ज्ञानेन स्वस्मानविषयकाज्ञाननाशस्य सर्वानुभवसिद्धत्वात्। मायाया अपाये तन्निबन्धनबन्धस्यापायो भवति।

**सवितर्यपि शीतरुचौ चन्द्रे तीक्ष्णेऽप्यधोवहत्यग्नौ।**

**मायिकमिति जानन् जीवन्मुक्तौ न विस्मयी भवति।।**[१५] इति।

**उपसंहार:**

वस्तुतस्तु अविद्योच्छेदोपलक्षित: पूर्णानन्दरूप आत्मा मोक्ष:। साक्षात्क्रियमाण आनन्द: पुरुषार्थ:। तत्त्वं च न वृत्तिविषयत्वं, किन्तु अनावृतत्वम्। मुक्तात्मनि स्वप्रकाशे पूर्णानन्दे विश्वमाया निवृत्त्या आवरणसामान्याभावसत्त्वेन पुरुषार्थता अक्षुण्णैवेति, तादृगानन्दात्मरूपाविद्योच्छेदेऽपि पुरुषार्थता अव्याहुतेति सर्वं सुस्थम्।

एवं भासमानं प्रपञ्चं मिथ्यात्वेनानुसन्दधान: प्रारब्धकर्मणां क्षये अन्ते वेदान्तवाक्यजन्यचरमसाक्षात्कारेण सूक्ष्मावस्थारूपस्याविद्यालेशस्यापि निवृत्ते: सर्वमायानिवृत्ति: भवति। मायाया: सर्वथा निवृत्ते: किमपि कार्यं न जायते। प्राणा: अत्रैव समवनीयन्ते। स च विदेहकैवल्यभाक् भवति।

एवं मायाया: स्वरूपम् अद्वैतवेदान्तदृष्ट्या विभिन्नाचार्याणामभिप्रायान् स्वीकृत्य प्रदर्शितम्।

## सन्दर्भा:

१. श्वेताश्वतरोपनिषद्.२.१५

२. भगवद्गीता.५.२६

३. भगवद्गीता.७.३०

४. ब्रह्मसूत्रम्.१.४.२७

५. भगवद्गीता.१३.१६

६. पञ्चदशी, चित्रदीपप्रकरणम्.१६

७. पञ्चदशी. चित्रदीपप्रकरणम्.३१

८. संक्षेपशारीरकम्.२०

९. तापनीयश्रुतिः.१२

१०. श्वेताश्वतरश्रुतिः.२१

११. पञ्चदशी, चित्रदीपप्रकरणम्.३२

१२. भागवतम्.३.२५

१३. बृहन्नारदीयम्.१.१५

१४. बृहदारण्यकम्.१६

१५. आत्मविद्याविलासम्.१९

## सन्दर्भग्रन्थसूची


१. पञ्चदशी- रमाकान्तशुक्ला, न्यू भारतीय बुक् कार्पोरेशन्, नवदेहली, २००३

२. संक्षेपशारीरिकम् - उदासीनसंस्कृतविद्यालयः, वाराणसी, २००४

३. श्रीमद्भगवद्गीता - शङ्करानन्दीयव्याख्योपेता, अच्युतग्रन्थमाला, वाराणसी, २००३

४. उपनिषद्भाष्यम् - महेष् रिसेर्च् इन्स्टिटच्यूट्, वाराणसी, १९७७

ISSN: 2231-0452

# सिद्धान्तशिखामण्यनुसारेण जीवस्वरूपविचारः

*प्रभय्या स्वामी*
*(शोधच्छात्रः, अद्वैतवेदान्तविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

तत्र भेदाभेदयोः समन्वयात्मके वीरशैवसिद्धान्तप्रतिपादके सिद्धान्तशिखामणिग्रन्थेऽपि शरीरेन्द्रियमनोबुद्धिभ्यो व्यतिरिक्त एव जीवात्मेति स्वीक्रियते। तदुक्तं भगवत्पादैः रेणुकाचार्यैः —

**नेन्द्रियाणां न देहस्य न बुद्धेरात्मता भवेत् ।**
**अहंप्रत्ययवेद्यत्वादनुभूतस्मृतेरपि ।।**
**शरीरेन्द्रियबुद्धिभ्यो व्यतिरिक्तः सनातनः** [१]। इति ।

नन्वयं जीवः किंस्वरूप इति जिज्ञासायामुक्तम् -

**एक एव शिवः साक्षाच्चिदानन्दमयो विभुः ।**
**निर्विकल्पो निराकारो निर्गुणो निष्प्रपञ्चकः ।**
**अनाद्यविद्यासम्बन्धात् तदंशो जीवनामकः** [२] ।। इति ।

अस्यायमर्थः – अकुण्ठितेच्छाद्यनेककल्याणगुणगणपूर्णः परशिव एव स्वविमर्शशक्त्यंशभूतानाद्यविद्यासम्बन्धात् 'जीवः' इत्यभिधानवान् भवति तदेवमत्र दर्शने परशिवस्यांश एव जीव इति प्रतिपादितं भवति । अंशत्वं नाम अनाविष्कृताखिलशक्तिमत्त्वम् । अत एवायं जीवः सर्वकर्तृत्व-सर्वज्ञत्व-परिपूर्णत्व-नित्यत्व-व्यापकत्वरूपपरशिवशक्तिरूपसंकोचकला-विद्या-राग-कालनियतिरूप-पञ्चकञ्चुकैरावृतः किञ्चित्कर्तृत्वकिञ्चिज्ज्ञत्वापूर्णत्वानित्यत्वाव्यापकत्वधर्मकः सन् स्वकर्मानुसारेण संसारे परिभ्रमति । तदुक्तम् -

**किञ्चित्कर्ता च किञ्चिज्ज्ञो बद्धोऽनादिशरीरवान् ।।**
**अविद्यामोहिता जीवा ब्रह्मैक्यज्ञानवर्जिताः ।**
**परिभ्रमन्ति संसारे निजकर्मानुसारतः ।।**
**देवतिर्यङ्मनुष्यादिनानायोनिविभेदतः** [३] । इति ।

अत एवात्र दर्शने जीवस्यांशत्वापादकेऽज्ञाने नञो न ज्ञानविरोधि भावरूपाज्ञानमित्यर्थः, किन्तु ईषद् ज्ञानमज्ञानम् ,अर्थात् संकुचितज्ञानमित्यर्थः । अत एवात्र न प्रतिषेधार्थको नञ, अपि तु पर्युदासार्थकः। मुक्तौ तु ज्ञानादेः, सङ्कोचकारणीभूतानामाणवादिमलत्रयाणां निवृत्तौ सत्यां तस्य ज्ञानादिशक्तीनां पुनर्विकासो भवति। तदुक्तम् —

**जीवत्वं दुःखसर्वस्वं तदिदं मलकल्पितम् ।**
**निरस्यते गुरोर्बोधाद् ज्ञानशक्तिः प्रकाशते** [४] ।। इति ।

वृत्तिकारैः शङ्करशास्त्रिमाहाभागैरपि –"अस्मन्मते शिवजीवयोर्भेदस्य मिथ्या ज्ञानकृतत्वात् शिवशक्तिस्वातन्त्र्यपरिकल्पितसङ्कोचकृतत्वात् तयोरभेदस्य विकसितस्वशक्तिदशायामुपपन्नत्वात् कूर्माङ्गभङ्गि अहिकुण्डलस्वर्णकुण्डलन्यायादिभिः स्वरूपस्यैव स्वेच्छया सङ्कोचः स्वरूपस्यैवाविर्भावः"[५] इत्युक्तम्, सङ्कुचितशक्तिकस्य शिवस्यैव जीवत्वमिति, पुनः शक्तिविकासे तस्यैव शिवत्वमिति च समर्थितम्।

**जीवात्मनोऽणुरूपत्वम्**

**वालाग्रशतभागस्य शतधा कल्पितस्य च ।**
**भागो जीवः स विज्ञेयः स चानन्त्याय कल्प्यते** [६] ।।

इति श्रुत्यनुसारेण वीरशैवदर्शने जीवस्याणुपरिमाणत्वं स्वीक्रियते ।
तदुक्तम् —

**वालाग्रशतभागेन सदृशो हृदयस्थितः ।**
**अश्नन् कर्मफलं सर्वमात्मा स्फुरति दीपवत् ।।**

**आत्मापि सर्वभूतानामन्तःकरणमाश्रितः ।**
**अणुभूतो मलासङ्गादादिकर्मनियन्त्रितः** [७] ।। इति ।

आणवमलेनावृतत्वादेव जीवः स्वस्य परिपूर्णाभावं विस्मृत्याणुतामापद्यते । जीवस्य मलावृतस्वरूपत्वं नीलकण्ठशिवाचार्यैरप्युक्तम् – "तत्र स्थूलचिदचिद्रूपशक्ति विशिष्टत्वं जीवात्मनो लक्षणम् । स्थूलत्वं च मलत्रयविशिष्टत्वम् । वैशिष्ट्यं चापृथग्भावसम्बन्धेन। एतन्मलत्रयरूपशक्तिविशिष्टो जीवः संसारीति निगद्यते "[८] इति।

**यथा सुदीप्तात् पावकाद् विस्फुलिङ्गाःसहस्रशः प्रभवन्ते सरूपाः ।**
**तथाक्षराद् विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्ति** [९] ।।

इति श्रुत्युक्त्यनुसारेण यथाऽग्निविस्फुलिङ्गयोरंशांशिभावः, तथा जीवपरमात्मनो-रप्यंशांशिभावोऽङ्गीक्रियते । अत एवोक्तम् –

**निर्विकल्पो निराकारो निर्गुणो निष्प्रपञ्चकः ।**
**अनाद्यविद्यासम्बन्धात् तदंशो जीवनामकः** [१०] ।। इति ।

शिवगीतायामपि —

**सत्यज्ञानात्मकोऽनन्तो विभुरात्मा महेश्वरः ।**
**तस्यैवांशो जीवलोके हृदये प्राणिनां स्थितः ।।**
**विस्फुलिङ्गा यथा वह्नौ जायन्ते काष्ठयोगतः ।**
**अनादिकर्मसम्बद्धास्तद्वदंशा महेशितुः ।।**
**अनादिवासनायुक्ताः क्षेत्रज्ञा इति ते स्मृताः** [११] ।

इति महर्षिणागस्त्येन श्रीरामं प्रति जीवस्य परशिवांशत्वमेवोपदिष्टम्। मायिदेवेनापि – "आत्मायं केवलः शुद्धः शिवस्यांशः सदामलः"[१२] इति जीवस्य शिवांशत्वं प्रति-पादितम् । तथा सत्येव साधारणासाधारणधर्माभ्यां तयोर्भेदाभेदौ प्रसिद्ध्यतः ।

**जीवपरमात्मनोरङ्गाङ्गिभावः**

जीवपरमात्मनोरयमंशांशिभावो न ह्यौपाधिकः, किन्त्वाङ्गाङ्गिरूपो वास्तविकः। अत एवात्र सिद्धान्ते जीवः **'अङ्गम्'** इति कथ्यते ।

तदुक्तं मायिदेवेन –

**अनाद्यन्तमजं लिङ्गं तत्परं परमं प्रति ।**
**यद् गच्छति महाभक्त्या तदङ्गमिति निश्चितम् ।।**
**अं भवेत् परमं ब्रह्म तद्गतं तत्परायणम् ।**
**अङ्गस्थलमिति प्राहुरङ्गतत्त्वविशारदाः** [१३]।। इति ।

श्रीनीलकण्ठशिवाचार्याः –"अङ्गपदस्य रूढिशक्त्या शरीरवाचित्वेऽपि यस्य चात्मा शरीरम् .... यस्य चाव्यक्तं शरीरम्" इत्यन्तर्यामिब्राह्मणेन पृथिव्यादि-जीवात्मपर्यन्तस्य सकलस्य वस्तुजातस्य परशिवशरीरत्वबोधनाद् जीवस्याप्य-ङ्गपदवाच्यत्वे न काप्यनुपपत्तिः"[१४] इत्यङ्गपदस्य जीववाचकत्वं समर्थितवन्तः ।

**पत्रशाखादिरूपेण यथा तिष्ठति पादपः ।**
**तथा भूम्यादिरूपेण शिव एको विराजते** [१५] ।।

इति भगवत्पादैः रेणुकाचार्यैः परशिव एव स्थावरजङ्गमरूपेण वर्तते इति प्रतिपादितम्। तत्र परशिवस्य धृतशक्त्या धरणिः, करुणया जलम्, उज्ज्वलतया तेजः, परमानन्दस्पन्देन वायुः, चिद्व्याप्त्या व्योम, चितिसङ्कोचचित्तविशिष्टो जीव इति मरितोण्टदार्यैः शिवः स्वकीयभिन्नभिन्नशक्त्या भूम्यादिरूपेण परिणामं प्राप्य चितिसङ्कोचभूतचित्तविशिष्टत्वेन जीवोऽभूदिति प्रतिपादितम्[१६]। तस्माद्यथा वृक्षशाखादिष्ववयवावयविभावस्तथा जगज्जीवपरमात्मनोरप्यवयवावयविभावः ।

**मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।**
**तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्** [१७]।।

इति श्रुतिं प्रमाणयद्भिर्भगवत्पादैः श्रीपतिपण्डिताराध्यैरपि – **"तस्मान्मायिनः परशिवावयवलेशः पुरुषो जीवः"**[१८] इति जीवस्य परशिवावयवत्वं प्रतिपादितम्। तस्माज्जीवपरमात्मनोरवयवावयविभावरूपोंऽशांशिभावः।

ननु परशिवस्य निरवयवत्वात् कथं जीवपरमात्मनोरवयवावयविरूपोंऽशांशिभाव इति चेन्न , तस्यास्मदादेरिव प्राकृतावयवाऽभावेऽपि –

**सर्वज्ञता तृप्तिरनादिबोध: स्वतन्त्रता नित्यमलुप्तशक्ति: ।**
**अनन्तशक्तिश्च विभोर्विधिज्ञा: षडाहुरङ्गानि महेश्वरस्य ।।** [१९]

इत्यादिप्रमाणेन विलक्षणनित्याङ्गसद्भावेन दोषाभावात् । यथा न्यायमते 'पञ्चावयव-वाक्यं न्याय:' इति न्यायलक्षणस्य निरवयवे शब्दे गुणरूपे द्रव्यत्वव्याप्यस्यावयवत्वस्य द्रव्यत्वाभाववति नितरामभावेन लक्षणस्यासंभवित्वापत्तौ अधिनत्वलक्षणमवयवत्वम् आरोपितं वा स्वीकृत्य दोषनिरास: क्रियते, तथैव प्रकृतेऽपि परिदर्शित: निष्पक्षपात: पन्था: परिद्रष्टव्य: । जीवस्य परशिवांशत्वे — **"तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् "**[२०], **"अंशो नानाव्यपदेशात्"**[२१] **"ममैवांशो जीवलोके जीवभूत:सनातन:"**[२२] इत्यादिश्रुतिसूत्रस्मृतिवचनानि प्रमाणान्यवगन्तव्यानि ।

नन्वेवं जीवस्येश्वराङ्गत्वे स्वीकृते भक्षितेऽपि लशुने न शान्तो व्यधि: इत्याभाणकानुसारेण यथा हस्ताद्यवयवगतव्रणादिजन्यदु:खेन देवदत्तस्य दु:खित्वं दृश्यते, तथा परशिवांशस्याङ्गस्य वा जीवस्य सुखित्वे दु:खित्वे च तदंशिन: परशिवस्य सुखित्वदु:खित्वप्रसङ्ग: ? इति चेन्मैवम्, दुखमोहादिनामाणवादिमलकार्यत्वात्। तदुक्तं रेणुकभगत्पादै: — **"जीवत्वं दु:खसर्वस्वं तदिदंमलकल्पितम्"**[२३] इति। अस्यायं भाव: – परशिवस्येच्छाशक्तिसंकोच आणवमल:, ज्ञानशक्तिसंकोचो मायीयमल:, क्रियाशक्तिसंकोचश्च कार्ममल इति व्यवह्रियते। तत्राणवमलो जीवेऽणुतामापाद्य परमात्मनोऽस्य भेदबुद्धिं कल्पयति । कार्ममलो जीवस्य पुण्यपापकर्मसम्पादनेन हेतुर्भवति। मायीयमलश्च पत्नीपुत्रादिषु ममतामभिजनयति। एतन्मलत्रयावृत: परमात्मचैतन्यैकदेश एव जीव:। यथा हि शिव: सहजतयेच्छा-ज्ञानक्रियाशक्तिविशिष्ट:, तथा जीवस्तत्संकोच-भूतैराणव-मायीय-कार्मलै: सहजतया आवृतो वर्तते । तदेवं सुखदु:खादीनां मलकार्यत्वात्, मलानां च जीवे विद्यमानत्वात्, परमात्मनि तदत्यन्ताभावाच्च जीवस्यैव सुखदु:खसाक्षात्कार: [२४] । तदुक्तं

श्रीपतिपण्डिताराध्यैः— **अनादिस्वाभाविकमायापाशबद्ध- घोरापारनिस्सार-संसारव्यापारतापत्रयानलदन्दह्यमाननाशरीरप्रवेशनिर्गम नवर्णाश्रमाभिमान-विशिष्टकामक्रोधाद्यनुस्यूत-सुखदुःखाद्याश्रयत्वं जीवत्वम्**[२५] इति।

तस्मात् '**अयं सुखी** ' '**अयं दुःखी** ' इति व्यवहारदर्शनात् सुखदुःखादिमत्वं जीवात्मनस्तटस्थलक्षणं भवितुमर्हति, 'शाखाग्रे चन्द्रः' इत्यादिवत् सुखदुखादीनां ताटस्थ्येन जीवलक्षणत्वात् । सुखदुःखादयो हि जीवस्य तत्तत्सामग्रीसमवधानदशायां तत्तच्छरीरादिसम्बन्धेन पर्यवस्यन्ति, सुखदुःखादिनिष्ठोपभोग्यतानिरूपितोपभोक्तृत्वस्य तत्तत्सामग्रीसमवधानदशायां शरीरादिसम्बन्धेन जीव एव सत्तवात् । अतः सुखदुःखा- दिविषयेषु भोज्यत्वम् , जीवस्य भोक्तृत्वं च सर्वजनीनम्[२६] । "**एतेषाम देहिनां साक्षी प्रेरकः परमेश्वरः**"[२७] इति रेणुकभगवत्पादैरपीश्वरस्य जीवानां प्रेरकत्वमुक्तम्, न तु तत्सुखदुःखभोक्तृत्वम् ।

**ईश्वरस्याभोक्तृत्वं च**

**द्वा सुपर्णा सयुजा सखाया समानं वृक्ष परिषस्वजाते ।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति** [२८]।।

इति श्रुत्यापि प्रतिपादितम् । अस्य विस्तारः श्रीकरभाष्ये [२९] द्रष्टव्यः ।

श्रीविद्यारण्यस्वामिभिरपि – यथा पितृजन्या कन्या भर्तुर्भोग्या, न पितुरिति सदृष्टान्तमीश्वरस्य जगत्कर्तृत्वेऽपि न तस्य भोक्तृत्वम्, भोक्तृत्वं तु जीवस्यैवेति प्रतिपाजदितम् । तथाहि –

**ईशकार्यं जीवभोग्यं जगद् द्वाभ्यां समन्वितम् ।**
**पितृजन्या भर्तृभोग्या यथा योषित्तथेष्यताम्** [३०] ।। इति ।

अत एव –"**सुख्यहं चेति एवाभिमन्यते** "[३१] इत्येवं श्रीराममुपदिशता महर्षिणाऽगस्तेन सुखदुःखभागित्वं जीवस्यैवेति समुद्घोषितम् ।

**जीवात्मनो बहुत्वम्**

जीवात्मनो विभुत्वे प्रतिशरीरं सर्वात्मस्थित्या भोगसांकर्यापत्तिरिति वीरशैवदर्शने जीवस्याणुत्वं स्वीकृतम । अणुत्वादेव तस्य नित्यत्वमपि सिद्ध्यतीति कृतप्रणाशा-

कृताभ्यागमदोषशङ्कापि कर्तुं न शक्यते । अत्र जीवोपाधिभूताया अविद्याया अशांनामानन्त्याद् जीवानामप्यानन्त्यम् । तदुक्तं भगवत्पादैः रेणुकाचार्यैः – **"अविद्याशक्तिभेदेन जीवाः बहुविधाः स्मृताः"**[३२] इति ।

भगवत्पादैः श्रीपतिपण्डिताराध्यैरपि लोके प्रतीयमानस्य केषाञ्चिद् दारिद्रस्य केषाञ्चिदैश्वर्यस्य च व्यवस्थार्थं जीवानामणुत्वं बहुत्वं चाङ्गीकर्तव्यमिति प्रतिपादितम्। तथाहि – **" किञ्चाद्वैतमते जीवानां विभुत्वेन सर्वेषां प्रतिबिम्बभूतस्वशरीरेषु विद्यमानत्वाददृष्टानियमात्, अदृष्टानां पुण्यपापानामनियमाद् नियमाभावात् केषाञ्चिद् दारिद्र्यं केषाञ्चिदैश्वैर्यमिति व्यवस्था न स्यात् । तस्माज्जीवानामणुत्वं बहुत्वं प्रतिशरीरं स्वाभाविकं भिन्नत्वं चाङ्गकर्तव्यम् "**[३३] इति ।

नन्वेवं परमात्मनो जीवाभावापत्तिः किमर्थमिति चेत्, लीलार्थमित्यभ्युपगम्यते। तदुक्तंभगवत्पादै रेणुकाचार्यैः –

**अस्वतन्त्राश्च किञ्चिदज्ञाः किञ्चित्कर्तृत्वहेतवः ।**
**लीलाभाजनतां प्राप्ताः शिवस्य परमात्मनः** [३४] ।। इति ।

यथा लोके सर्वैश्वर्य-शौर्य-धैर्य-वीर्य-पराक्रमधुर्यस्य सप्तद्वीपपरिवृत सर्वमण्डलाधिश्वरस्य महाराजस्य कदाचिद्विलासेन कार्यारम्भकत्वम्, कदाचित्तूष्णीभूताव-स्थानत्वं दृश्यते, तथा परशिवस्यापि कदाचिल्लीलावस्था कदाचिच्च केवलावस्थेति निर्णीयते । **" स वै नैव रेसे तस्मादेकाकी न रमते स द्वितीयमैच्छत् "**[३५] इति श्रुत्यनुसारेण यदा हि स रन्तुामिच्छति तदाऽखण्डरसास्वादपरिबृंहितोऽपि पूज्यपूजकरूपेण क्रीडार्थं खण्डरसास्वादार्थं चाज्ञानकर्मयोगेन, अर्थात् स्वातन्त्र्यपरिकल्पिताणवादि-मलसम्बमन्धेन घृतकाटिन्यन्यायेनांशतः शरीरी भवति[३६]। तदुक्तं रेणुकभगवत्पादैः—

**न चास्ति देहसम्बन्धो निर्देहस्य स्वभावतः ।**
**अज्ञानकर्मयोगेन देहि भवति भुक्तये** [३७] ।। इति ।

ननु जीवस्याणुत्वे तस्य शरीरैकदेशस्थित्य पादे मे वेदना, शिरसि मे सुखमिति सर्वाङ्गीणचैतन्योपलब्धिः कथमिति चेन्न, प्रदीपादिवत् तदुपपत्तेः। तदुक्तं

रेणुकभगवत्पादाचार्यैः—

**वालाग्रशतभागेन सदृशो हृदयस्थितः ।**
**अश्नन् कर्मफलं सर्वमात्मा स्फुरति दीपवत्** [३८] ।। इति ।

भगवता बादरायणेनापि –**"अविरोधश्चन्दनवत्"**[३९] **"गुणाद्वाऽऽलोकवत्"**[४०] इति सूत्राभ्यां चन्दनालोकदृष्टान्ताभ्यामात्मनोऽणुत्वेऽपि स्वज्ञानप्रभया शरीरव्यापित्वं तस्य समर्थितम्।

अत्रायं भावः – यथा चन्दनस्यैकदेशस्थितस्य सकलशरीरशैत्यजलकत्वम्, तथा क्षेत्रज्ञस्यैकस्मिन् प्रदेशे स्थितस्यापि सर्वाङ्गसुखदुःखभोक्तृत्वमुपपन्नम् । यथा वा लोके मणिप्रदीपप्रभृतीनामेकदेशवर्तिनामपि तत्प्रभायाः सर्वदेशवर्तित्वम्, तथाऽणुरप्यत्मा स्वज्ञानप्रभया शरीरं व्याप्य तिष्ठति । ननु कथं गुणो गुणिव्यतिरेकेणान्यत्र वर्तेते, नहि पटस्य शुक्लो गुणः पटव्यतिरेकेणान्यत्र वर्तमानो दृश्यते ? इति चेन्मैवम्, शुक्लादिगुणानां स्वद्रव्यव्यतिरेकेणानुपलभ्यमानत्वेऽपि गन्धप्रकाशयोस्तत्सम्भवात्। नहि रसो गुणो जिह्वयोपलभ्यत इति रूपादयोऽपि गुण जिह्वयैवोपलभ्येरन्निति नियन्तुं शक्यते । फलबलकल्प्यस्य स्वाभाव एव शरणमिति लोकानुभवेन प्रदीपप्रभावद् ज्ञानप्रभायाः शरीरव्याप्यत्वेन स्वीकारे न कोऽपि दोषः। यथा पृतिव्या गन्धस्य गुणत्वेनोपलभ्यमानस्य ततो व्यतिरेकः, तथा जानामीति ज्ञातृगुणत्वेन प्रतीयमानस्य ज्ञानस्याप्यात्मनो व्यतिरेकसिद्धिः। **"आलोमभ्य आनखेभ्यः"**[४१]**,"प्रज्ञया शरीरं समारूह्य शरीरेण सुखदुःखे आप्नोति"**[४२] **इत्यादिश्रुतयो जीवात्मनश्चैतन्यगुणेन समस्तशरीव्यापित्वं दर्शयन्ति**[४३]**।**

**जीवपरमात्मनोर्भेदाभेदः**

तदेवं विचित्रशक्तियुक्तमायावशादगुणत्वादिप्राप्त्या जीवस्याणुत्वं स्वाभाविकमेव, न त्वौपाधिकम् । यथा विस्फुलिङ्गानामणुत्वं स्वाभाविकम्, यथा वा सरितां सरित्त्वं समुद्रादन्यत्वं च स्वाभाविकम् , तथा जीवस्याणुत्वं परशिवादन्यत्वं च स्वाभाविकमेवेति संसारदशायां जीवपरमात्मनोर्वास्तविको भेदः ।

नन्वेवं मलावृतत्वेन जीवस्य परमात्मनः पारमार्थिकभेदसिद्धौ कथं तस्य शिवाऽभिन्नत्वमिति चेत्,यदा गुरुर्वेध-मन्त्र-क्रियारूपदीक्षात्रयेणाणवादिमलत्रयाणां निवारणपूर्वकं शिवाद्वैतज्ञानमुपदिशति, तदाऽयं शुद्धो भूत्वा शिवस्वरूपो भवति । अत एव —

**पूज्यपूजकयोर्लिङ्गजीवयोर्भेदवर्जने ।**
**पूजाकर्माद्यसम्पत्तेर्लिङ्गनिष्ठाविरोधतः ।।**
**प्रेरकं शङ्करं बुद्ध्वा प्रेर्यमात्मानमेव च ।**
**भेदात् तं पूजयेन्नित्यं न चाद्वैतपरो भवेत् ।।**
**पतिः साक्षान्महादेवः पशुरेष तदाश्रयः ।**
**अनयोः स्वामिभृत्यत्वमभेदे कथमिष्यते** [४४] **।।**

इत्यादिरूपेण बद्धावस्थायां (संसारावस्थायां) शिवजीवयोः पूज्यपूजकरूपेण पतिपशुरूपेण च वास्तविकभेदाभावे लिङ्गनिष्ठाविरोधापत्तिरिति पतिरूपं परशिवं प्रेरकं मत्वा, आत्मानं च प्रेर्यमिति ज्ञात्वा पूज्यपूजकभेदभावेन तं शिवमर्चयेदिति प्रतिपाद्य,

**साक्षात्कृतं परं तत्त्वं यदा भवति बोधतः ।**
**तदाद्वैतसमापत्तिर्ज्ञानहीनस्य न क्वचित्** [४५]**।।**

इति दिशा यदा च श्रुति-गुरू-स्वानुभवबोधतः परशिवब्रह्माख्यं महालिङ्गतत्त्वं साक्षात्कृतं भवति, तदाऽद्वैतसमापत्त्या प्राक्तनस्य, वास्तविकभेदस्य निवृत्तिर्भवतीति, भगवत्पादै रेणुकाचार्यैरगस्त्यं प्रति संसारावस्थायां जीवपरमात्मनोर्वास्तविकभेद इति मुक्तावस्थायां च तयोरेव वास्तविकाभेद इति प्रतिपादितम् । उक्तं च पुनः —

**जीवत्वं दुःखसर्वस्वं तदिदं मलकल्पितम् ।**
**निरस्यते गुरोर्बोधाज्ज्ञानशक्तिः प्रकाशते** [४६]।। इति ।

तदेवमात्रावगन्तव्यम् संसारदशायां परस्परविरूद्धस्वभावयोर्जीवशिवयोर्भेदः स्वाभाविकः, युक्त्यनुभवगोचरश्च । मुक्तिदशायां तयोरेव ऐक्यप्राप्त्याऽभेदः

श्रुतिप्रमाणसिद्धः। तस्मादत्र दर्शने यथा शिवः सर्वज्ञः सर्वकर्ता सर्वशक्तिसमन्वित उपमातीतो जननमरणरहितो जगद्व्यापको नित्यश्च वर्तते, तथा तदंशो जीवोऽपि किञ्चिज्ज्ञो किञ्चित्कर्ता किञ्चिच्छक्तियुतोऽविद्यामोहितः शिवैक्यज्ञानवर्जितो बद्धश्च वर्तते । एवं चोक्तगुणवैधर्म्याद् भिन्नयोश्चित्त्वेन चाभिन्नयोरूपासनामहिम्ना मुक्तावस्थायामैक्यं संघटते। अतः संसारावस्थायां तयोर्न केवलं भेदः, नापि केवलोऽभेदश्च वक्तुं शक्यते। एवं चाभेदगर्भितो भेद एव वक्तव्यः। जीवस्य सर्वदा शिवाऽभिन्नत्वे तस्य सर्वज्ञत्वाद्यापत्तिः, सर्वदा च भिन्नत्वे घटादेरिव जडत्वापत्तिः। अतः संसारदशायामत्यन्तभेदः मुक्तावस्थायां चात्यन्ताभेदः स्वीक्रियते। तेन च जीवस्य स्वाभिन्नपरमात्मोपासनम्, तद्द्वारा क्रमशो भेदनिवृत्तिः, अन्ते परमात्मान्यैक्यरूपात्यन्ताभेदः सूपपाद इति ।

भाष्यकृद्भिः श्रीपतिपण्डिताराध्यैरप्युक्तम् –**"यथा नद्यः स्यन्दमानाः समुद्रे ह्यस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ।", "स यो ह वै तत्परमम्", "ब्रह्म वेद ब्रह्मैव भवति"** इत्यादौ निष्कलपरमशिवोपासकानां भक्तानां लिङ्गशरीरभङ्गद्वारा परमशिव-सायुज्यमुपदिश्यते।

तस्माज्जीवपरमेश्वरयोः प्राप्यप्रापकत्वेन भेदाभेदो निर्णीयते । **"परात्परं पुरुषमुपैति इत्यनेन भ्रमरकीटवत् स्वाभाविकभेदसिद्धस्य जीवस्य परशिवप्राप्त्युपदेशात् स्वकण्ठाभरणवन्नित्यब्रह्मात्मकत्वं निषिध्यते"** [४७] इति।

अत एवानादिमलावृतत्वादयं जीवो बद्धः संसारी पशुरित्यादिशब्दैर्व्यवह्रियते, तदा च गुरुदीक्षया निवृत्तमलत्रयो रागादिविवर्जितो भूत्वा मुमुक्षुर्भवति, तदाऽयं शुद्धजीव इत्युच्यते । यदा पुनः शिवाभिन्नज्ञानसम्पन्नो भवति, तदा शिखिकर्पूरवत् शिवस्वरूपो भूत्वा मुक्तजीव इति कथ्यते । तदर्थमेव भाष्यकृद्भिः श्रीपतिपण्डितारध्य-भगवत्पादैः शिवागमवचनान्युदाहृतानि । तथाहि –

**बद्धशुद्धविभेदेन जीवत्रयमिदं स्मृतम् ।**
**गुरुदीक्षाविहीनश्च शिवभक्तिविवर्जितः ।।**
**शान्त्यादिसद्गुणोपेतो मुमुक्षू रागवर्जितः ।**
**शिवाधीनः सुधी भक्तः शुद्धजीव इति स्मृतः ।।**
**शिवयोगशिवज्ञानविभवानन्दसंयुतः ।**
**प्रचण्डातपमध्यस्थशुद्धकर्पूरदीपवत् ।।**
**शिवाकारे पराकाशे कोटिसूर्यप्रकाशके ।**
**विलीनचित्तवृत्तिस्तु मुक्तजीव इति स्मृतः ।।**
**स जीवन्मुक्त इत्युक्तो रागद्वेषविवर्जितः** [४८] ।। इति ।

तस्मादस्मिन् दर्शने जीवः परमात्मनः संकुचितशक्तिविशिष्टत्वात् तदंशरूपः, अत एवाणुपरिमाणः ।अणुत्वादेव तस्य नित्यत्वं प्रतिशरीरं भिन्नत्वं च ।अस्य शिवांशत्वादेव शिवजीवयोरङ्गाङ्गिभाव इति , प्रोक्तगुणभेदाभेदाच्च तयोर्भेदाभेदौ च संभवत इति सर्वं समञ्जसम्।

## सन्दर्भाः


१. सि० शि ५।३-४, पृ० ७३
२. सि० शि० ५।३३-३४, पृ० ६३
३. सि० शि० ५।४७-४८, पृ० ७०-७१
४. सि० शि० १८।१७, पृ० १३३
५. ब्र० सू० शा० वृ० १।३।१९
६. श्वे० उ० ५।९
७. सि० शि० १८।६-७, पृ० १२९
८. शि० परि० , पृ० ६
९. मुण्ड० २।१।१
१०. सि० शि० ५।३४, पृ० ६३

११. शिवगी० २।२७-२९
१२. अनु० सू० ५।३
१३. अनु० सू० ४।२-३
१४. शि० परि०, पृ० ५९
१५. सि० शि० १०।९, पृ० १८९
१६. सि० शि० १०।९ तत्त्वप्रदीपिकाव्याख्या , पृ० १८९
१७. श्वे० उ० ४।१०
१८. ब्र० सू० श्रीकर० २।३।४१
१९. वा० पु० १२।३१
२०. श्वे० उ० ४।१०
२१. ब्र० सू० २।३।१५
२२. भ० गी० १५।७
२३. सि० शि० १८।१७, पृ० १३३
२४. श० वि० द०, पृ० १०।११
२५. ब्र० सू० श्रीकर० १।१।१, पृ० ४
२६. शि० परि०, पृ० ७
२७. सि० शि० ५।५०, पृ० ७१
२८. श्वे० उ० ४।६
२९. ब्र० सू० श्रीकर० २।३।४४
३०. पञ्च० ४।१८
३१. शि० गी० २।३५
३२. सि० शि० ५।४५, पृ० ७०
३३. ब्र० सू० श्रीकर० २।३।४८
३४. सि० शि० १८।१४, पृ० १३२
३५. बृ० उ० १।४।३

३६. ब्र० सू० श्रीकर० २।१।३३, सि० शि० १८। ११ तत्त्वप्रदीपिकाव्याख्या ।

३७. सि० शि० १८। ११, पृ० १३०

३८. सि० शि० १८।६, पृ० १२९

३९. ब्र० सू० २।३।२२

४०. ब्र० सू० २।३।२४

४१. छा० उ० ८।८।१

४२. कौषी० ३।६

४३. ब्र० सू० श्रीकर० २।३।२२-२५

४४. सि० शि० १०।१,३-४, पृ० १७८- १७९

४५. सि० शि० १०।५ , पृ० १७९

४६. सि० शि० १८।१७, पृ० १३३

४७. ब्र० सू० श्रीकर० १।३।२

४८. ब्र० सू० श्रीकर० २।३।४६

## सहायकग्रन्थसूची

१. अनुभवसूत्रम् (तन्त्रसंग्रहः,भाग१), सं०सं०वि०वि०वाराणसी १९७० ई०।

२. ईशाद्यष्टोत्तरशतोपनिषदः नि०सा०प्रेस, बम्बई १९२५ ई०।

३. ईशावास्योपनिषत् शाङ्करीव्याख्या, शङ्करविलास संस्कृत पाठशाला, मैसूर १९७६ ई०।

४. उपनिद्वाक्यमहाकोशः, गुजराती प्रिंटिंग प्रेस, बम्बई १९४० ई०।

५. पञ्चदशी, भार्गव पुस्तकालय, वाराणसी १९५६ ई०।

६. बृहदारण्यकवार्तिकसारः १-२ भागः, अच्युत ग्रन्थमाला, वाराणसी १९७७-९९ वि० सं०।

७. बृहदारण्यकोपनिषत्, शाङ्करभाष्यम्, गीताप्रेस्, गोरखपुर ।

८. ब्रह्मसूत्रशाङ्करभाष्यम्, रत्नप्रभा-भामती-न्यायनिर्णयव्याख्यात्रयोपेतम्, निर्णयसागर प्रेस, बम्बई १९०९ ई०।

९. शक्तिविशिष्टाद्वैतदर्शनम्, रम्भापुरी संस्थान मठ, बालेहोन्नूर(कर्नाटक) १९६१ ई०।

१०. श्रीकरभाष्यचतुःसूत्री, जङ्गमवाडी मठ, वाराणसी १९५६ ई०।

११. शिवाद्वैतपरिभाषा, काशीनाथ ग्रन्थमाला, मैसूर १९६४ ई०।

१२. सिद्धान्तशिखामणिः, तत्त्वप्रदीपिकाख्यासहितः, भाग १-२,वीरशैवलिङ्गब्राह्मणग्रन्थमाला, सोलापुर १९०५ ई०।

१३. सिद्धान्तशिखामणिः, काशीनाथशास्त्रीकृतभावप्रकाशाख्यकन्नडव्याख्यासहिता, काशीनाथ ग्रन्थमाला, मैसूर १९७२ ई०।

१४. सिद्धान्तशिखोपनिषद्वीरशैवभाष्यम् काशीनाथ ग्रन्थमाला, मैसूर, १९३० ई०।

१५. सिद्धान्तशिखामणिः, एन्,आर्,करिबसवशास्त्रिकृतः कन्नडतात्पर्यदीपिकासहिता वीरशैवग्रन्थप्रकाशकाग्रन्थावलिः,मैसूर, १९२१ ई०।

ISSN: 2231-0452

# किरीटिवेङ्कटाचार्यैः विरचिते शृङ्गारतरङ्गिणीनाटके रसपोषणम्

*ए. चन्द्रज्योती*
*(शोधच्छात्रा, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**उपोद्घातः**

संस्कृतसारस्वतस्य सारभूते दृश्यकाव्यप्रपञ्चे दशविधरूपकेष्वपि अष्टादशोपरूपकेष्वपि सकलसहृदयरञ्जकः रसो मुख्यतमो भवति। अत एव "नाटकान्तं हि साहित्यम्, नाटकान्तं कवित्वमिति" प्रसिद्धिः। भास-कालिदास-भवभूति-विशाखदत्त-शूद्रकाः संस्कृतनाटकप्रपञ्चे सुप्रसिद्धाः विविधरसपोषकाः। तथाष्टादशशताब्दे किरीटिवेङ्कटाचार्यैः कृतः शृङ्गारतरङ्गिणीति नाटकग्रन्थः शृङ्गाररसप्रधानात्मकः। इतररसा अपि नाटकेऽस्मिन् सुष्ठु पोषिताः। शृङ्गाररसप्रधानात्मकेऽस्मिन् नाटके प्रधानाङ्गभूतानां शृङ्गारवीररौद्रबीभत्साद्भुतभयानकशान्तरसानां पोषणविषये विचारः क्रियते अस्मिन् शोधपत्रे।

**शृङ्गाररसपोषणम्**

शृङ्गाररसवर्णनात् सर्वेषामानन्दो भवतीति सर्वेषु रसेषु मुख्यतमो भवति शृङ्गाररसः। शृङ्गं = प्रधानम् इयत्ति[१] इति शृङ्गारशब्दार्थः अहोबलपण्डितीये उक्तः। उक्तः युक्त एव। ध्वनिकारः शृङ्गारस्य प्राधान्यं स्पष्टमेवं निरूपितवान्। तद्यथा -

**शृङ्गार एव मधुरः परः प्रह्लादनो रसः।**
**तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति।।**[२]
**शृङ्गारे विप्रलम्भाख्ये करुणे च प्रकर्षवत्।**
**माधुर्यमार्द्रतां याति यतस्तत्राधिकं मनः।।**[३] इति ।

शृङ्गाररसेऽपि संयोगशृङ्गारादपि वियोगशृङ्गारे माधुर्यस्य अवकाशो भवतीति ध्वनिकारस्याभिप्रायः। शृङ्गारस्य स्त्रीपुंसौ आलम्बनौ भवतः। यौवनवयोपीनोरु-

श्रेणिस्तनसौन्दर्यरूपादयः उद्दीपनविभावाः। कटाक्षवीक्षणसंस्पर्शनललितमृदुल-सङ्घर्षणादयः अनुभावाः। हर्षादयः सञ्चारिणः। स्त्रीपुंसयोः अन्योन्यालम्बनः प्रेमाख्यः चित्तवृत्तिविशेषः रतिः स्थायीभावः। स द्विविधः संयोगशृङ्गारः, वियोगशृङ्गारश्चेति। विप्रलम्भः = विश्वासः। अत एव वियोगशृङ्गारस्य विप्रलम्भशृङ्गार इति नामान्तरम्।

अत्र द्वितीयाङ्के सत्यभामाश्रीकृष्णयोः वियोगशृङ्गारः वर्णितः। रुक्मिण्यै पारिजातपुष्पं दत्त्वा सपदि सत्यभामायाः भीत्या तस्याः भवनं जगाम। सत्यभामा बहुधा उपचारं कृत्वा प्रणम्यापि कृष्णे पराङ्मुखी जाता। तत्र सत्यभामायाः वर्तनं सा कलहान्तरिता अतश्च विप्रलम्भः मानजन्यः प्रतीयते -

(गृहं प्रविश्य सविस्मयम्)

**पुरः काचित्कान्ता लसति ललने द्वे उभयतः**
**तथैवान्या धन्या कृतिरपरभागे विलसति।**
**कथं कस्या यास्याम्यहमिह सदेशं तदधुना**
**क्षणं स्थित्वा मत्वा समनुसरणीय्याद्य तरुणी।।**[४]

(प्रविश्य सत्यभामा)

**सरभसं चरणयोर्निपत्य भाषमाणान्यतो व्रजति।**

कृष्णः - कराभ्यां गृहीत्वा तल्पे उपावेश्य -

**शृङ्गराम्बुधिचन्द्रिके किमिति मामालापजालामृतै-**
**र्नैवाह्लादयसे कृतो न दयसे कोपोऽनुरूपो न ते।**
**कुन्देन्दीवरबृन्दसुन्दरकलारङ्गैरपाङ्गस्तपो**
**द्दामप्रेमरसं प्रसारय मयि प्राणप्रिये भामिनि!।।**[५]

एवं पञ्चमाङ्केऽपि मणिचूलिकानीतपर्यङ्कवृत्तान्तादारभ्य सत्यभामावर्णने संयोगशृङ्गार एव रसः। पुनश्च रुक्मिणीगृहं गते कृष्णे सत्यभामा विरहिणी चिरं दुःखिता भवति। अत्रापि विप्रलम्भशृङ्गार एव।

पञ्चमाङ्कान्ते पुनः कृष्णागमनेन संयोगशृङ्गारो वर्णितः। यथा -

कृष्णः - (सविस्मितं)

**अविरतबहुश्वासनासाविभातुमिमीलिष-**
**त्कुवलयकलापात्रे नेत्रे श्लथाब्जसखं मुखम्।**
**अभिमुखपतत्खेदोद्भेदातनुश्च सखी ततो**
**विशदयति ते क्रान्ते हन्त ध्रुवं पुरुषायितम्।।**[६]

सत्यभामा - (सलज्जम्) मुखमवनमयति।

मञ्जुभाषिणी - (उपसृत्य) अनेन पुष्पतालवृन्तनयुगलेन युवार्वीजनं इति सर्वा व्यजनोपचारं नाटयन्ति।

सत्यभामा - (स्पर्शसुखमभिनीय सरोमाञ्चम्)

**चन्दनस्यन्दनेनैवानन्दमन्दां तनुं दधत्।**
**कुन्दबृन्दव्यजनतस्स्पन्दते मन्दमारुतः।।**[७]

कृष्णः - (साञ्जलिबन्धम्)

**कलशजलधिर्न मथितो न च वासुकिना गिरिर्ग्रथितः।**
**लब्धस्तदपि सुरद्रुः प्रेम्णा तव नाथ किं परं लभ्यम्।।**[८] इति।।

**वीररसपोषणम्**

वीररसोऽपि चतुर्थे अङ्के बहुधा वर्णितः । तस्य बीजं तृतीये अङ्के एव दृष्टम्। तृतीये अङ्के विष्कम्भानन्तरं कृष्णः पुनः द्वारकामागत्य स्वदौत्यवैफल्यं निवेदयति। ततः कृष्णवाक्येषु वीरः अभिव्यक्तः। नारदः कृष्णं प्रति इन्द्रवाक्यानि अनूद्य एवं कथयति-

**गर्वदुर्विधसर्वपर्वतगरुत्पर्वालिनिर्वापणा-**
**रम्भोज्जृम्भितविक्रमक्रमयुतं दम्भोलिमम्भोजदृक्।**
**जानीते नयनस्य हो चपलता धिक् धिग्वृथा सम्भ्रमं**
**शम्भोऽयं न तु वल्लवीकुचलुठन्मल्लीमतल्लीभरः।।**[९]

ततः कृष्णः इन्द्रादिगमने उत्साहमेवं दर्शयति- सरोषोन्मेषं हुंकृत्य भगवन्महानयं महेन्द्रस्य मतिविपर्यासः। यतस्सर्वज्ञस्य भवत एव सविध एवं विकत्थितम्। तथाहि -

**देवर्षभाद्यदपवाह्य पुरा मयैव**
**गोवर्धनाय रचिता ह्युचिता सपर्या।**

**क्वाभूत्तदा कुलिशमस्य कथं न वेत्ति**
**संवर्तकाम्बुदकदर्थनमस्मदीयम्।।**[१०]
**भवतु श्व एव सर्वं प्रकटीभविता।**

वीररसस्य विस्तर: चतुर्थे अङ्के दृश्यते। रत्नशेखरशृङ्गारतिलकयो: सम्भाषणेन एष रस: व्यक्त: भवति। गरुडमहेन्द्रयोरपि सङ्ग्राम: वीररसपोषक:। विशेषत: गरुडवाक्येषु -

**गत्वा प्राक्तनपत्तणं समुदितं जित्वा भटानुद्भटान्**
**स्थित्वा द्वारि कवाटिका विघटनं कृत्वा प्रविक्ष्यामृतम्।**
**धृत्वा काञ्चनकुम्भकेन भुवि यो हत्वार्पयद्भोगिनां**
**स त्वामेष महेन्द्र केन विधिना सत्त्वाधिकं मन्यते।।**[११] इति।

यथा च पराजित: इन्द्र: क्षमां ययाचे तदा वीररस: शान्त:।

**मनो मुग्धं धिग्धिग्मम धिगभिमानं धिगखिलं**
**प्रवृत्तस्त्वं जेतुं यदहमुदहङ्कारभरित:।**
**क्व चाहं त्रैलोक्यप्रथितविभवस्त्वं क्व च हरे**
**गजं ख्यातं जेतुं मशकशिशक: किं प्रभवति।।**[१२] इति।

**रौद्ररसपोषणम्**

गुरुबन्ध्वादिपरमापराधजन्मा मन:प्रज्वलनाख्य: क्रोध: रौद्ररसस्य स्थायी भाव:। वीररसे पराक्षेपपराणि वाक्यानि अस्मिन् नाटके रौद्रस्य उदाहरणानि भवन्ति। न चात्र वीररस एव वक्तुमुचित:। तथापि एकस्मिन् रसे मुख्यतया वर्ण्यमाने अन्यो रस: अङ्गं भवति। नान्तरीयकश्च यथा वीररसे वर्णनीये रौद्र:, रौद्रे च उत्साह:, शृङ्गारे हास्य:, हास्ये च शृङ्गार:।

तृतीये अङ्के कृष्ण: पारिजातं हर्तुमागच्छतीति श्रुत्वा इन्द्र: नारदं सगर्वं कृष्ण: तत्र न प्रभवति इत्युवाच। तदानीम् इन्द्रवाक्यानि रौद्रोदाहरणानि। एतत् प्रागेव उदाहृतम् ''गर्वद्दुर्विद...'' इत्यत्र ।

प्रथमे अङ्के शठकोप इन्द्रस्य अविनयाय कुपितस्तं शशाप। तदपि रौद्रोदाहरणम्।

**लूनं प्रसूनं हरिणा यदाभू-**
**न्मौनी तदानीमतितीव्रकोपः।**
**शापं महापत्रदमाजगाद**
**शक्राय चक्रायुधतुल्यतेजाः।।**[१३]

**बीभत्सरसपोषणम्**

"**कदर्यवस्तुविलोकनजन्मा विचिकित्साख्यश्चित्तवृत्तिविशेषो जुगुप्सा**"[१४] बीभत्सरसस्य स्थायी भावः। चतुर्थे अङ्के सङ्ग्रामवर्णने वीररसाङ्गभूतः बीभत्सरसः परिपुष्टः।

रत्नशेखरः युद्धे निहतं किरातहूणसेनं वर्णयन् तेषां देहान् कङ्काः जम्बूकाश्च संकृष्य भक्षयन्ति इति वर्णयति। तत्र व्यक्तः बीभत्सरसः वीररसस्य अङ्गमेव।

**पक्ष्मावेक्षणदूरचक्षुरधिकप्रोद्यद्रदश्रेणिका**
**ग्रस्तव्यस्तविलम्बमानरसनं व्याकीर्णचूडाच्छटम्।**
**कङ्काः पङ्किलसङ्कुचद्रुधिरकं भीमं शिरोमण्डलं**
**संकृष्यालुनतेऽत्र हूणविततेरुत्कोटिभिस्त्रोटिभिः।।**[१५]

**अद्भुतरसपोषणम्**

प्रथमे अङ्के शठकोपमहर्षिणा नारायणस्य अर्चने पुष्पेभ्यः कन्याविभावः महेन्द्रप्रेषितायाः अप्सरसः गर्वभङ्गहेतुः द्रष्टुः श्रोतुर्वा विस्मयोत्पादकः भक्तिरसाङ्गभूतः अद्भुतरसस्य अभिव्यञ्जको भवति। हेमायाः विलासैः शठकोपः न जातविकारः धीरः अभूत्।

**विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः।**[१६]

ततः तपस्विनः धैर्येण जातलज्जा हेमा स्वप्रयत्नात् विरम्य प्रत्यागत्य महेन्द्रं तदद्भुतं निवेदितवती।

अहो महामुनेश्शान्तिवैभवम्, यतः -

**शृण्वतो मम विवृण्वतोऽपि तेऽनङ्गजाविकृतिरङ्गजायते।**
**कामिनीं स्वरति कामिनीमृषेः पश्यतोऽपि न हि दृश्यते रतिः।।**[१७]

ततः किं प्रतिपन्नम् -

चित्राङ्गदः - ततश्च सा तस्येन्द्रियजयात्पराभूता पुरन्दरस्य तदुदन्तं श्रावयन्ती किमप्यश्रुत-पूर्वमभाणीत्।

मदनशेखरः - किं तत्

चित्राङ्गदः - **आमन्त्र्य यत्कुसुमपञ्चकमेकमेक**
**माहृत्य चैकसमये हरये ददाति।**
**तस्मादुदेति तरुणी रमणीयरूपा**
**तल्पं च सोपकरणं मणिकङ्कणौ च।।**[१८]

तेषु च समुदितेषु भगवन्तमावाह्य तत्सर्वं तया सह भगवते समर्पयति। एवं चित्राङ्गदमदनशेखरयोः परस्परसम्भाषणेन अद्भुतरसः प्रकटितो भवति। तृतीयाङ्के विश्वावसोः श्रीमन्नारायणसाक्षात्कारोऽपि अद्भुतरसस्योदाहरणं भवति।

**शान्तरसपोषणम्**

विश्वावसोः नारायणसाक्षात्कारमभिनन्दयन् चित्राङ्गदः परमात्मनोऽप्रमेयत्वं वर्णयति। तत्र कृष्णाया भावस्य वा अदर्शनं शम एव लक्षितः।

**न्यग्रोधबीजकणिकां शतधा निकृत्य**
**तत्रायुतायुतशतैकलवं विविच्य।**
**हस्ते चिकीर्षति स यो महिमानमस्य**
**मातुं प्रवर्तत इति स्म वदन्ति वृद्धाः।।**[१९]

अत्र हेमप्रत्यनीकानन्तकल्याणगुणलक्षणस्य भगवतः अनन्तस्य मूर्तिः निर्गुणरूपेणैव वर्णिता।

यद्वा एवमणोरणीयांसमपि यः दिदृक्षति तद्वदिति सम्भावनया सम्भावनालङ्कारेण अभिव्यक्ता वासुदेवरतिः असंलक्ष्यक्रमतया अभिव्यक्तशान्तरसस्याङ्गभूता।

**भयानकरसपोषणम्**

रत्नशेखरः शृङ्गारवीरयोः सान्तर्यं चतुर्थाङ्के वर्णयन् शचीदेव्याः भयमपि वर्णितवान्।

अहो महानयं सहृदयशिवकरशृङ्गारवीरयोः सङ्करः। यतः -

**जितमधुकरश्रेणीरिहाप्सरसामहो**
**सरभसरसोत्कर्षं कर्षन्ति केचिदितो भटाः।**
**परिचितपरिहासाः वासांसिभीशिथिलान्विताऽ-**
**र्पयति तरुणीजाले चेलान्कृषन्त्यपरे भटाः।।**[२०]

एवं रूपेण भयानक रसः सम्यक् पोषितः।

**उपसंहारः**

शृङ्गाररसप्रधानेऽस्मिन् नाटके सन्दर्भानुसारं वीररौद्रबीभत्साद्भुतभयानक-शान्तरसाः अङ्गभूततया वर्णिताः। अस्य शृङ्गारतरङ्गिणीनाटकनामश्रवणेनैव ज्ञायते यदेतन्नाटकं रसराजशृङ्गाररसप्रधानमिति। अस्मिन् नामसार्थक्यं दृश्यते।

## सन्दर्भाः

१. अहोबलपण्डितीयम्, (आन्ध्रव्याकरणम्) सं.प-३

२. ध्वन्यालोकः२/ ७

३. तत्रैव २/८

४. शृङ्गारतरङ्गिणी२/४४

५. तत्रैव २/४५

६. तत्रैव ५/७५

७. तत्रैव ५/ ७६
८. तत्रैव ५/ ७७
९. तत्रैव ३/२४
१०.तत्रैव ३/२६
११. तत्रैव ४/४१
१२. तत्रैव ४/ ५१
१३. तत्रैव १/५२
१४. रसगङ्गाधरः - १
१५. शृङ्गारतरङ्गिणी ४/२२
१६.कुमारसम्भवम् १/५९
१७.शृङ्गारतरङ्गिणी१/४६
१८. तत्रैव १/४७
१९. तत्रैव ३/११
२०. तत्रैव ४/२५

## सन्दर्भसूची


१. अहोबलपण्डितीयम् - कविशिरोभूषणम्, आन्ध्ररचयितलसंघमु, आचार्यः श्री खण्डवल्लिलक्ष्मीरञ्जनम्, व्याख्यातारः - चलमचर्लरङ्गाचार्यः श्री अमरेश्वरं रामेश्वरशर्मा, अनुवादकः - श्रीशोण्टि बद्राद्रिरामशास्त्रि विद्यानगरमु, हैदराबाद, १९६५
२. ध्वन्यालोकः - आनन्दवर्धनः, चौखम्बा संस्कृतभवन, वाराणसी,१९६५
३. रसगङ्गाधरः - पण्डितराजजगन्नाथः, चौखम्बा विद्याभवन, वाराणसी, विक्रमसंवत्, २०१२
४. कुमारसम्भवम् - महाकविकालिदासः, चौखम्बा विद्याभवन, वाराणसी, २००४

ISSN: 2231-0452

# चक्रकविप्रणीतं रुक्मिणीपरिणयाख्यं महाकाव्यम्, तस्य सम्पादनञ्च

***चन्द्रावली गोस्वामी***
*(शोधच्छात्रा, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

बहवः अप्रकाशिताः अत्यपूर्वाश्च ग्रन्थाः मातृकालयेषु अद्यापि प्रकाशनपथं निरीक्षन्ते। तेषां संस्कृत्या सम्पादनेन च बहवः दुर्लभा ग्रन्था अस्माकं सम्मुखमुपयान्ति। समाजचेतनायाः साहित्यसम्भारवर्धनार्थम् आनन्दाय च अप्रकाशितग्रन्थाः प्रकाशपथमानेतव्याः। एतेन संस्कृतसाहित्यभाण्डारोऽपि पूर्णतामुपयाति। एवं सति चक्रकविना विरचितमप्रकाशितं 'रुक्मिणीपरिणयम्' इति महाकाव्यं जनसमक्षमागच्छेदिति धिया द्वादशसर्गसमन्वितं काव्यमिदं षण्मातृकाणां साहाय्येन सम्पादनमकरवम्। तासु मातृकासु द्वे मातृके देवनागरीलिप्यां, तिस्रः मातृकाः ग्रन्थलिप्याम्, एका च मलयाललिप्यां भवन्ति। चेन्नैनगरस्थ-सर्वकारीयप्राच्यमातृकाग्रन्थालयात् (G.O.M.L.) R2752 संख्यायुक्ता कर्गजपत्रलिखिता D1मातृका, R5215 संख्यायुक्ता तालपत्रलिखिता Gr1मातृका, D11715 संख्यायुक्ता तालपत्रलिखिता Gr2 मातृका, R3999 संख्यायुक्ता तालपत्रलिखिता Gr3 मातृका इति मातृकाचतुष्टयम् उपलभ्यते। केरलस्थसर्वकारीयप्राच्यशोधमातृकाग्रन्थालयात् (O.R.I)T587 संख्यायुक्ता कर्गजपत्रलिखिता D2 मातृका, 1015A संख्यायुक्ता तालपत्रलिखिता M इति मातृकाद्वयं च प्राप्यते।

उपलब्धानां मातृकाणां परिशीलनेन 1015A संख्यायुक्ता मलयालमातृका एव प्राचीनतमा आधाररूपेण स्वीकरणयोग्या च इति निरणयम्।

**मातृकास्थितिवर्णनम् -**

R5215 संख्याका मातृका असम्पूर्णा, सुन्दरैः स्पष्टैः अक्षरैश्च लिखिता वर्तते। मातृका इयं चतुर्थसर्गस्य विंशतितमश्लोकस्य तृतीयपादपर्यन्तमेव भवति। पङ्क्तिद्वये

स्थानमधिकं वर्तते। अतःकारणादक्षराणां पठनं सम्यक् ज्ञायते। प्रत्येकं श्लोके विरामानन्तरं यतिचिह्नम्, अङ्ग्लभाषायां संख्या च लिखिता वर्तते। अस्यां मातृकायां लेखकः पङ्क्तिसमाप्त्यनन्तरम् 'अनुस्वारं' स्थापयित्वा पुनः तदुपरि म् इत्यक्षरं सर्वत्र लेखयाञ्चकार। मातृकायां बहुत्र पङ्क्त्याम् अपाक्षराणि कर्तयित्वा पङ्क्त्युपरि शुद्धाक्षराणि नियोजितानि।

D11715 संख्यायुक्ता ग्रन्थलिप्या लिखिता सुन्दराक्षरसमन्विता मातृका असम्पूर्णा। पत्रं तु विस्तृतमस्ति। अत्र चतुर्थसर्गस्य विंशतितमश्लोकस्य चतुर्थपादस्य प्रथमशब्दपर्यन्तमेव पाठः दृश्यते। पाठस्तु विस्तृतः अस्ति। पङ्क्तिद्वयमध्ये स्थलमधिकं नास्ति। अत्र प्रतिपत्रं छिद्राणि, कुत्रचित् स्थलेषु कीटैः जग्धानि स्थानानि च लक्ष्यन्ते। प्रतिश्लोकसमाप्त्यानन्तरं श्लोकसंख्या दृश्यते। प्रत्येकं पत्रस्य उभयपार्श्वयोः आङ्ग्ललिप्या पत्रसंख्या लिखिता वर्तते। प्रतिपत्रम् उभयपार्श्वयोरपि लेखनं दृश्यते।

R3999 संख्याका मातृका सम्पूर्णा सुन्दराक्षरयुक्ता च ग्रन्थलिप्यां लिखिता वर्तते। मातृकायां बहुत्र कीटदंष्ट्रेभ्योऽक्षराणि लुप्तानि भाङ्क्तानि च सन्ति, विशेषतः पत्रस्य वामेतरपार्श्वे अधिकतया भञ्जनानि दृश्यन्ते। प्रत्येकं पत्रस्य उभयतोऽपि लेखनं दृश्यते। मातृकायामस्यां कीटैरजग्धस्य अभञ्जनस्य पत्रस्य सव्यपार्श्वे सव्येतरपार्श्वे वा आङ्ग्ललिप्यां पत्रसंख्या दृश्यते।

R2752 संख्यायुक्ता देवनागरीलिपिमातृका स्पष्टाक्षरसमन्विता सम्पूर्णा च। अत्र चतुर्थसर्गस्य विंशतितमश्लोकात् मातृका प्रारभते। श्लोकसमाप्त्यनन्तरं प्रत्येकं श्लोके श्लोकसंख्या दृश्यते। कुत्रचित् पङ्क्तिद्वये लेखनम्,अन्यत्र पङ्क्तिचतुष्टये वा लेखनं दृश्यते।

T587 संख्यायुक्ता मातृका देवनागरीलिप्या लिखिता सम्पूर्णा च। केवलं द्वादशसर्गस्य चतुश्चत्वारिंशत्-श्लोकस्य द्वितीयपादात् केचन श्लोका न दृश्यन्ते। श्लोकसमाप्त्यनन्तरं चतुर्थसर्गस्य त्रयोविंशतिश्लोकपर्यन्तं श्लोकसंख्या दृश्यते अनन्तरं कुत्रापि न लभ्यते। प्रत्येकं पत्रस्य वामेतरपार्श्वस्योपरि अङ्ग्ललिप्यां पत्रसंख्या दृश्यते।

1015A संख्याका मलयाललिप्या लिखिता मातृका सम्पूर्णा स्पष्टा सुन्दराक्षरयुक्ता विस्तृता चास्ति। अस्यां मातृकायां कीटैर्जग्धानि रन्ध्राणि मध्ये मध्ये सन्ति। प्रत्येकं पत्राणाम्

उभयपार्श्वतः लेखनं दृश्यते। मातृकायां श्लोकसमापनानन्तरं केवलं यतिचिह्नं दृश्यते, न तु श्लोकसंख्या। प्रत्येकं पत्रे किञ्चित् स्थानं त्यक्त्वा एव लेखनं प्रारभ्यते।

**मातृकासु दोषाः -**

सर्वासु मातृकासु प्रतिलिपिकरणवेलायां बहुविधा दोषाः दृश्यन्ते। लेखनकाले जाताः बहवः प्रान्तीयदोषा अपि अवलोक्यन्ते। एतत्कारणात् शब्देष्वक्षरपरिवर्तनं, तद्धेतुकं शब्दार्थस्य परिवर्तनं च भवति। 'रुक्मिणीपरिणयम्' इति महाकाव्यस्य पाठान्तरसङ्कलनसमये परिदृश्यमाना उच्चारणगता वा श्रवणगता वा चाक्षुषदोषाः अवलोक्यन्ते। ते यथा-

**क)** ध इत्यक्षरस्थले थ (पीतशीधु इति स्थले पीतशीथु)
प इत्यक्षरस्थले व (दीप्यति इति स्थले दीव्यति)
य इत्यक्षरस्थले ध (युता इति स्थले धुता)
शृ इत्यक्षरस्थले श्र ( शृणु इति स्थले श्रणु)
द्म इत्यक्षरस्थले त्म (पद्मपालिका इति स्थले पत्मपाळिका)

**ख)** संयुक्ताक्षरलेखन लेखकः तालपत्रे भिन्नतया लिलेख
१) 'समुज्जिधानेव' इति स्थले 'समुजिजहानेव'
२) 'समुद्दिश्य' इति स्थले 'समुददिश्य'

**ग)** प्रतिलिपिकरणसमये संजाताः चाक्षषदोषा बहुत्र अवलोक्यन्ते -
१) मलयालमातृकायां चाक्षुषदोषकारणादेव 'वितन्वतश्शैशवनाटिकां व्रजे वदामि शौरेश्चरितानि' -एतानि पदानि न दृश्यन्ते।
२) D1मातृकायां 'यद्यपि तथापि' इति स्थले 'तथापि यद्यपि' इति दृश्यते।

**घ)** Gr3 मातृकायाः लिपिकः रेफं किञ्चित् व्यत्यासेन प्रयुयुञ्ज ।
२) निर्दयं - निद। दयं
३) विनिर्जितः - विनिजि। जत

**ङ)** Gr3 M मातृकयोः रेफानन्तरं व्यञ्जनवर्मयोः द्वित्वं भवति।
१) Gr3 'विश्वकर्मा' इति स्थले 'विश्वकर्म्मा'
२) M 'मर्मणि' इति स्थले 'मर्म्मणि'

**च)** श्रवणदोषः - प्रतिलिपिकरणसमये बहुत्र 'श्रवणदोषजा दोषा ' अवलोक्यन्ते

१) Mमातृकायां 'क्षुरिकावरश्च' इति स्थले 'षुरिकावरश्च'

२) Gr3मातृकायाम् 'एव' इति स्थले 'येव'

**छ)** उच्चारणदोषः - प्रतिलिपिकरणसमये बहुत्र उच्चारणदोषेण पाठान्तराणि भवन्ति।

१) D2 Mलिप्योः 'नरस्स्वकाय' इति स्थले 'नरस्यकायं'

२) Gr3लिप्योः 'कृष्ण' इति स्थले 'कुष्ण' इति प्रयोगः दृस्यते।

**ज)** सर्वासु मातृकासु लिपिकैः वर्गपञ्चमाक्षरनियमो न परिपालित विशेषतः Gr3 Mमातृकयोः सर्वथा नानुसृतः।

१) D1 Gr3मातृकयोः 'विधुबिम्बमशङ्कि' इति स्थले 'विधुबिम्बमशंकी'

२) Mमातृकायाः 'शङ्खव्रजान्' इति स्थले 'शंखव्रजान्'

**झ)** तालपत्रमातृकायां कुत्रापि लुप्तोऽकारो न दृश्यते। देवनागरीलिपिमातृकायां कुत्रचित् नावलोक्यते।

१) Gr1 Gr2 Gr3 Mमातृकासु 'वरोऽनुरूपः' इति स्थले 'वरोनुरूपः'

२) Gr3 M मातृकयोः 'भवतोऽपि' इति स्थले 'भवतोपि'

**ञ)** मातृकासु बहुत्र सन्धिर्नियमा न परिलक्ष्यते -

१) Gr3मातृकायां 'तत्पुनर्विस्मिताजनि' इति स्थले 'तत् पुनः विस्मिताजनि'

२) Gr3 Mमातृकायां 'एवमुद्भटमुदां' इति स्थले 'एवमुत् भटमुदां'

**कवयितुः परिचयः -**

'सर्गबन्धो महाकाव्यम्' इति लक्षणमनुसृत्य बहवः कवयः सुप्रसिद्धानि महाकाव्यानि रचयाञ्चक्रुः। तेषु पण्डितप्रवरचक्रकविरचितं 'रुक्मिणीपरिणयम्' इति महाकाव्यमन्यतमं भवति। तस्य पितरौ अम्बा-लोकनाथौ इति काव्येऽस्मिन् पुष्पिकासु वर्त्तते - 'यं प्रासूत स लोकनाथसुमतिर्विद्वद्वतंसीभवत्सूक्तिश्चक्रकविं सतीजनशिरोभूषा तथाऽम्माभिधा' इति (प्रत्येकं सर्गान्ते दरीदृश्यते)। चक्रकविः वयसि भ्रात्रोः कनिष्ठः। तस्य पतञ्जलि-रामचन्द्रौ भ्रातरौ, गुरुः च आसन्। चक्रकवेः 'जानकीपरिणयम्' इति काव्यात् इदं ज्ञायते - तस्य उपनयनसंस्कारात्

परं स काव्यप्रतिभासम्पन्नो बभूव इति। साहित्यविद्यानिष्णातः स सामवेदे अतीव पारङ्गतः चक्रकविः बभूव [यत्पुत्रो भुवि वेत्ति सामनिगमं श्रीरामचन्द्रोऽखिलम् जा.परि. ८.६७]। तस्य काव्यानि पाण्ड्यवंशीयैः चेरवंशीयैश्च राजाभिः प्रशंसितानि। नीलकण्ठाध्वरिणाऽपि तस्य काव्यानि श्लाघितानि। [पाण्ड्यमहीभुजा बहुमते नव्ये तदीये महाकाव्ये जा. परि. २.७४, चेरावनीवासवश्लाघासीमनि जा. परि. ४.७०, श्रीनीलकण्ठाध्वरिश्लाघासीमनि जा.परि. ६.७६.] चित्ररत्नाकरस्य षष्ठपरिच्छेदस्य पञ्चाशत्तमस्तबकस्य द्वितीयार्धस्य विविधप्रकारकपाठविषयमवलम्ब्य टि. एस. कुप्पुस्वामीशास्त्री सिद्धान्तं चकार - चक्रकविः दीक्षितेत्युपाधिधारिणः नीलकण्ठस्य समकालिकः बभूव। अतः सम्भवतो नीलकण्ठाध्वरी नीलकण्ठदीक्षित इति एक एव, योऽप्यस्य दीक्षितस्य पौत्रः। नीलकण्ठदीक्षितः क्रीष्टीयसप्तदशशताब्दस्य प्रथमार्धे बभूव। एतद्दृष्ट्वा एव ज्ञायते चक्रकविः पृथिव्यां सप्तदशशताब्देऽवातरदिति।

**चक्रकवेरितरकाव्यानि तत्परिचयश्च -**

रुक्मिणीपरिणयमहाकाव्यं विहाय अष्टसर्गसमन्वितं जानकीपरिणयं रामायणस्य बालकाण्डमवलम्ब्य लिलेख यत्र रामस्य जन्मादि मिथिलायां तस्य विवाहम् आलोचयामास।

**द्रौपदीपरिणयम् -**

आश्वासषट्कसमन्वितं 'द्रौपदीपरिणयम्' इति चम्पूकाव्यं पञ्चानां पाण्डवानां मनोहारि चरित्रं प्रकाशयति। कविः युधिष्ठिरस्य महत्त्वं, भीमसेनस्य अभिमानयुक्तां शारीरिकीं शक्तिं, अर्जुनस्य धनुर्विद्यायाम् अतुलनीयपारदर्शित्वं, नकुलस्य मनोहरं सौन्दर्यं सहदेवस्य प्रगाढं राजनैतिकं ज्ञानञ्च स्मारयति।

शिवस्तोत्रे पञ्चमाश्वासे श्रुतिमधुराणि छन्दोबद्धचरणानि सन्ति। इदं स्तोत्रं पाठकानां मनोग्राहि। अस्य स्तोत्रस्य उच्चनादि-चूर्णिका अनुनादिदण्डकं च स्तः। अतः द्रौपदीपरिणयमिति काव्यं संस्कृतसाहित्यपिपासूनां छात्राणां जिज्ञासूनाञ्च शैक्षिकोपयुक्तिसमन्वितमस्ति।

**भागवते कृष्ण-रुक्मिणीविषयिकी कथा -**

रुक्मिणीपरिणयमिति नाम्ना प्रसिद्धं रुक्मिणीकृष्णयोः कथा विष्णुपुराणस्य चतुर्थांशे

पञ्चदशाध्याये, पञ्चमांशे षड्विंशत्यध्याये, पद्मपुराणे पञ्चपञ्चाशत्साहस्र्यां संहितायाम् उत्तरखण्डे सप्तचत्वारिंशदधिकद्विशततमादध्यायादष्टचत्वारिंशदधिकद्विशततमाध्यायपर्यन्तं, महाभारतस्य सभापर्वणि पञ्चचत्वारिंशत्तमाध्याये, महाभारतस्य हरिवंशे विष्णुपर्वणि एकोनषष्टितमाध्याये च दृश्यते। परन्तु कविः भागवतपुराणस्य दशमस्कन्धस्य उत्तरार्धे द्विपञ्चाशत्तमाऽध्यायात् चतुःपञ्चाशत्तमाऽध्यायपर्यन्तं वर्णितकथां प्रायः स्वीचकार। रुक्मिणी कृष्णस्य अष्टभार्यासु प्रसिद्धा। विदर्भाधिपतेः भीष्मकस्य पुत्री रुक्मिणी। तस्याः पञ्च भ्रातरः बभूवुः। तेषु रुक्मी प्रथमः -

"रुग्म्यग्रजो रुग्मरथो रुग्मबाहुरनन्तरः।
रुग्मकेशो रुग्ममाली रुक्मिण्येषां स्वसा सती।।"[1]

रुक्मिणी आरम्भादेव कृष्णेऽनुरक्ता। आबाल्यं तं पतिं वव्रे। कृष्णोऽपि तस्याः सौन्दर्यादिश्रवणमात्रेण तां प्रति अनुरक्तः -

"सोपश्रुत्य मुकुन्दस्य रूपवीर्य्यगुणश्रियः।
गृहागतैर्गीयमानास्तं मेने सदृशं पतिम्।।"[2]

"तां बुद्धिलक्षणौदार्य्यरूपशीलगुणाश्रयाम्।
कृष्णश्च सदृशीं भर्य्यां समुद्वोढुं मनो दधे।।"[3]

रुक्मिणी कृष्णं वरयितुं संकल्पं चकार। परन्तु भ्राता रुग्मी चैद्याय शिशुपालाय तां रुक्मिणीं परिणये दातुं मनश्चक्रे। रुक्मिणी स्थितिं चिन्तयित्वा कमपि ब्राह्मणं कृष्णस्य निकटे अप्रेषयत्। ब्राह्मणः यथायथं रुक्मिण्याः सन्देशं कृष्णं निविवेद। कृष्णोऽपि चेदिराजं शिशुपालं विजित्य रुक्मिणीम् अपहृत्य द्वारकापुरीं प्रति जगाम। प्रीतमनाः रुक्मिणीं प्राप। एषैव कथा चक्रकविना किञ्चित्परिवर्तनपुरस्सरं रुक्मिणीपरिणये आदृता।

**रुक्मिणीपरिणयस्य महाकाव्यत्वम् -**

रुक्मिणीपरिणयमहाकाव्यस्य महाकाव्यत्वं महाकाव्यलक्षणसमन्वयपूर्वकं विचार्यते।

कस्यापि काव्यस्य महाकाव्यत्वव्यवहारो वर्णनीयानामंशानां परिशीलनेन भवति, न तु केवलेन श्लोक-पद्य-संख्याबलेनैव।

अस्मिन् रुक्मिणीपरिणयाख्ये काव्ये द्वादश सर्गाः सन्ति। नायकस्तु सद्वंश्यः यदुवंशप्रसूतजगत्प्रसिद्धो धीरोदात्तगुणयुक्तो देवपुरुषः श्रीकृष्णो वर्त्तते। महाकाव्ये इतिवृत्तं पुराणेतिहासप्रसिद्धं भवेत् इति हेतोः रुक्मिणीपरिणयकाव्यमपि भागवतपुराणमनुसृत्य समारचितं भवति। अत्र शृङ्गाररसस्य प्राधान्यं वर्तते। कविः शिवपार्वत्योः स्तुत्यनन्तरं श्रीहरि-सरस्वती-वाल्मीकि-कालिदासप्रभृतीनां स्तुतीः प्ररोचनारूपेण काव्ये समुपनिबद्धवान्।

महाकाव्ये अवश्यमेव नगरं वर्णनीयम् इति हेतोः द्वारकापुरीं कविः सम्यक् वर्णयाञ्चकार-

"अस्ति प्रतीता हरिदन्तरेषु स्वस्तिप्रदा स्वस्मरणात् प्रजाभ्यः।
आरक्षिता कंसभिधा प्रहर्षद्वारक्षितिर्द्वारवती यदूनाम्।।"[४]

अत्र रात्रिकालस्य, सन्ध्याकालस्य वर्णनमपि उपलभ्यते।

**रात्रिवर्णनम् -**

"तमीषु यत्सौधतटीन्दुकान्त वारांसरैर्वर्द्धित एव शङ्के।
पतिं नदीनां वितथा कुतो वा विधूदये तस्य विजृम्भणानि।।"[५]

**सन्ध्यावर्णनम् -**

"मणिप्रभाभिर्मथितान्धकारे यन्मन्दिरे यामवतीमुखेषु।
परम्पराचार इति प्रदीपान् प्रवर्त्तयन्ति स्म पयोजनेत्राः।।"[६]

महाकाव्ये सर्गस्य अवसाने वृत्तस्य परिवर्तनं भवति। यथा प्रथमसर्गस्य प्रारम्भतः उपजातिः भवति परन्तु सर्गसमापनं शार्दूलविक्रिडितेन भवति।

अस्मिन् महाकाव्ये महाकाव्यसदृशः परिपाकभूयिष्ठः शब्दप्रयोगः, शब्दानां सारल्यम्, अर्थगाम्भीर्यम् इत्यादीनि महाकाव्यस्य सर्वाणि लक्षणानि अनुयुक्तानि वर्त्तन्ते। अतः काव्यमिदं महाकाव्यलक्षणानुसारि इति सुदृढं वक्तुं शक्यते।

## सन्दर्भाः

१) श्रीमद्भागवतम्  १०.५२.२२

२) श्रीमद्भागवतम् १०.५२.२३

३) श्रीमद्भागवतम् १०.५२.२४

४) रुक्मिणीपरिणयम् १.१८

५) रुक्मिणीपरिणयम् १.१९

६) रुक्मिणीपरिणयम् १.२०

Government Oriental Manuscript Library, Chennai (G.O.M.L)

Oriental Research Institute and Manuscript Library, Kerala (O.R.I)

ISSN: 2231-0452

# कालिदासदृशा भाग्यवादः

*जी.वीरब्रह्मम्*
*(शोधच्छात्रः, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

विश्वेऽस्मिन् विराजमाने संस्कृतवाङ्मये कविकुलगुरुः कालिदासः कमनीय-कवितायाः मूर्त्तीभूतस्वरूपः । कदाचित् कस्याञ्चन गोष्ठ्यां कवीनां गणनाप्रसङ्गे कालिदासतुल्यः कविः नास्तीति कारणेन कनिष्ठिकाधिष्ठितस्य कालिदासस्य प्रथमं स्थानं पण्डिताः प्रददुः । ततः प्रभृति अद्य यावत् रससम्भरितायाः, औचित्यशोभितायाः, ध्वनिविलसितायाः, अलङ्कारभूषितायाः, ललितमञ्जुलमनोज्ञकवितायाः, भाग्यपूर्णायाश्च अग्रताम्बूलं कालिदासस्यैव । अस्य कवेः असाधारणी रमणीयमृदुमधुरकविताशैली अनन्यसामान्या । अयं महाकविः संस्कृतभाषायाः अमूल्यमनोज्ञमणिमयस्वर्णभूषिता-भरणस्वरूपः राराजते । कालिदासस्य रमणीयकाव्यसौरभाघ्राणेन सर्वोऽपि जनः रसानन्दपारवश्यं लभते । तादृङ्महाकवेः कृतिषु भाग्यसम्बद्धाः सन्निवेशाः बहवः अस्माकं दृष्टिगोचराः ।

मया स्वीकृतशोधप्रबन्धस्य अंशः "**कालिदासकृतिषु भाग्यवादः**" इति । अंशश्रवणमात्रेण मनसि उद्भूतो भवति यत् किं नाम भाग्यम् ? कः नाम भाग्यवादः ? इति। अत्र प्रथमं भाग्यविषये विमृश्यते तावद् दिष्ट्या एव बलाबलत्वम् । प्राक् का नाम दिष्टिः ? कथं च प्रभवत्येषा जीवलोकस्य उदयास्तमयस्य, उत्कर्षापकर्षस्य, पातोत्पातस्य वा ? यदि विचारदृशा निपुणं परीक्ष्यते तर्हि न भूयात् भेदोऽनयोः । प्राक्कृतस्य कर्मण एव नामान्तरं दिष्टिरिति, दैवमिति, भाग्यमिति वा । अतः साधूच्यते "**पूर्वजन्मकृतं कर्म तद्दैवमिति कथ्यते**" इति । दिष्टिरेव साधकत्वेन बाधकत्वेन वोपतिष्ठते निखिलेषु क्रियमाणेषु कर्मसु । अतः कर्मणां सिद्धिः असिद्धिर्वा दैवाधीनेति व्यवह्रियते । प्राक्कृतफलपरिपाको नियतोऽस्ति नियतिः इति च दैवस्य नामान्तरं भवति । न च

नियतिः साम्प्रतिकैः कर्मभिः अन्यथा भवितुमर्हतीति नियतेर्नियोगोऽधृष्य इति गण्यते। अत्र दैष्टिकाः उदाहरन्ति - सूर्यचन्द्रमसौ तेजसां वरिष्ठौ नियत्यधीनत्वादेवास्तं समुपगच्छतः । विद्यां पौरुषं चाननुरुध्य लोको दैवानुरूपमेव फलमश्नुते । सुरासुर-कृतसमुद्रमन्थने समेऽपि भागे प्राप्तव्ये हरिर्लक्ष्मीं लेभे । हरस्तु हालाहलमेव । उक्तं च –

**दैवं फलति सर्वत्र न विद्या न च पौरुषम् ।**
**समुद्रमथनाल्लेभे हरिर्लक्ष्मीं हरो विषम् ।।**

**"दैवमेव परं मन्ये पौरुषं तु निरर्थकम्"** इत्याभणकात् ज्ञायते यत् भाग्यमेव वरमिति । किन्तु भासनाटकचक्रे पौरुषमेव वरमिति भीमवाक्यैः **"दैवाधीनं जगत्सर्वं मदायत्तं तु पौरुषम्"** इति ज्ञायते ।

अतः भाग्यपुरुषार्थौ द्वौ जीवनशकटचालने प्रधानौ स्तः । पौरुषमपि भाग्याधीनमिति कालिदासकाव्येषु स्पष्टमुक्तम् । अतः भाग्यनिरूपकसन्निवेशानां बहिरानयनमेव भाग्यवाद इति ।

कालिदासः स्वजन्मनैव भाग्येन लब्धपाण्डित्यः इति श्रूयते । साऽपि दत्तकथा वा स्यात् । कालिदासः जन्मना यादवः स च अजानां पालनं पोषणं कुरुते स्म। तस्य देशस्य राजपुत्री **"वसुधा"** विदुषी । मन्त्रिणः राज्ञि जातमत्सराः कालिदासं पण्डितवेषधारिणं कृत्वा राजानं प्रतार्य राजकुमारीं गोपालपरिणीतां चक्रुः । तदानीं शय्यागारे राजुपत्री गोपालं **"अस्ति कश्चित् वाग्विशेषः"** इत्युक्तवती । गोपालेन तन्नावगतं गोपालश्च भार्यया प्रोत्साहितः कालीदेवीमाराध्य पाण्डित्यं कवित्वं च लब्धवान् इति । अत एव काल्याः दासः कालिदासः। **"ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्"** (पा.सू. ६/३/६३) इति सूत्रेण ह्रस्वः । ततः भार्याकृतप्रश्ने पदत्रयं स्वकाव्यादौ कालिदासेन मङ्गलाचरणे क्रमशः प्रथमं स्वीकृतमिति । एषा कथा श्रीवेलणकर्महोदयेन रूपकरूपेण ग्रथिता । सोऽपि कविः तत्र तत्र कालिदासमनुसरन् तत्र तत्र भाग्यशब्दं प्रयुक्तवान् ।

**अस्मान् साधु विचिन्त्य गुप्तकुलजान् भूमीश्वरान् मानिनः**
**श्रेयः कार्यमवन्तिदेशजनुषां हार्यं रणं नाशनम् ।**
**श्रेष्ठं यन्ननु राजदूतवसनं नेयं न तन्निन्यतां**
**भाग्यायत्तमतः परं न सहते केनाऽपि तद्वाच्यताम् ।।[१]**

एषा कथा सत्या चेत् कालिदासः जन्मनैव भाग्यवादं विश्वसिति । निजकाव्येषु सर्वत्र भाग्ये कृतविश्वासेन कालिदासेन उक्तमिति वक्तुं प्रमाणानि लभ्यन्ते । यथा रघुवंशमहाकाव्ये प्रथमसर्गे वसिष्ठवाक्येषु । वसिष्ठः दिलीपं सन्तानप्राप्त्यर्थं कामधेनुसेवामादिष्टवान् । अत्रान्तरे नन्दिनी तत्रागता । वसिष्ठः नन्दिन्याः तदैवागमनं च दिलीपस्य भाग्यमिति मेने ।

**सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः ।**
**आराधय सपत्नीकः प्रीता कामदुघा हि सा ।।[२]**
**इति वादिनि एवास्य होतुराहुतसाधनम् ।**
**अनिन्द्या नन्दिनी नाम धेनुराववृते वनात् ।।**
**तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।**
**याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ।।**
**आदूरवर्तिनीं सिद्धिं राजन् ! विगणयात्मनः ।**
**उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ।।[३]**

एवं पञ्चमसर्गे प्रियंवदावृत्तान्ते अजप्रियंवदयोः समागमः सख्यं च दैवयोगात् अभूदिति कविः स्वयमुक्तवान् ।

**एवं तयोरध्वनि दैवयोगादासेदुषो सख्यमचिन्त्यहेतु ।**
**एको ययौ चैत्ररथप्रदेशान् सौराज्यरम्यानपरो विदर्भान् ।।[४]**

अष्टमसर्गेऽपि अजविलापे इन्दुमतीवियोगः कालकृत इति वसिष्ठवाक्यैः निरूपितः।

**मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः ।**
**क्षणमप्यवतिष्ठते श्वसन्यदि जन्तुर्न तु लाभवानसौ ।।**[५]

**कुमारसम्भवे भाग्यवादः —** कुमारसम्भवे दक्षसुता जन्मान्तरे हिमवतो भाग्येन तत्कन्यारूपेण बभूव । नारदः अपि शिवपत्नीं तां पुनः शिवपत्नी भविष्यसि इत्यादिदेश। तेनैव प्रत्ययेन सा शिवे अनुरागं चकार । एवं सामुद्रिकशास्त्रेऽपि विश्वासः भाग्यवादानुकूल एव । कुमारसम्भवेऽपि शकुनानि उपश्रुतयश्च बहवः भाग्यवादनिरूपिकाः उदाहृताः । यथा द्वितीयसर्गे तारकः –

**भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः ।**
**उपप्लवाय लोकानां धूमकेतुरिवोत्थितः ।।**[६]
**दृष्टिप्रपातं परिहृत्य तस्य कामः पुरः शुक्रमिव प्रयाणे ।**
**प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश ।।**[७]

रतिविलापेऽपि रतिः दैवयोगेनैव विधवाऽभूदिति कालिदासेनोक्तम् । यथा–

**अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता ।**
**विधिना प्रतिपादयिष्यता नववैधव्यमसह्यवेदनम् ।।**[८]

एवं रतेः जीवनधारणेऽपि अदृष्टं भूतमेव कारणमिति भाग्यवादं निरूपितवान् कालिदासः ।

**इत्थं रतेः किमपि भूतमदृश्यरूपं**
**मन्दीचकार मरणव्यवसायबुद्धिम् ।**
**तत्प्रत्ययाच्च कुसुमायुधबन्धुरेना-**
**माश्वासयत्सुचरितार्थपदैर्वचोभिः ।।**[९]

**मेघदूते भाग्यवादः —** यक्षस्य विरहः स्वापराधकृतोऽपि कुबेरजातशापोऽपि विधिवशमेव कालिदासः यक्षवाक्षु निरूपयति ।

**जातं वंशे भुवनविदिते पुष्करावर्तकानां**
**जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।**

**तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं**
**याच्ञा मोघा वरमधिगुणे नाधमे लब्धाकामा ।।**[१०]

एवमुत्तरमेघे कालस्य शक्तमपि निरूपितवान् कालिदासः ।

**शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ**
**शेषान्मासान्गमय चतुरो लोचने मीलयित्वा ।**
**पश्चादावां विरहगणितं तं तमात्माभिलाषं**
**निर्वेक्ष्याव परिणतशरच्चन्द्रिकासु क्षपासु ।।**[११]

**मालविकाग्निमित्रे भाग्यवादः —** मालविकाग्निमित्रे वाच्यवृत्त्या यद्यपि भाग्यवादः नोक्तस्तथापि मालविकाग्निमित्रयोः समागमः दैविकेन द्वारेण असम्भवेनापि प्रकारेण कृतः । तदपि भाग्यवादानुकूलमेव ।

**विक्रमोर्वशीये भाग्यवादः —** विक्रमोर्वशीयनाटकेऽपि कार्यसिद्धौ बहुशः भाग्यमेव कारणमिति कविना स्पष्टं निरूपितम् । ऊर्वश्यामपि भाग्यं लेखविषये नाटके द्वितीयाङ्के फलितम् । अपि च पार्वतीशापः मोक्षप्रकारः सङ्गममणिलाभः इत्येते विषयाः भाग्यवादनिरूपका एव ।

**अभिज्ञानशाकुन्तले भाग्यवादः —** प्रथमाङ्कात् प्रारभ्यैव शाकुन्तले भाग्यवादस्य अवकाशः दृश्यते । राजा दुष्यन्तः शकुन्तलालाभं, मृगयायाः प्राक् स्वप्नेऽपि नोत्प्रेक्षितवान् । ततो मृगदर्शनमवत्से मृगे बाणप्रयोगाभिलाषः, तस्मिन्नेव अन्तरे ऋषीणामागमनं सर्वमेतत् दैविकमेव । अत्र सन्दर्भे भाग्यं भवितव्यपदेन कविः सूचयति । **"शान्तमिदमाश्रमपदं स्फुरति च बाहुः .... भवितव्यानां द्वाराणि भवन्ति सर्वत्र"** इति दुष्यन्तमुखेन कालिदासः प्रतिपादयामास ।

**ऋतुसंहारे भाग्यवादः —** षट्सु काव्येषु एव भाग्यवादः कालिदासेन निरूपितः इति पूर्वोक्तरीत्या ऋतुवर्णनेषु भाग्यसूचकाः श्लोकाः केचन लभ्यन्ते । तत्रापि कल्पनामाध्यमेन ऋतुसंहारेऽपि सूचनाप्रायेण भाग्यवादः कालिदासेन निरूपितः।

एवं सप्तकाव्येषु कालिदासेन भाग्यवादः अङ्गीकृतः इति निरूपणमेव अस्य निबन्धस्य आशयः।

## सन्दर्भाः

१. कालिदासचरितम् - पृ.३१ ; प्रकाशनवर्षम् - १९३१, मुम्बई
२. रघुवंशम् - १/८१
३. रघुवंशम् - १/८२,८६,८७
४. तत्रैव - ५/६०
५. तत्रैव - ८/८७
६. कुमारसम्भवम् - २/३२
७. तत्रैव - ३/४३
८. तत्रैव - ४/१
९. तत्रैव - ४/४५
१०. मेघदूतम् - १/६
११. तत्रैव - २/४७

ISSN: 2231-0452

# विद्यामाधवकृतस्य कुमारसम्भवमहाकाव्यव्याख्यानस्य वैशिष्ट्यम्

*दिननाथ दास*
*(शोधच्छात्रः, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापिठम्, तिरुपतिः)*

असारमिदं जगत् प्रतिपदमायासयति प्राणिनः, दर्शयति अनिष्टम्, जनयति चोद्वेगमित्याकलय्य महीयांसः कवयो लोकोत्तरानन्दस्य जनकतया चतुर्वर्गफलस्य च प्राप्तये काव्यात्मिकां सारस्वतीं सृष्टिमरीरचयन्। अत एव प्रभुसम्मितवेदादिशास्त्रेभ्यः सखिसम्मितपुराणेतिहासेभ्यश्च विलक्षणा सत्कविभणितिः मधुरमभिदधती मञ्जुभाषिणी कामिनीव प्रवणयति मानवमनांसि शुभैकनिदानेष्वभ्युपायेषु। अत एवोक्तम्-

**चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।**
**काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते।।**

काव्यं नाम कवेः कर्म। कविश्च क्रान्तद्रष्टा भवति। सोऽपि न केवलं सङ्कुचितं परिमितं वा अर्थजातं पश्यति, न वा केवलो मनुष्योऽहमिति कृत्वा मानवीयान् भावान् एव साक्षात्करोति, अपि तु तस्य कृते विश्वे निर्मुक्ता विस्तृता च स्थली वर्तते। स सरित्प्रवाहे मधुरं गानं शृणोति, क्वचिच्च आकर्णयति वयसां विरावे वनदेवतानां सन्देशम्, प्रकाशयति चापरत्र प्राच्यां चन्द्रोदये वनितासुखसम्भोगम्, ख्यापयति चान्यत्र नायिकामुखकमलचन्द्रमसा तुल्यम्। स कालातीतं रचयति, देशातीतां दर्शयति, परोक्षयति, भूतं भावयति, जडं चेतनयति, निर्बलं सबलयति, किं बहुना अधरीकरोति ब्रह्माणमपि विरचय्यापूर्वमपारं काव्यसंसारम्।

कविसृष्टिः नवरसोपेता सर्वदा सर्वान् ह्लादयति, नैराश्यनीहारं निरस्यति, उत्साहं समेधयति, लौकिकं जनं रञ्जयति, सहृदयं चमत्करोति, मुमुक्षुं मोचयति, अलमनल्पतया कविभारती यमघटितमपि घटयन्ती निखिलं प्रसाधयति। कविः विश्वेषां जनानां प्रतिनिधिः तस्य विचाराः त्रिलोकप्रतिनिधिभूता भवन्ति। अत एव कवेरनुभूतिः ललितपदकदम्ब-

रूपमाकलय्य, स्वानुभूतिरिव सहृदयं प्रविश्य रमयति, मदयति, मोदयति, मोहयति च यथावसरम्। अत एवोक्तमानन्दवर्धनेन -

**सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।**
**अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्।।**[१] इति।

लोकोत्तरवर्णनानिपुणः कविः रसैकतानपरायणः विशिष्टां रचनां रचयति। तत्र न रागस्य स्थानम्, न वा द्वेषस्योज्जृम्भणम्, न च कलहस्य वावकाशः। अत एव तदीया रचना जीवन्ती भूयसे कालाय सुस्थिरेवावतिष्ठते। शारीरिकबुभुक्षादिशमनायान्नाद्याहारस्येव मानसिकश्रमापकरणपुरस्सरम् अपूर्वमानन्दमुत्पादयितुमेव सारस्वतसृष्ट्यवतारः।

कालिदासस्य काव्यानि बहूनि। तत्र प्रतिपदं द्रष्टुं शक्यते सौन्दर्यविलासः। मानवो यथा सृष्टिकेन्द्रं तथैव कालिदासस्य कवित्वकेन्द्रमपि असावेव, परन्तु कवित्वकेन्द्रभूतो मानवो न कदापि एकाकी चित्रितः कविना किन्तु तदीयसन्निधौ प्रकृतिः सदा सुखपरायणा वर्तते। यदा कविः प्रकृत्या सह एकाकारतामुपैति तदा तदीयपात्राणां जीवनं प्रकृतेरवयवानामनुभूतितामेति। कविसृष्टः मानवः प्रकृतिश्चान्योन्यं सहजस्नेहञ्च प्रकटयतः।

गन्तव्यमेकं पन्थानो नैकधा। सूत्रमेकं व्याख्या विभिन्ना। विवेच्यविषयोऽप्येको विवेचनाऽनेकधा। अधुना विविच्यते शास्त्रीयविषयः 'कुमारसम्भवव्याख्यानम्' लेलिख्यते बहुशः, विवेच्यते अनेकशः , पापठ्यते सोत्कण्ठम्, समाधीयते समनोयोगम्। संस्कृतसाहित्योद्याने पञ्चमहाकाव्यरूपकपुष्पाणि विकसन्ति। तेषु पञ्चमहाकाव्य-रूपकपुष्पेषु कालिदासेन रचितं कुमारसम्भवपुष्पमन्यतमत्। अस्य कुमारसम्भवस्य नैका व्याख्याः समभिदृश्यन्ते।

कुमारसम्भवमहाकाव्यस्य वल्लभदेवविरचितव्याख्या, अन्याश्च मल्लिनाथकृत-सञ्जीवनीप्रभृतयः व्याख्याः अष्टमसर्गान्तपर्यन्तं लभ्यन्ते, परन्तु अप्रकाशितानि प्रकाशितानि अनेकानि व्याख्यानानि संस्कृतवाङ्मये विद्यन्ते। तानि क्रमेण[२] यथा -
(१) वल्लभदेवविरचितम्* (२) मल्लिनाथविरचितम्* (३) हरिकरणदासविरचितम्

---
* प्रकाशितमातृका।

(४) भरतसेनाविरचितम् (५) बृहस्पतिविरचितम् (६) प्रभाकरविरचितम् (७) नरहरिविरचितम् (८) भीष्ममिश्रविरचितम् (९) मुनिमतिरत्नविरचितम् (१०) रघुपतिविरचितम् (११) वत्सविरचितम् (१२) आनन्ददेवविरचितम् (१३) विन्ध्येश्वरीप्रसादविरचितम् (१४) जिनभद्रसूरिविरचितम् (१५) चारित्र्यवर्धनविरचितम्* (१६) गोविन्दरामविरचितम् (१७) कृष्णपतिशर्मविरचितम् (१८) गोपालचन्द्रविरचितम् (१९) कृष्णमित्राचार्यविरचितम् (२०) नवनीतराममिश्रविरचितम् (२१) भरतमल्लिकविरचितम् (२२) जयसिंहविरचितम् (२३) लक्ष्मीवल्लभविरचितम् (२४) दक्षिणावर्तनाथविरचितम् (२५) कुमारसेनविरचितम् (२६) नन्दगोपालविरचितम् (२७) सीतारामविरचितम् (२८) नारायणपण्डितविरचितम् (२९) हरिदासविरचितम् (३०) अरुणगिरिनाथविरचितम्* (३१) गोपालदासविरचितम् (३२) तर्कवाचस्पतिविरचितम् (३३) सरस्वतीतीर्थविरचितम् (३४) रामपार्शभविरचितम् (३५) जीवनानन्द-विद्यासागरविरचितम् (३६) विद्यामाधवविरचितम्। इत्थं षट्त्रिंशत् टीका उपलभ्यन्ते।

एतेषु षट्त्रिंशति व्याख्याकारेषु विद्यामाधवविरचितेन विद्यामाधवीयटीका अन्यतमा। टीकायां व्याख्यानकौशलम् अतीवमनोहरम्। अस्याः टीकायाः एकविंशतिः मातृकाप्रतिकृतयः नानामातृकाग्रन्थालयेषु सन्ति। अस्याः टीकायाः मातृकाः मलयालम्, देवनागरीलिपिषु GOML, Trivandrum तथा अन्यान्यमातृकासंग्रहालयेषु[3] उपलभ्यन्ते। परन्तु मया समीक्षायै स्वीक्रियमाणानां मातृकाणां विविरणम् इत्थं भवति -

मातृकोपलब्धिस्थानम्, संख्या, लिपिः, पत्रसंख्या, विवरणम्, स्थितिः

GOML(Chennai) -

R.1853, Malayalam, 199, Palm leaf, Incomplete, Injured

4194(b), Devanagari, 41, Paper, Good

R.7128, Devanagari, 85, Paper, Good

Trivandrum University -

5884, Malayalam, 150, Palm leaf, Injured

T.45, Devanagari, 215, Paper, Good

इतोऽपि Trivandrum (Kerala) नगरे Mss No- 1422, 1423, 1424, 6047, T.1018 मलयालदेवनागरीलिप्योः मातृका उपलभ्यन्ते।

कुमारसम्भवमहाकाव्यस्य अस्या व्याख्यायाः कर्त्ता विद्यामाधवः। अयं च विद्यामाधवः गुणवतीग्रामवासी। यश्च तिपेराजिल्लायां वर्तते। विद्यामाधवस्य पितामहः रत्नगिरिः तथा पितुर्नाम नारायणसूरिः च आस्ताम्। तस्य विद्यामाधवस्य पितामहः शास्त्रेषु प्रवीणः आसीत्। तन्नामानुगुणं ग्रामस्य नाम गुणवती इति प्रसिद्धिं गता। अयं वस्तुतः वङ्गप्रान्ते जनिमलभत। परन्तु तस्य वंशजाः दाक्षिणात्यं समागत्य दाक्षिणात्ये कर्णाटकराज्ये न्यवसन्। अतः एव विद्यामाधवः वङ्गीय इति प्रमाणीकुर्वते केचन। अयं वङ्गीयप्रान्तीय इति Calcutta Oriental Journal 1934-35 ग्रन्थं पठित्वा वक्तुं शक्यते, परन्तु विद्यामाधवः तृतीयसोमेश्वरस्य समकालिकः इति। पार्वतीरुक्मणीय-महाकाव्ये स्वयं बाणभट्ट-सुबन्धु-कविराजाख्यानां त्रयाणां कवीनां नामग्रहणेन विद्यामाधवः तेषां परवर्तीति ज्ञातुं शक्यते, तर्हि सोमेश्वरवंशस्य राजत्वं कर्णाटकराज्ये आसीत्। तदर्थं वक्तुं शक्यते विद्यामाधवः कर्णाटकवासी इति। यथा -

**श्रीमन्नीलगृहाह्वये गुणवती ग्रामप्रभूते पदे।**
**ख्यातो रत्नगिरिर्मता मणिरभूत्तद्भ्रातृपौत्रात्मजः।।**
**यो नारायणसूरिरस्य तनयो व्याख्यातुमद्यारभे।**
**विद्यामाधवसंक्षिप्तः कविरहं काव्यं महद्भारवे।।**[४]

व्याख्याकारः विद्यामाधवः ज्योतिर्विद्, कविः, व्याख्याता, व्याकरणविच्च आसीत्। सः कविरूपेण यद् द्विसन्धनं काव्यं रचितवान् तन्न केवलं पाण्डित्यं प्रकाशयति अपि तु सहृदयानां हृदयमपि रञ्जयति। तत्र यः रचनापटिमा सः अवश्यमेव प्रशंसार्हः। अग्निपुराणे उच्यते यथा-

**नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।**
**कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा।।**

कश्चन कविः बहूनां काव्यशास्त्रणामध्ययनेन, जन्मजन्मान्तरस्य संस्कारफलेनैव काव्यं रचयितुं शक्नोति। सामान्यकविताकाव्ययोर्मध्ये कश्चन भेदः वर्तते। यः कोऽपि प्रतिभावान् शब्देन शब्दं संयोज्य लघुकाव्यं, लघुकाव्यानि वा रचयितुं शक्नोति परन्तु महाकाव्यरचनाप्रसङ्गे तथा न। तत्र सुमहद् वैशिष्ट्यं किमपि वर्तते। प्रतीयमानार्थयोजनं नाम येन द्वित्राः पञ्चशा वा महाकवयः ध्वन्यालोककारेण अङ्गीकृताः। एवं प्रकारेण मधुरमधुमयं चारुचित्रसमन्वितं कुमारसम्भवमहाकाव्यव्याख्याः सम्पाद्य जगति श्रेष्ठस्थानमलङ्करोति। विद्यामाधवः एतद्व्याख्यानेतरान् अनेकान् ग्रन्थान् निरमात्। यथा- कुमारसम्भवव्याख्या, किरातार्जुनीयव्याख्या, नैषधीयचरितव्याख्या, बृहज्जातकस्य लघुप्रकाशिकाव्याख्या, सौन्दर्यलहरीव्याख्या च। एतेषु व्याख्यानेषु कुमारसम्भवव्याख्यानकाले विद्यामाधवः नतु खण्डान्वयविधिं परन्तु दण्डान्वयविधिं स्वीकृत्य अतीव सुष्ठु व्याख्यानं व्यरचयत्।

**व्याख्याया गारिमा**

उपलभ्यमानासु अनेकासु कुमारसम्भवमहाकाव्यव्याख्यासु अस्याः विद्यामाधवीयव्याख्यायाः वैशिष्ट्यं वर्तते। व्याख्येयं सरलसमग्रशब्दार्थव्युत्पत्तिपूर्वकं सम्पूर्णदण्डान्वयन्यायेन वर्तते।

व्याख्यानकर्ता विद्यामाधवः आदौ इष्टदेवतानमस्कारार्थं तथा सर्वमङ्गमाङ्गल्यार्थं पार्वतीपरमेश्वरयोः नाम स्वीकृत्य कविकुलमुकुटालङ्कृतिः नितान्तकान्तकवितासृतिः विश्वविमोहनासेचनकृतिः कृती वाचामधिदेवतायाः मञ्जुलमङ्गललीलाललितं कुमारसम्भवमहाकाव्यं चिकीर्षतीत्याह। तद्यथा -

**श्रीकण्ठार्धमयी मह्यं श्रीविद्यानन्दसम्पदः।**
**देवताभिः स्तुता दद्याद् देवता सर्वमङ्गला।।**
**सर्वमङ्गलदातारौ पार्वतीपरमेश्वरौ।**
**गणेशस्कन्दसंयुक्तौ वन्दे वाञ्छितसिद्धये।।**

**महाकविमहेन्द्रेण कालिदासेन यत् कृतम्।**
**कुमारसंम्भवाख्यां तत् काव्यं व्याख्यातुमारभे।।**[५] इति।

ग्रन्थारम्भे व्याख्याकर्ता इत्थं प्रकारेण उक्त्वा व्याख्यामारभते। षष्ठसर्गस्य व्याख्यान्ते पुष्पिकायाम् उल्लिखति। यथा -

**कुमारसम्भवस्यास्मिन् व्याख्याने गुणवानयम्।**
**षष्ठः सर्गः समाप्तोऽभूद् विद्यामाधवनिर्मिते।।**

कुमारसम्भवमहाकाव्यस्य विद्यामाधवीयव्याख्या ''आशीर्नमस्क्रियावस्तुनिर्देशो वाऽपि तन्मुखम्'' इति शासनाद् आदौ कालिदासविरचितकुमारसम्भवमहाकाव्ये वक्ष्यमाणविषयानुगुणम्। ''अस्त्युत्तरस्याम्'' इति पदं स्वीकृत्य वस्तु निर्दिशति। अस्यां व्याख्यायां वल्लभदेवविरचिताया पञ्जिकाव्याख्यायाः एवं मल्लिनाथकृतसञ्जीवनी-व्याख्यायाः तथा इतरखण्डान्वयव्याख्यापेक्षया विद्यामाधवीयदण्डान्वयव्याख्यानस्य च वैशिष्ट्यं वर्तते। दण्डान्वयव्याख्याने न केवलं शब्दव्युत्पत्तिरेव दर्श्यते अपि तु तत्तद्वस्तुगतविशेषानपि व्याख्याकारः सुबोधशैल्या प्रदर्शयति। उदाहरणार्थं यथा प्रथमसर्गे सप्तर्षिहस्तावचितावशेषाणि इत्यत्र-

**सप्तर्षिहस्तावचितावशेषाण्यधो विवस्वान्परिवर्तमानः।**
**पद्मानि यस्याग्रसरोरुहाणि प्रबोधयत्यूर्ध्वमुखैर्मयूखैः।।**[६]

**सप्तर्षीति।** सप्तर्षिणां हस्तैरवचितानि लूनानि सप्तर्षिहस्तावचितानि तेभ्योऽवशेषाणि अवशिष्टानि। उपयुक्तादन्यः शेषः। शेषशब्दस्य त्रिलिङ्गत्वं दृष्टम्। ''शेषोऽवसाने सर्पराजेऽथ शार्ङ्गिणः। अवतारान्तरेऽपत्ये त्रिष्वत्रोपयुक्त''।। इति। सप्तर्षिमण्डलं सर्वग्रहाणामुपरि वर्तते। यथोक्तं वशिष्ठसिद्धान्ते - ''औत्तानपादिर-खिलग्रहतारकाणामुच्चैस्तरे वसति धाम्नि ततोऽप्यधस्तात्। सप्तर्षिमण्डलमवस्थित-मप्यमुष्मात्, तिष्ठन्त्यधो नभसि च ग्रहतारकाद्याः''।। इति। तस्मादृषिमण्डलात् अधः

परिवर्तमानो विवस्वान् यस्याग्रसरोरुहाणि अग्रसरस्सु रुहन्तीत्यग्रसरोरुहाणि शिखर-शिरस्सु जातानि देवतार्चनार्थं सप्तर्षिहस्तावचितावशेषाणि पद्मानि ऊर्ध्वमुखैर्मयूखैः प्रबोधयति विकासयति, अनेनाऽस्योन्नत्यतिशयो दर्शितः। अत्र चेतनधर्मस्य धर्मेष्वध्यासात् समाधिर्नामालङ्कारः।

द्वितीयसर्गे कथं स्वप्नजागरणमात्रेण संसारप्रलयोद्भवावित्याह इति विषये यथा-

**जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः।**
**जगदादिरनादिस्त्वं जगदीशो निरीश्वरः।।**

**जगद्योनिरिति।** त्वं जगद्योनिः जगतां योनिः कारणमसि। अनेन ब्रह्मणो जगदुत्पादनकारणत्वमुक्तम्। अयोनित्वात्कारणभूतस्याविद्यमानत्वात्, त्वं जगदीशः जगतामीश्वरः त्वं निरीश्वरः ईश्वररहितः। तव सृष्टिस्थितिप्रलयानामीश्वरस्याविद्यमानत्वात् त्वं जगदादिः जगतः आदिः जगदुत्पत्तेस्त्वं पूर्वमपि सत्त्वात् त्वमनादिः आदिरहितः तव नित्यत्वात् अनन्तो जगदन्त इति वा पाठः।[७]

तृतीयसर्गे भगवतः शिवस्य तृतीयनेत्रान्निर्गतस्य जाज्वल्यमानकृशानोः विषये यथा-

**क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति।**
**तावत्स वह्निर्भयनेत्रजन्मा भस्मावशेषं मदनं चकार।।**

**कोपमिति।** हे प्रभो त्वं कोपं संहर संहरेति सम्भ्रमाद्द्विर्वचनम् इति मरुतां वियति स्थित्वा पश्यतां देवानां गिरो वाचः खे यावच्चरन्ति तावत्तदानीमेव भवनेत्रजन्मा स वह्निः महनं भस्मावशेषं चकार कामं दग्धवान् तद्गात्रं भस्मैव यथावशिष्टं भवति तथाऽकरोदित्यर्थः। ननु भूतेऽर्थे चरन्तीति लङ् प्रयोगः, कथं स्यादिति चेदत्रोच्यते मरुतां वचनेषु चरत्सु वह्निः काममदहदित्यर्थः।[८]

चतुर्थसर्गे रतिं प्रति आकाशवाणी प्रसङ्गे यथा -

**कुसुमायुधपत्नि दुर्लभस्तव भर्ता न चिराद्भविष्यति।**
**शृणु येन स कर्मणा गतः शलभत्वं हरलोचनार्चिषि।।**

हे कुसुमायुधपत्नि! तव भर्ता न दुर्लभः सुलभ एव भविष्यति चिरकालं पुनश्शरीरयोगः प्राप्स्यति यदि भविष्यति तर्हि कथं सनष्ट इत्याशङ्क्य तत्र कारणमाह- शृणु त्वं , तदाकर्णय येन कर्मणा सः कामः हरलोचनर्चिषि हरनेत्राग्निज्वालायां शलभत्वं गतः। शलभो यथाग्निज्वालायां पतति तद्वत् तत्र पतितोऽभूदित्यर्थः।[९]

पञ्चमसर्गे त्रिवर्गसारः धर्म इति श्रुतिस्मृतिषु प्रसिद्धमिति विषये प्राह यथा -

**अनेन धर्मः सविशेषमद्य मे त्रिवर्गसारः प्रतिभाति भाविनि।**
**त्वया मनोनिर्विषयार्थकामया यदेक एव प्रतिगृह्य सेव्यते।।**

**अनेनेति**। हे भामिनि! अनेन कारणेन धर्मस्सविशेषं त्रिवर्गसारः इत्यद्य मे प्रतिभाति। ''त्रिवर्गो धर्मकामार्थैः'' इत्यमरः। धर्मार्थकामानां धर्म एव सविशेषतस्सारः श्रेष्ठ इति मम चेतसि प्रकाशते। ''सारः श्रेष्ठे स्थिरांशे च न्यायोपेतौ बले धृतौ'' इति भोजः। तत्कारणमेवाह। मनो निर्विषयार्थकामया मनसा निर्विषया अर्थकामौ यस्यास्सा तथा मनसाऽप्यसंस्कृतार्थकामयेत्यर्थः। तया त्वया धर्म एक एव प्रतिगृह्य स्वीकृत्य सेव्यत इति यत् अनेनेति पूर्वोक्तम्।[१०]

षष्ठसर्गे सर्गेति पदं स्वीकृत्य यथा -

**सर्गशेषप्रणयनाद्विश्वयोनेरनन्तरम्।**
**पुरातनाः पुराविद्भिर्धातार इति कीर्तिताः।।**

**सर्गेति**। विश्वयोनेः ब्रह्मणोऽन्तरं सर्गशेषप्रणयनात् प्रजासृष्टिशेषस्य विधानात्पूर्वं ब्रह्मसर्गस्याल्पत्वात् तदनु महतीनां विशिष्टानां प्रजानां सर्गविधानादित्यर्थः। तस्माद्धातार

इति पुराविद्धिः कीर्तिताः मरीच्यादिप्रजापतिष्वेषामपि अन्तर्भावात् विद्वद्धिः प्रजापतय इति परिकीर्तिता इत्यर्थः। पुरातनाः मानुषेभ्यः पूर्वभावाः।[११]

अन्यासु व्याख्यासु एतावत्स्पष्टं व्याख्यानं न दृश्यते। सर्वेऽपि व्याख्यांशाः सरलतया अवगन्तुं शक्यन्ते। पदानाम् अर्थविश्लेषणं, व्युत्पत्तिः, तत्तद्वस्तुगत-गुणविशेषख्यापनं तथा भोज-अमर-दण्डि-वैजयन्ति-हलायुध-वशिष्टसिद्धान्तान् नानाशास्त्राणि च चिन्तयित्वा अत्र सम्यक् रूपेण प्रतिपादितम्। अप्रकाशितेयं कुमारसम्भवमहाकाव्यस्य विद्यामाधवव्याख्या मदीयशोधकार्यपुरस्सरं प्रकाश्यते। तदात्वे पठितृणाम् इयं विद्यामाधवीयव्याख्या व्युत्पादिनी भवित्री, इतराभ्यः व्याख्याभ्यः वैशिष्ट्यं च भजते।

## सन्दर्भाः

१. धन्यालोकः, आचार्य लोकमणिदाहालः, विद्या प्रकाशन, वारणासी -२००१, पृष्ठा -३८

२. History of Classical Sanskrit Literature, M krishnamachariar, Motilal Banarasidass, Varanasi.

३. New Catalogues Catalogurum, Government Oriental Manuscripts Library, Chennai.

४. The Calcutta Oriental Journal.1934-35, Edit. by Kshits Chandra Chatterji. Vol - II.

५. Mss No R.7128, Government Oriental Manuscripts Library, Chennai.

६. अस्य श्लोकस्य व्याख्यानं GOML तः सम्प्राप्तायां R.7128 मातृकायां प्रथमसर्गे १६ व्याख्याने वर्तते।

७. अस्य श्लोकस्य व्याख्यानं GOML तः सम्प्राप्तायां R.7128 मातृकायां द्वितीयासर्गे ०९ व्याख्याने वर्तते।

८. अस्य श्लोकस्य व्याख्यानं Trivandrum तः सम्प्राप्तायां T.45 मातृकायां तृतीयमसर्गे ७२ व्याख्याने वर्तते।

९. अस्य श्लोकस्य व्याख्यानं Trivandrum तः सम्प्राप्तायां T.45 मातृकायां चतुर्थसर्गे ४० व्याख्याने वर्तते।

१०. अस्य श्लोकस्य व्याख्यानं Trivandrum तः सम्प्राप्तायां T.45 मातृकायां पञ्चमसर्गे ३८ व्याख्याने वर्तते।

११. अस्य श्लोकस्य व्याख्यानं GOML तः सम्प्राप्तायां R.7128 मातृकायां षष्टसर्गे ०९ व्याख्याने वर्तते।

ISSN: 2231-0452

# जानकीपरिणयनाटके इतिवृत्तपरिवर्तनानां विवरणम्

*शिवगणेश नागोतु*
*(शोधच्छात्रः, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

## I) कविपरिचयः -

जानकीपरिणयकर्ता रामभद्रदीक्षितः । अयञ्च कविः स्वीयजीवनकालविषये एवम् अब्रवीत् -

**यश्चतुर्वेदयज्वेन्द्रवंशवारिधिकौस्तुभः ।**
**यस्य कण्टरमाणिक्यग्रामो भवति जन्मभूः ।।**[१]

अस्मात् श्लोकात् ज्ञायते यत् - रामभद्रदीक्षितानां जन्म कण्टरमाणिक्य-नामकग्रामे चतुर्वेदयज्वेन्द्रवंशे सञ्जातम् । ग्रामोऽयं कुम्भकोणात् क्रोशपरिमिते दूरे विराजमानो वर्तते । दीक्षितस्य पिता यज्ञरामदीक्षितः । एते सुप्रसिद्धवैय्याकरणा आसन्। एते तञ्जोर्राज्यस्य शाहजीराजस्य (1684-1711 A.D.) आस्थाने समविराजन्त । राजा शाहजीमहाभागः रामभद्राय एवं भास्करयज्वा-वेङ्कटकृष्णयज्वा-महादेव- तिप्पाध्वरी इत्यादिभ्यः अन्येभ्योऽपि “शाहजीराजपुरा” (तिरुवशलूर्) इत्यग्रहाराभिधानकग्राममेकं समार्पयत् । रामभद्रदीक्षितः सुप्रसिद्धरूपकद्वयं विरचितवान्।

१. जानकीपरिणयम्,
२. शृङ्गारतिलकभाणश्चेति ।

एतदतिरिच्य श्रीरामभद्रदीक्षितस्य अन्याः कृतयः उपलभ्यन्ते । यथा –

| | |
|---|---|
| १. रामस्तवकर्णरसायनम्, | २. वर्णमालास्तोत्रम्, |
| ३. रामप्रसादस्तवः, | ४. रामाष्टप्रासस्तवः, |
| ५. विश्वगर्भस्तवः, | ६. रामचित्रस्तवः, |
| ७. रामचापस्तवः, | ८. श्रीरामबाणस्तवः, |

९. तूणीरस्तवः (अनुपलब्धः) १०. पतञ्जलिचरितकाव्यम्,
११. पर्यायोक्तिनिष्यन्दम्, १२. रामभद्रशतकम्।

**नाटकलक्षणम्**

## II) नाटकलक्षणेन साकं जानकीपरिणयनाटकस्य समन्वयः

जानकीपरिणये नाटके अद्भुतसन्निवेशकल्पना, चमत्कारकल्पना, पात्रचित्रीकरणञ्च सम्यक् अकारि रामभद्रदीक्षितैः। अस्य नाटकस्य समवलोकनेन ज्ञायते यद्रामभद्रदीक्षितः बहून् ग्रन्थान् आलोड्य विविधकाव्यनाटकादीन् परिशील्य लब्धज्ञानेन नाटकमिदं चमत्कारमानेतुं समवचकारेति। अस्य शैली मृदुमधुरा द्राक्षापाकयुक्ता रसास्वादनपरा भवतीत्यत्र नास्ति संशीतिलेशः।

अत्र नाटके प्रत्येकमङ्के प्रत्येकमपि वाक्ये चमत्काररसपोषणं कवेश्च पाण्डित्यपरम्परां प्रकाशयति। अस्मिन् जानकीपरिणयनाटके अङ्गीरसत्वेन अद्भुतरसो न्यस्तः। अत्र नायकः (श्रीरामचन्द्रः) धीरोदात्तत्वेन प्रकाशमानो भवति। रसास्वादनतत्परोऽयं कविः क्वचित् उत्तररामचरितात् आन्तरिककरुणभावं क्वचिद् वेणीसंहारनाटकाद् वीरभावञ्च स्वीकृतवान्। न केवलमद्भुतरसः अत्राङ्गी, अपि तु अङ्गरसत्वेन वीरकरुणादीनपि कविः सन्निवेशयामास।

## III) जानकीपरिणयनाटकस्य परिचयः -

रामभद्रदीक्षितेन विरचितं जानकीपरिणयनाटकं रामकथाश्रितेषु संस्कृत- नाटकेषु, वस्तुपरिवर्तनदृष्ट्या, चमत्कारनैपुण्येन, औचित्यपरिरक्षणेन च महत्त्वपूर्णं स्थानमावहति। "जानकीपरिणयनाटकम्" कवेः सर्वश्रेष्ठकृतित्वेन सर्वविदितमस्ति। अनेन नाटकेन कविः प्रसिद्धिमगात्। कवेरस्य शैली सरलसुमधुरा, वैदर्भीरीत्यां द्राक्षापाकयुक्ता च। नाटकेऽस्मिन् रामकथा एव विविधरसोचितैः संगुम्फिता, प्रेक्षकमनोह्लादिभिरिति- वृत्तपरिवर्तनैः सप्ताङ्कात्मकरूपेण विरचिता। रूपकसाहित्ये विद्यमानेषु रामकथानाटकेषु इदञ्च नाटकं मुकुटायमानं स्थानमधिकरोति। यथा सूत्रधारवाक्येष्वेव -

**सरलो यत्र सन्दर्भः सरसं चार्थबन्धनम् ।**
**तन्नस्त्वयाभिनेतव्यं रूपकं नवनिर्मितम् ।।**[२]

इत्यादिश्लोकैः रूपकस्यास्य सरससम्मोहनत्वं व्यज्यते । अपि च नटी "**दिष्ट्या इदानीम् अनुबोधितास्मि आर्येण यस्य खलु काव्यबन्धस्य कविः महानुभावाद्यज्ञरामदीक्षितादुत्पन्नो अर्णवादिव चन्द्रो रामभद्रमखीन्द्र**" इति रामभद्रदीक्षितस्य नाटकस्यास्य कर्तृत्वं प्रकटयति।

**IV) जानकीपरिणयनाटके पात्राणि**

जानकीपरिणयनाटके पुरुषस्त्रीत्यादीनि पात्राणि सन्ति । तानि - सारणः, शुकः, ताटका, दशाननः, विद्युज्जिह्वः, देवव्रतः, सत्यव्रतः, अत्रिः, अनसूया, सुचरिता, जानकी, शीलवती, मुनिः, मारीचः, कशलः, रामः, काश्यपः, मायासीता, पिङ्गलः, अहल्या, चित्राङ्गदः, जनकः, शतानन्दः, प्रतीहारी, लक्ष्मणः, कौशिकः, ऊर्मिला, माण्डवी, श्रुतकीर्तिः, विराधः, शूर्पणखा, जटायुः, अनला, सम्पातिः, महापार्श्वः, सूत्रधारः, पुञ्जिकास्थला, घृताची, हनुमान्, सुग्रीवः, भरतः, शतृघ्नः, वसिष्ठ इति ।

**युगलपात्राणि -**

सारणः - मुनिः, करालः - पिङ्गलः, मारीचः - काश्यपः, दशाननः - रामः, विद्युज्जिह्वः- कौशिकः, सारणः - लक्ष्मणः, विराधः - रामः, शूर्पणखा - सीता, पर्णादिनी - एका सन्यासिनी।

**V) दृश्यकाव्येषु इतिवृत्तस्य प्राधान्यम्**

सत्काव्यनिर्माणेन न केवलं कवेरानन्दः, सहृदयानां मनस्यप्यानन्द उत्पद्यते । काव्यनिर्माणार्थं प्रतिभाव्युत्पत्त्यभ्यासादित्रितयञ्चावश्यकम् । अपि च सहृदयरञ्जनार्थमेव काव्यानि निर्मीयन्ते । कवयः स्वप्रतिभामाधारीकृत्यैव काव्यनिर्माणं कुर्वन्ति । यः कविः बहूनां सहृदयानामानन्ददायककाव्यनिर्माणे समर्थो भवति तस्यैव कवेः तस्यैव काव्यस्य च अधिकादरः संदृश्यते । अत एव कविः जागरूकस्सन् काव्यनिर्माणविषये आवश्यकनियमानवधार्य काव्यनिर्माणोन्मुखो भवति । तत्र वस्तुनायकरसानां विषये निर्णयो न सुलभसाध्यः । अत एव कविः वस्तुनिर्णयार्थं पुराणादीनि परिशीलयति ।

इतिवृत्तं (वस्तु) नाटके महत्त्वपूर्णः अंशो भवति । इतिवृत्तस्य रमणीयता-व्यापकता-गतिशीलतादीनामुपर्येव नाटकस्य महत्त्वं, सौन्दर्यमवलम्बितं भवति । यद्यपि भारतीयनाट्यग्रन्थेषु रस एव काव्यात्मत्वेन स्वीकृतमपि वस्तुनेत्रादिविभिन्न-नाटकीयतत्त्वानां स्वीकारे सूक्ष्मोद्देश्यं रसस्य दिव्योन्मेषकरणमेव। रसस्य प्रकाशनाय प्राणभूताधार इतिवृत्तमेव । आत्मा पार्थिवशरीरपरित्यागानन्तरं यद्वन्नैव प्रकाशते तद्वदेव रसोऽपि इतिवृत्तविरहितः पृथङ्नैव प्रकाशते । इतिवृत्तस्य अन्तरालादेव रसस्य अमृतनिष्यन्दो भवति । नाटकस्य चिरन्तनसौन्दर्यप्रदानार्थं रसेतिवृत्तयोर्मध्ये सामञ्जस्यमत्यावश्यकम् । धनञ्जयो वस्तुरसयोः समन्वयमत्यावश्यकमिति उक्तवान्[३] । आनन्दवर्धनश्च इतिवृत्तानुरोधेन रसप्रतिकूला च रचना यदि भवति तदा तत्त्यक्त्वा अन्यं स्वीकर्तुमपि आदिशति[४] । संस्कृतनाटकानां प्रयोजनं न केवलं प्रेक्षकाणां मनोरञ्जनम् अपि च उदात्तादिगुणप्रबोधनमत्यावश्यकम् । अत एव नाटकेषु प्रख्यातमेव इतिवृत्तं स्वीकर्त्तव्यमिति नियमः ।

**VI) इतिवृत्तपरिवर्तनानि**

प्रथमाङ्के प्रस्तावनायां नटीनटसंवादसमये कलहंसवेषेण मायया कमलिन्यप-हरणप्रयत्नं प्रतिपाद्य सीताकल्याणविषये रावणः रामवेषेण आगच्छतीति सूचयति । शुकसारणसम्भाषणद्वारा रावणभीत्या जनकः रामानुरक्तां सीतां रामायैव प्रदातुं कुशध्वजं मिथिलायामेव संस्थाप्य सीतासहितः यज्ञदर्शनव्याजेन कौशिकाश्रममागतः। कौशिकोऽपि यज्ञमिषया दशरथं सकुटुम्बम् आह्वातुम् अयोध्यां गतः । अस्मिन्नाटके कविः स्वतन्त्रतया वाल्मीकिरामायाणातिक्रमणं विशेषतया कृतवान् । सीतासहितजनकस्य कौशिकाश्रमागमनं यस्मिन् कस्मिन्नपि नाटके नोक्तम् । महावीरचरिते च ऊर्मिलासीताभ्यां सहितः कुशध्वज एव कौशिकाश्रममागत इति, तत्रैव शिवधनुर्भङ्गः कृत इति वर्णितम् । बहुग्रन्थद्रष्टा रामभद्रदीक्षितः बहुभिः परिवर्तनैः नाटकं सुन्दरतया निर्मितवान् । सीता रामानुरक्तेति, तयोः उभयोरपि वंशयोः प्रतिष्ठा पवित्रा इति ज्ञात्वा वरसंग्रहार्थं जनकः रावणभीतः प्रतिसृष्टिकरणे समर्थस्य साहसिकस्य विश्वामित्रस्य समीपमेत्य तं पुरोहितं प्रार्थयामास ।

अनेन विश्वामित्रस्य महिमान्वितत्वं रामभद्रदीक्षितेन प्रकाशितम्। एतादृशपरिवर्तने चमत्कारातिशयोऽभिव्यक्तो भवति। अत्र सीतासहितस्य जनकस्य विश्वामित्रयाग-समीपागमनं सकुटुम्बं दशरथं यागार्थमाह्वातुं विश्वामित्रगमनञ्च कविकल्पितमेव ।अपि च विश्वामित्रयज्ञविघ्ननिवारणार्थं परशुरामः रावणं सम्प्रार्थ्य तदाज्ञानुसारं कौशिकमखविघ्नकारकं मारीचं निवारयितुं ताटकी प्रेषिता इति कविकल्पितमेव वस्तु। रामभद्रदीक्षितः पूर्वोत्तरकथासन्दर्भशुद्ध्यर्थमेतादृशकल्पनानि अत्र कृतवान् । सारणः श्रीरामे मृते सति सीता अवश्यं रावणं परिग्रहीष्यति इति मत्वा रावणसमीपादागतां ताटकीं, कौशिकरामसंहारार्थं प्रबोध्य, रामवेषेण जनकसमीपं गत्वा सीतां जग्राहेति रावणमुक्त्वा तथैव करोति । मायावेषप्रयोजनं ताटकया पृष्टः सारणः -

**बलादपहृता सीता नानुरज्येद्दशानने ।**
**सैव प्रीत्या च जनके तच्च नानुमतं विभोः ।।**[५]

इत्यनेन यदि सीता बलात्कारेण अपहृता तदा दशानने अनुरक्ता न भवति । अपि च रम्भाशापविषयं सारणः ताटकायै न्यवेदयत् ।

द्वितीयाङ्के कौशिकेन आहूताः अनसूया अत्रिप्रभृतिमहर्षयश्च देवदत्तानि चीनांशुका- ङ्गरागादीनि सीतायै प्रदातुमागताः । तेषां धारणेन राक्षसभयं न जायते । सहजसौशील्यं संलक्ष्यते । वाल्मीकिरामायणे एतादृशाद्भुतवस्तुप्रशंसा कृता, परमत्र नाटके सन्दर्भोचितं तेषां सर्वेषामलङ्काराणां प्रधानं वर्णितम् । रामायणे अनसूया अरण्यवाससमये सीतायै तादृशान्येव प्रादात् । परं नाटके सीताकल्याणात्पूर्वमेव सीतायै तानि प्रदत्तानि । अनेन जानकीशीलपोषणे कवेः आसक्तिः संदृश्यते । अत्र जानक्या स्वप्ने श्रीरामः दृष्ट इति, तस्मै सीता विरहमनुभवतीति, विरहशान्त्यर्थं सख्यः शैत्योपचारान् कुर्वन्तीति, सीता च प्रियचित्रं चित्रितवतीति महाकाव्यरीत्या वर्णनं कृतम् । विश्वामित्राश्रमप्रान्तवर्णनापरिशीलनेन रामभद्रदीक्षितः दाक्षिणात्यः कावेरीतीरवासीति ज्ञायते। मायातीतः महर्षिः कौशिकः सीतायै मणिकङ्कणं प्रदाय तां राक्षसेभ्यः अगोचरामकारयत्। तथापि सारणमायया मणिकङ्कणे विनष्टे सति सीताशीलसंरक्षणार्थम् अनसूयया चीनांशुकाङ्गरागादीनि प्रदत्तानि।

तृतीयाङ्के सर्वापि कथा कविकल्पिता । ताटकासुबाहुमारीचाः अयोध्यातः आगच्छन्तः कौशिकरामादीन् संहर्तुं संसिद्धाः जाताः । अत्र मारीचकरालसम्भाषणद्वारा अप्रतिहतैः रामबाणैः ताटकासुबाहू मृताविति कथमपि मारीचः पलायित इति ज्ञायते। रामायणे ताटकासुबाहुवधः कौशिकाश्रमे निर्वर्तितः । परं नाटकेऽस्मिन् अयोध्यायाः मार्गमध्ये तयोर्वध उक्तः । एतच्च पूर्वोत्तरकथासन्दर्भशुद्ध्या प्रकाशितम् । मारीचकरालौ उपायान्तरेण मायासीतां प्रकल्प्य, तद्द्वारा श्रीराममाकृष्य तद्विरहमसहमाना सीता अग्नौ प्रविष्टेति, तच्छ्रुत्वा श्रीरामोऽपि अग्नौ प्रविशतीति, तदनुकूलम् उपायमालोच्य कौशिकाश्रमस्य अनतिदूरे एतत्सर्वं निर्मितवन्तौ । करालश्च श्रीराममित्रस्य पिङ्गलकस्य रूपं, मारीचश्च विश्वामित्रशिष्यस्य काश्यपस्य रूपं धृत्वा मृगयार्थं श्रीरामे आगते सति मायामयौ पिङ्गलककाश्यपौ श्रीरामं मायासीतायामनुरक्तं चक्रतुः।

चतुर्थाङ्के विद्युज्जिह्वरावणसारणाः क्रमेण विश्वामित्ररामलक्ष्मणवेषान् धृत्वा जनकं वञ्चयित्वा जानकीं परिणेतुमिच्छया च कौशिकाश्रममाजग्मुः । अस्मिन्सन्दर्भे मायारूपाणां सत्यरूपाणां तेषां भेदं ज्ञातुमुपायतया रावणवृत्तान्तपरिशीलकं कञ्चनगन्धर्वं रामभद्रदीक्षितः कल्पितवान् । एषः गन्धर्वस्ताटकावधकारणेन तुष्टेन इन्द्रेण नियुक्तो लङ्कां गत्वा रावणादीनां विषयं ज्ञात्वा, तेषां वञ्चनामपि परिशील्य, कौशिकाश्रमे मायारूपाः विश्वामित्ररामलक्ष्मणाः जनकं वञ्चयितुमागता इति उच्चस्वरेण निजजनकादिभ्यो निवेद्य गतवान् । नाटकस्यास्य सर्वस्यापि अयं गन्धर्वः प्रमुख आसीत्। मायारूपान् रावणादीन् जनकादयः सत्यरूपान् मत्वा सीतां प्रदातुं यदा उद्युक्तास्तदा गन्धर्ववचनानुसारेण तत्प्रयत्नाद् विरताः जाताः। एवं गन्धर्वोक्तिः सीतां रावणहस्तात् त्रातुमुपयुक्ता, अन्यथा मूलच्छेद एव भविष्यति । तदा सत्यरूपाणां विश्वामित्ररामलक्ष्मणानामागमने स्वमाया बहिष्कृता भविष्यतीति मत्वा मायारूपास्ते तिरस्करिणीविद्यया अदृश्याः भूत्वा तत्रैव स्थिताः । जनकादयस्तु के सत्यरूपाः विश्वामित्ररामलक्ष्मणा इत्यस्मिन् विषये संशयापन्ना अभूवन् । अन्ततो जनकस्य शिवधनुरारोपणनिर्णयं विज्ञाय कौशिकानुमत्या च श्रीरामः धनुरारोपणं कृतवान् । अस्मिन्सन्दर्भे ताटकवधेन श्रीरामपराक्रमं ज्ञातमिति, तादृशस्य पराक्रमवतः श्रीरामस्यैव विश्वामित्रः दिव्यास्त्रमन्त्रमुपदिदेशेति च रामायणकथामनुसृत्यैव संग्रहेण प्रोक्तम् । अदृश्याः

विद्युज्जिह्वरावणसारणाः रामप्रभावं प्रत्यक्षतः दृष्ट्वा श्रुत्वा च ताटकावधेन खिन्नाः श्रीरामे क्रोधाविष्टाः जाताः । एवं रामभद्रदीक्षितः श्रीरामपराक्रमं रावणस्य प्रत्यक्षतया निवेदयन् नाटकमिदं विशेषतया अतिसुन्दरतया उपनिबद्धवान् ।

पञ्चमाङ्के विष्कम्भके शूर्पणखाविराधौ प्रविश्य रामायणकथां निवेदयतः । रावणः सीतामपहर्तुं शूर्पणखां प्रेषितवानिति, श्रीरामं हन्तुं खराज्ञया आगताय विराधाय, शूर्पणखा सीतारामवृत्तान्तं निवेदयति । माल्यवदादिभिः सहितः रावणः परशुरामं प्रेरितवानिति, परशुरामगर्वभङ्गः संजात इति, विद्युज्जिह्वसारणौ मन्थरादशरथौ आवेश्य वरद्वयनिर्वहणं कृतवन्तौ इति, ततश्च सीतारामलक्ष्मणा अरण्यम् आगता इति, रामभक्तः भरतः श्रीरामपादुके गृहीत्वा अयोध्यां गत इत्येते अंशाः सर्वे संग्रहेण प्रतिपादिताः । सीतारामयोः वनविहारः सम्यगुपवर्णितः । ततश्च सीतारामौ शैलसमीपे प्रकृतिशोभां पश्यन्तौ स्थितौ । लक्ष्मणश्च पर्णशालाद्वारे निरीक्षते । अस्मिन्सन्दर्भे शूर्पणखाविराधौ अन्योन्यमविज्ञायैव सीतारामवेषौ धृत्वा परस्परापहरणेच्छया तत्रैव सञ्चरतः । अन्ते तौ परस्परं सीतारामौ अपहृतौ इति मत्वा आकाशं गतवन्तौ । ततः जटायुभर्त्सनेन भूमौ पतितौ । एतत्सर्वम् अद्भुतरसकल्पनमेव। एवं सामाजिकानामानन्दकल्पने अयं रामभद्रदीक्षितोऽद्वितीयः। उपर्युक्तं सर्वमपि कविकल्पितमेव ।

षष्ठाङ्के अन्तर्नाटिकायां सीतान्वेषणमारभ्य बालिवधपर्यन्तं रामायणकथाभागः नेत्रपर्वं संदृश्यते । अन्तर्नाटिकाकल्पनं रामभद्रदीक्षित उत्तररामचरिताद् गृहीतवान् इति कथनापेक्षया बालरामायणाद् गृहीतवानिति कथनं युक्तं भवति । प्रथमं भवभूतिरेव अन्तर्नाटिकां कल्पितवान्। तथापि राजशेखरोऽप्सरोभिः रावणसन्निधौ अन्तर्नाटिकाद्वारा रामकथामेव कल्पितवान् । एवमत्रापि रावणसमक्षे अन्तर्नाटिकारूपेण रामकथा प्रदर्श्यते। अत्र अन्तर्नाटिकायां अभिनयादिभिः रावणः रामकथां यथार्थं मन्यमानः खड्गधारी उदतिष्ठत्। ततश्च महापार्श्वेण नाटकमिति वारितः । एतादृशसन्निवेशः बालरामायणेऽपि राजशेखरेण कल्पितः । अनया कल्पनया रामवृत्तान्तः रावणाय निवेदितः । अपि च निराशया प्राणपरित्यागं कर्तुमुद्युक्तायै सीतायै जीविताशां कल्पयितुमुपयुज्यते । एवं पूर्वोत्तरकथासन्दर्भमेलने रामभद्रदीक्षितोऽद्वितीयां प्रतिभां प्रदर्शितवान् । विश्वामित्राश्रमे

सीतासमीपात् पारितोषिकतया सारणेन गृहीतं राक्षसान्ध:कारणमणिकङ्कणं विद्युज्जिह्वद्वारा तस्य भार्याया: मायावत्या: समीपं, तस्यास्समीपात् अनलासमीपमागतमिति, अनला च सीतायै एकं कङ्कणं दत्त्वा स्वयमपरं धृत्वा अन्तर्नाटिकायामन्येषां राक्षसानां दर्शनमशक्यतया कर्तुमुपयुक्तमिति कथा अत्र कल्पिता।

सप्तमाङ्के सम्पातिशूर्पणखे प्रविश्य राम: कपिसैन्येन सह आगत्य समुद्रे सेतुं निर्मीय लङ्कायां रावणं हत्वा तत्र विभीषणमभिषिक्तं कृत्वा अग्निपरिशुद्ध्या सीतया सह विमानमधिरुह्य अयोध्यागमनार्थं सन्नद्ध आसीदिति ज्ञापयत: ।श्रीरामदर्शनार्थं गच्छन्त्या: सीताया: अभिमुखमागता शूर्पणखा परिजननिवारणे पराभूता आसीत् । सम्पातिना नासिकाभावकारणात् परिजनेन तथा कृतमिति तां शूर्पणखामनुनीय एवं खलु निमित्तविद आचक्षते, प्रतिष्ठमानस्य अभिमुखं विगतनासिकामुखदर्शनं भाविन: क्लेशस्य सूचकमिति शाकुनिका: वदन्तीति उक्तम्। अनेन रामभद्रदीक्षितस्य शाकुनिकेषु आदर: संदृश्यते। शूर्पणखा च भरतादीनाम् अपकारमाचरितुं हनुमत: भरतसमीपागमनात्पूर्वमेव नन्दिग्रामं पर्णादिनीनामकतापसवेषं धृत्वा प्रस्थिता । नन्दिग्रामे भरतश्च श्रीरामस्य आरण्यकस्थितिं स्मरन् शतृघ्नेन सह सविषादं भाषमाण: अत्यधिकं दु:खमनुबभूव । तस्मिन् समये कविकृतवर्णनेन श्रीराम: नेत्रगोचरो भवति । अस्मिन्सन्दर्भे रामभद्रदीक्षित: वस्तुकलापोषणनैपुण्यं प्रदर्शितवान् । अत्रैव भरतशतृघ्नौ रामविषयं चिन्तयत: । तत: गुहद्वारा सुग्रीवसख्यादिवृत्तान्तं ताभ्यां ज्ञायते । अस्मिन्सन्दर्भे भरतादीनां श्रीरामवृत्तान्तं गुह: न्यवेदयदिति कल्पनं कविकृतमेव ।

अन्ते भरतसमीपं रामादय: आगता: । तदा तेषां परस्परसम्भाषणं महदुत्तेजनं जनयति। नाटकेऽस्मिन् तस्मिन् समये जनक: तत्रासीदिति वर्णितम् । कौशिकवसिष्ठादय: नन्दिग्राम एव प्रणतं श्रीरामम् आशीर्भि: एधयामासु: । नन्दिग्राम एव श्रीरामपट्टाभिषेको निर्वर्तित: ।श्रीरामेणैव भरतवाक्यं प्रोक्तम् । एवं नाटकान्ते सर्वेषामानन्दं कल्पितवान् रामभद्रदीक्षित: ।

जानकीपरिणये नाटके मूलकथापेक्षया बहव: विपरिणामा: कृता आदित: अन्तपर्यन्तं तुल्यरूपौ पात्रद्वये निर्मीय सत्यरूपौ ज्ञातुं सक्लिष्टतामकल्पयत् ।

## VII) उपलब्धमातृकाणां परिचयः

जानकीपरिणयनाटकस्य मातृकाः भारतस्य विभिन्नेषु प्रान्तेषु प्राच्यविद्यानुसन्धान-केन्द्रग्रन्थागारेषु आहत्य चतुर्दश (१४) संख्याकाः यथाक्रमेण ग्रन्थ-देवनागरी-नन्दिनागरीलिपिषु उपलभ्यन्ते । तासां विवरणं पट्टिकारूपेण दीयते ।

1. 4360, तञ्जावूर्, 168 (P), देवनागरी, सम्पूर्णा, समीचीना
2. 4361, तञ्जावूर्, 158 (P), देवनागरी, सम्पूर्णा, समीचीना
3. 4362, तञ्जावूर्, 214 (P), देवनागरी, सम्पूर्णा, समीचीना
4. 4365, तञ्जावूर्, 79 (P), देवनागरी, असम्पूर्णा, समीचीना
5. 3513, केरला, 97(P.L.), ग्रन्था, सम्पूर्णा, असमीचीना
6. 4497, केरला, 81(P.L.), ग्रन्था, सम्पूर्णा, असमीचीना
7. D. 12518, GOML (Madras), 94 (P), देवनागरी, सम्पूर्णा, समीचीना
8. S.R. 1545, GOML (Madras), 199 (P.L.), ग्रन्था, सम्पूर्णा, असमीचीना
9. 2198, ORI, Tirupati, 202 (P.L.), ग्रन्था, असम्पूर्णा, समीचीना
10. 3295, ORI, Tirupati, 32 (P.L.), ग्रन्था, असम्पूर्णा, समीचीना
11. 6541, ORI, Tirupati, 110 (P.L.), नन्दिनागरी, सम्पूर्णा, असमीचीना
12. 16232, R.S.V.P., Tirupati, 98 (P.L.), ग्रन्था, सम्पूर्णा, असमीचीना
13. SD. 4322, R.S.V.P., Tirupati, 290 (P.L.), ग्रन्था, सम्पूर्णा, असमीचीना

## सन्दर्भाः

१. शृङ्गारतिलकभाणः - ६
२. जानकीपरिणयनाटकम् - ४
३. दशरूपकम् ३-३२
न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत् ।
रसं वा तिरोदध्यात् वस्त्वलङ्कारलक्षणैः ।।

४. ध्वन्यालोकः ३-१२

इतिवृत्तवशायातां त्यक्त्वा नानुगुणां स्थितिम् ।

उत्प्रेक्ष्योऽप्यन्तराभीष्टरसोचितकथोन्नयः ।।

५. जानकीपरिणयम् - १/२०

## सहायकग्रन्थसूची


१. संस्कृतसाहित्येतिहासः - प्रो. आर्. एस्. वेङ्कटरामशास्त्रि, श्री कुप्पुस्वामि परिशोधन संस्था, मद्रास- ६००००४

२. दशरूपकम् - धनञ्जयः, चौखम्बा सुरभारती प्रकाशन, गोपालमन्दिरलेन्, वाराणसी- २२९००९ ३.राघवाभ्युदयाभिधेयस्य नाटकस्य सम्पादनं समीक्षणञ्च - डा. रामसुमेरयादवः, हिमांशु प्रिन्टर्स, यमुना विहार मेनरोड़, दिल्ली- २२००९२

ISSN: 2231-0452

# श्रीकृष्णलीलातरङ्गिण्यां भक्तितत्त्वम्

*कोमाण्डूरि माधवी*
*(शोधच्छात्रा, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

## भूमिका

**यदङ्घ्रिपङ्केरुहरेणुलग्नं निपीय नीरं विमलान्तरङ्गः।**
**जानामि तत्त्वं निजमात्मरूपं तं नौमि नारायणतीर्थमार्यम्।।**[१]

इति दाक्षिणात्यभजनसिद्धान्तसम्प्रदायप्रवर्तकेषु पञ्चसु अन्यतमाः श्रीनारायण-तीर्थपादाः। ते सङ्गीतयक्षगानसार्वभौमाः भवन्ति।

तीर्थपादाः प्राच्यगोदावरीमण्डलान्तर्गतकूचिमञ्चिग्रामवास्तव्ययोः तल्लावझल पार्वतम्मागङ्गाधरशास्त्रिणोः, आन्ध्रप्रदेशे गर्तपुरी (गुण्टूरु) मण्डलान्तर्गतकाजाग्रामे १५८० विलम्बनामसंवत्सरकार्त्तिकद्वितीयायां तिथौ इन्दुवासरे पुनर्वसुनक्षत्रे जन्म प्रापुः इति पण्डिताः कथयन्ति। गोविन्दशास्त्री इति एषां प्रथमं नाम। ते ब्रह्मविद्यासम्पन्नाः। तर्कमीमांसाव्याकरणज्योतिष्यादिशास्त्राणि वासुदेवपण्डितसकाशात् सर्वशास्त्राणि अधीत्य विद्याभ्यासकाले एव लब्धावकाशाः कीर्तनानि गायन्तः आसन्। श्रीनारायणतीर्थपादैः विरचितः कृष्णलीलातरङ्गिणीग्रन्थः वेदान्तशास्त्रग्रन्थरूपेण प्रथितः।

**लीलामानुषदेहं लक्ष्मीशं त्वां प्रसादये देवम्।**
**संसारार्णवपतितं कंसरिपो मां त्वमुद्धर त्वरया।।**[२] इति

अनन्यभक्त्या भगवन्तं प्रार्थयामास। संसारसागरात् माम् उद्धर इति तस्य त्वरां द्योतयति। श्रीकृष्णः क्षीरार्णवनिकेतनस्य अंशावतारः। मधुरापुरीमागतः इति पुराणेषु प्रसिद्धम्।

**एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः।**
**नागपर्यङ्कमुत्सृज्य ह्यागतो मधुरापुरीम्।।**[३] इति

श्रीकृष्णस्य आश्रितपारतन्त्र्यं, शरणागतरक्षणम्, आश्रितपक्षपातः, मोक्षप्रदत्वमित्यादिसकलकल्याणगुणेषु सौलभ्यमेव प्रधानमिति यशोदाविषयगोपिकानां विषये उद्धव- अक्रूरप्रभृतिषु, पाण्डवसंरक्षणे च प्रकटीचकार। अत एव श्रीविष्णुभक्तानां गृहेषु श्रीविष्णुदेवालयेषु च श्रीकृष्णमूर्तेः आराधनं प्राधान्येन क्रियते। श्रीकृष्णविग्रहं विना विष्णवालयः कोऽपि नास्ति। श्रीवेङ्कटाद्रिस्वामिनः गर्भालये च नवनीतनटस्य आराधनमपि वर्तते। अत एव कलवेणुरवावशगोपवधू[४] इति वेङ्कटेश्वरस्तोत्रे स्तुतः। श्रीकृष्णमुद्दिश्य श्रीशुकैः प्रस्तुतं श्रीमद्भागवतम्। तत्र च श्रीकृष्णस्य लीलाः बहुविधाः रमणीयाः वर्णिताः। ता एव श्रीकृष्णलीलातरङ्गिणीरूपेण श्रीनारायणतीर्थस्वामिना संस्कृतभाषायां बहुधा स्तुतः। तरङ्गो नाम ऊर्मिः। समुद्रे बहवः तरङ्गाः सन्ति। श्रीकृष्णस्य बह्व्यः लीलाः एव तरङ्गाः। तरङ्गाणाम् आकारः समुद्रः। श्रीकृष्णलीलाः बहवः अस्मिन् ग्रन्थे प्रस्तुताः। तरङ्गाः सन्तीति समुद्रस्य तरङ्गिणी इति नाम अभूत्। तथैव अयं ग्रन्थोऽपि श्रीकृष्णलीलातरङ्गिणी इति नाम्ना प्रसिद्धः। समुद्रे यदा बहवः तरङ्गाः सन्ति तथैव अस्मिन् ग्रन्थे च बह्व्यः लीलाः अभिवर्णिताः सन्ति। श्रीकृष्णः सङ्गीतरसिकः। वेणुनादविशारदः। तं स्तोतुं गानरूपेण वर्णनमावश्यकमिति मत्वा श्रीनारायणतीर्थः गातृरूपेण ग्रथितवान्।

श्रीकृष्णलीलातरङ्गिणीग्रन्थे द्वादशतरङ्गाः सन्ति। भागवतसिद्धान्ते एकादश्याः द्वादश्याश्च प्रामुख्यमस्ति। एकादश्याम् उपवासं कृत्वा द्वादश्यां पारायणं यः करोति सः भगवतः अत्यन्तप्रियः भूत्वा मोक्षं प्राप्नोति। तथैव श्रीमद्भागवते द्वादशस्कन्धाः सन्ति। भगवद्गीतायां एकादशोऽध्यायः विश्वरूपसन्दर्शनयोगः। द्वादशोऽध्यायः भक्तियोगः। अत एव श्रीनारायणतीर्थः भक्तिरूपममुं ग्रन्थं द्वादशतरङ्गात्मकं रचयामास।

श्रीरामचन्द्रः मनुष्यरूपेण स्थित्वा स्वयं श्रीमन्नारायणः इति वाचा न प्रकटितवान्। श्रीकृष्णस्तु स्पष्टतया अहं श्रीमन्नारायणः इति विश्वरूपसन्दर्शनेन तत्र तत्र बहुधा स्पष्टं प्रकटितवान्। अत एव श्रीनारायणतीर्थोऽपि चतुर्थतरङ्गे तृतीयकीर्तने वदति -

**शङ्खी स चक्री गदी पद्मी शार्ङ्गी किरीटकुण्डली।**
**श्रीवत्सकौस्तुभी दिव्यपीताम्बरो विराजते।।**[५] इति।

श्रीविष्णुसहस्रनामावल्यां -

**शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः।**
**रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः।।** इति श्लोकः विराजते।[६]

श्रीकृष्णः श्रीमन्नारायणमूर्तेः पूर्णावतारः। वेदवेद्यः सामगानलोलः। अत एव गरुडध्वजं गानरूपेण तुतोष। श्रीकृष्णस्य सञ्चारेषु गरुडवाहनः तत्र तत्र प्रस्तूयते। वेद एव गरुडरूपेण भगवन्तं बिभर्तीति पण्डिताः वदन्ति। तादृशं गरुत्मन्तं पुरतः एव प्रस्तोतुमावश्यकमिति मनसि निधाय एवं स्तौति स्म -

**अमृतकलशहस्तं श्रीपतेर्यानकेतुं**
**सुररिपुतिमिरारिं सोमसूर्यादिगीतम्,**
**अमितबलमशेषप्राणिनां प्राणभूतम्**
**निगममयशुभाङ्गं भावयाम्याप्तकामम्।।**
**वैनतेयं विराजन्तं विष्णुवाहनमुत्तमम्।**
**वैकुण्ठाश्रय मान्नायकायं गायामि कामदम्।।**[७] इति

श्रीमद्भागवते गजेन्द्रमोक्षघट्टः शरणागतत्राणपरायणत्वं प्रकटीकरोति। अत्र तु तृतीयकीर्तने सौराष्ट्ररागे **सुभद्राबलभद्रसुदर्शनसहित** .... [८] इत्यस्मिन् कीर्तने इभराज जातक इति कल्पान्तं दिदृक्षोः मार्कण्डेयस्य वटघनशायी भूत्वा स्वमहिमानं दर्शयतः श्रीकृष्णस्य विषये मार्कण्डेयः जलधिमध्यगणेशित इति यशोदा पुत्र्याः मायादेव्याः श्रीकृष्णजननकाले साहाय्यं कुर्वत्याः अष्टस्थलेषु सकलजनपूज्यतां कृष्णेन वररूपेण गृहीतवत्याः स्फुरणार्थम् अष्टदुर्गापरिवेष्टिता इति सूचयति स्म।

**श्रीमद्भागवते मुख्यघट्टाः**

श्रीमद्भागवते मुख्यघट्टाः श्रीकृष्णावतारघट्टः, श्रीकृष्णस्य गोकुलनिवासः, बाललीलाकथाः, गर्गाचार्येण नामकरणं, यमलार्जुनभञ्जनं, कालीयमर्दनं, बकादीनां वधः, दावानलभक्षणं, गोपिकावस्त्रापहरणं, गोवर्धनोद्धरणं, गोपिकागीताः, अक्रूरानयनं, कुब्जानुग्रहः, कुवलयापीडवधा, कालयवनादिवधा, रुक्मिणीसन्देशः, श्रीकृष्णकल्याणम् इत्यादिप्रधानघट्टाः एव द्वादशतरङ्गेषु सरसं प्रस्तुताः। भागवतगोष्ठीषु परमाह्लादेन भगवदनुभवं सरागमनुभवितुमावश्यकविशेषाः एतेषु घट्टेष्वेव सन्तीति निश्चप्रचम्।

**श्रीकृष्णलीलातरङ्गिण्यां भक्तितत्त्वम्**

महाविष्णुः विराजते। महालक्ष्मी महीयुततया इति। शङ्कराभरणं नाम मङ्गलकरमाभरणम्। शङ्करस्य च अपि आभरणमिति स्फूर्तेः भगवदवतारं स्तोत्रयामास। एवं भगवति प्रसन्ने प्रणिपातपूर्वकं महाविष्णुं प्रति धरण्युवाच -

**शरणमुपगताऽहं त्वां शरण्यं जनानां**
**निखिलभयवियोगं योगिचिन्त्यं महान्तम्।**
**सुररिपुगणभारं दुस्सहं दुर्भरं मे**
**परिहर परमात्मन् भक्तिसिद्धैकमूर्ते।।**[९] इति

भूभारं परिहृत्य मां पाहि इति धरणीं प्रार्थयामास। **शरणं भव करुणां मयि कुरु दीनदयालो** ....[१०] इत्यस्मिन् कीर्तने हरमामकदुरितम् इति वाक्ये दुष्टानां वहनमपि भूमेः स्वकृतपातकमिति द्योतयन् स्वकृत दुरितं परिहरेति नारायणतीर्थः प्रार्थयामास। मध्यमावतीरागेण - आदिताले

**निर्गतमोहतिमिरे निर्मलमानसो नित्यम्।**
**स्वर्गापवर्गाधिकारि गर्गाचार्यो विराजते।।**[११] इति

गर्गाचार्यस्य मोहाद्यभावः निर्मलमानसत्वं, सर्गापवर्गाधिकारित्वं वर्तते इति आचार्यलक्षणं निरूपितम्। श्रीमद्भागवते पूतनासंहरणानन्तरं यशोदादयः श्रीकृष्णस्य रक्षां चक्रुः। अव्यात् अयोघ्रिमहिमाविशिष्टस्तोत्रेण विष्णुरेव बहूनामपि रक्षायै स्तुतः। अत्र तु गङ्गाधरविष्णुदुर्गासरस्वतीगर्गाधरादयः रक्षन्तु इति रक्षां चक्रुः।

**बालगोपालकृष्ण पाहि पाहि** ....[१२] इति मोहनरागेण आदितालकीर्तने प्रथमचरणे मीनाङ्ककोटिमोहन इत्यत्र -

**तासामाविरभूत् शौरिः स्मायमानमुखाम्भुजः।**
**पीताम्बरधरस्त्रग्वी साक्षान्मन्मथमन्मथः।।**[१३]

पुराणोक्तभावं प्रमाणीकरोति। द्वितीयचरणे विष्णुसहस्रनामोक्त यज्ञ यज्ञ संरक्षण .... इति यज्ञो वै विष्णुः इत्युपनिषद्वचनं, तृतीयचरणे **प्रत्यस्तमितभेदकन्दपालित-**

**नन्दनन्द सुन्द**... इत्यत्र प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् इति विष्णुपुराणोक्तवचनं च द्योतयति।

**आवरणं मम न हि ते दातु भावय गोपवधूजनबृन्द**.... [१४] इत्यस्मिन् कीर्तने कृष्णस्य गोपिकानां च सम्भाषणमतिमधुरं, सरसं, वेदान्तगर्भितं च। अस्मिन् कीर्तने आवरणं नाम वस्त्रम्, अज्ञानं च प्राकृतशरीरं च। षष्ठचरणे लोक अलोकन विहितावरणं जनैः अदर्शनीय वस्त्रं देहि इति बाह्यार्थः। लोकैः द्रष्टुमशक्यं दिव्यमङ्गलविग्रहं देहि इति गूढार्थः। सप्तमचरणे लोकस्यावरणं न विधातुं लोके कोऽपि समर्थः पुरुषः इत्यत्र दर्शनं विधातुं लोके कोऽपि न समर्थः इति बाह्यार्थः। मम माया दुरत्यया इति गीतावचनानुसारम् अज्ञानरूपां मायां विधातुमहमेव समर्थः। अन्यः कोऽपि न समर्थः। मायातत्त्वमपि ममाधीनमेव इति गूढार्थः। तृतीयचरणे नीतं नैव मया परकीयं नावममावरणं निजदृट्या .... परकीयवस्त्रं मम सन्निभं नास्तीति बाह्यार्थः। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्थितः इति नारायणसूक्तवचनरीत्या भगवतः इदं सर्वमपि शरीरमेव। अतः भगवतः परकीयमावरणं नास्तीति गूढार्थः।

बृन्दावनमधुनामन्ये सखि .... [१५] इत्यस्मिन् कीर्तने बृन्दावनवर्णनं, बृहदारण्यकोपनिषद्रूपमिव वर्णनम्। बृन्दावनं बृहदारण्यमिति मन्ये। अनुपल्लव्यां सुन्दरवंश (वेणु) नादेन सम्यक् सूचितस्वरूपानन्दः ज्ञानञ्च शाश्वतपरमपुरुषनिवासेन युतं बृन्दावनम्। सप्तांशीययोगीनां वाक्यैः सम्यक्सूचितस्वरूपानन्देन ज्ञानेन शाश्वतस्य परमपुरुषस्य अस्तित्वबोधकबृहदाण्यकोपनिषद्रूपेण बृन्दावनमुत्प्रेक्षितम्। प्रथमचरणे परमानन्देन समानरुचिमत्फलैः युताभिः शाखाभिः वृक्षाः बृन्दावने सन्ति। वाजसनेयशाखायां बृहदारण्यकोपनिषद् अत्यन्तमुत्तमतया वरीवर्ति। तदुपनिषद् परब्रह्मनिर्णय एव फलं तेन आनन्दः जायते। देवेन्द्रेण च स्तुतस्य परमात्मनः निवासेन संसारतरणाय एतदुपनिषद्भागः पुण्यात्मनामत्यन्तमनोहरः दृश्यते। बृन्दावनं च श्रीकृष्णनिवासेन संसारतरणाय पुण्यात्मनां मनोहरं क्षेत्रं दृश्यते।

द्वितीयचरणे बृन्दावनं सर्वव्यापिनः श्रीकृष्णस्य निवासः भूत्वा शोकमोहोपहारी, उत्पत्तिविनाशरहितम्, उत्तमसदैकरूपं, मोक्षप्रदं, महेश्वरसेवितञ्च भवति। बृहदारण्य-

कोपनिषद्भागः सर्वव्यापिनः परमात्मनः निवासस्थानम्। शोकमोहापनोदनः उत्पत्तिविनाशरहितः। उत्तमः, स्वतस्सिद्धः, मोक्षप्रदः, सर्वप्रपञ्चाश्रयः। मुनीश्वरसेवितः।

तृतीयचरणे स्वश्रतिकलत्रादिनिमित्तं सम्पादितधनादिषु वैराग्यकरं परमहंसैः निर्मलमनःप्रवृत्तिभिः विलसितं सरसं बृन्दावनं बृहदारण्यकोपनिषद्भागः। स्वसुतकलत्रादि- निमित्तं सम्पादितेन धनादिकज्ञानेन वैराग्यं जनयति। प्रसिद्धसन्न्यासिवरैः नियतमनोवृत्तिभिः अध्यवसितः सरसः।

चतुर्थचरणे शत्रुसंहाररहितम्। परमयोगिनं परिपूर्णब्रह्मानुभवभक्तियोगजनकं बृन्दावनम्। कामक्रोधादिशत्रुरहिततया परमयोगिनां परिपूर्णब्रह्मानुभवभक्तियोगविशेष-जनिका बृहदारण्यकोपनिषदिति उत्प्रेक्षितम्।

**सर्वप्रत्यञ्चमेकं प्रकृतिमखिलभावं....**[१६] इत्यस्मिन् श्लोके मायाऽपि वेदान्तशास्त्रं सम्यक् विमृश्य सदाचार्यानुग्रहादेव श्रीकृष्णस्य यथार्थं तत्त्वं परिजानन्ति। न चेदाचार्यानुग्रहमशक्ताः अवगन्तुम् एषः श्रीकृष्णः एतस्य प्रपञ्चस्य सकलस्य कलशस्य मृदिव उपादानं कारणम्। सकलफलार्थानामवगमनाय उपयुक्तज्ञानम्, आनन्दश्च अस्य महात्मनः स्वरूपाणि। स्वभावविकारोन्तः एते जीवाः सर्वे अस्मादभिन्नाः। सकलप्रपञ्चमयस्य सकलजनहृदयेषु निवसतः अस्य प्रपञ्चसम्बद्धविकाराः अस्पृश्याः। सर्वपदार्थेषु स्थितोऽपि आकाशः तद्गतविकारैः यथा न सम्बध्यते तथैव अयमपि भक्तरक्षकः निर्मलः वसतीति नृत्यपूर्वकं गोपिका जगौ इति वेदान्तरहस्यमुवाच।

कल्याणिरागेण आदिताले अक्रूरो गमयति मधुरामच्युतमिह सखिसुतरां[१७] इत्यस्मिन् कीर्तने अनुपल्लव्यां सक्रूरो मायावी तस्य साहसम् अथ सखि पश्य इत्यत्र भागवते -

**क्रूरस्त्वक्रूरसमाख्ययास्मन् मनस्चक्षुर्हि दत्तं हरसेवताज्ञवत्।**
**मैतद्विधस्याकरुणस्य वामभूधक्रूर इत्येतदतीव दारुणः।।**[१८]

इत्ययं श्लोकभागः व्यक्तः।

द्वादशतरङ्गे रुक्मिणीकल्याणमहोत्सववर्णनेन शुभेन ग्रन्थसमाप्तिः क्रियते। सावेरीरागेण - **अटताले काङ्क्षे तव प्रसादं गोपालबाल केवल मे वाहं**[१९] इति कीर्तने श्रीकृष्णागमनं प्रति स्वस्या एव काङ्क्षा न तु पुत्रादीनामिति प्रकटनमभिवदति।

द्वितीयचरणे त्वरया नय मां स्वगेहम् इति च याचते। नारायणतीर्थपादा: भगवत: लीलान्, भक्तवात्सल्यं करुणार्द्रहृदयम्, अस्माकं कृते मनोरञ्जकतया व्यवृण्वन्।

**अकलङ्क: कमलाप्तस्सौम्यश्शौरिर्भवांस्तु सकलङ्क:।**
**कमलारिरुग्रमुलै: कथमिन्दो तवाप्यहोविधुनाम्।।**[२०]

इत्यस्मिन् श्लोके नन्दोपलम्बने विधु: इति नाम्ना विष्णो: सार्थक्यम्। चन्द्रस्य अनर्हत्वमुक्तम्। भैष्म्या: पाणिसरोरुहाञ्जलिगत... [२१] इत्यस्मिन् श्लोके सीता कल्याण-स्थितजानक्या: कमलाञ्जलिपुरो... [२२] इति श्लोकस्यानुकरणं दृश्यते।

**उपसंहार:**

एवं रूपेण श्रीनारायणतीर्थयतीन्द्रपादा: श्रीकृष्णस्वामिनमधिकृत्य श्रीकृष्णलीलातरङ्गिणीग्रन्थं विरचितवन्त:। एवं तत्तद्घट्टानां वर्णने सहजाद्भुततया तथा श्रवणसुभगतया सस्वरं तत्तद्श्लोकान् कीर्तनाश्च रचयितुं नान्यत् कारणं दृश्यते भक्तिं विना। भक्ते: कारणादेव सहजगानपाण्डितीप्रकर्ष: सिध्यति। गानेनैव भगवान् प्रसन्नो भवति। तत्र प्रमाणं तु -

**नाहं वसामि वैकुण्ठे न योगिहृदये रवौ।**
**मद्भक्ता: यत्र गायन्ते तत्र तिष्ठामि नारद।।** [२३]

हे नारद वैकुण्ठे न वसामि। योगिनां हृदयेषु अपि न वसामि। किन्तु मम प्रियभक्ता: यत्र गायन्ति तेषां हृदये एव वसामि। एतद्भगवद्वचनेन गानमेव सर्वोत्कृष्टयोगमिति स्पष्टं प्रतिभाति।

## सन्दर्भा:


१. भ.सं. त.ल २७
२. श्री कृ.ली.त ३ त.१५ श्लो
३. ह.वं.३
४. श्री.वे.स्त्रो .५
५. श्री.कृ.ली.त. ४त. ३की
६. श्री.वि.स.स्तो.२०७
७. श्री.कृ.ली.त २-३,४
८. श्री.कृ.ली.त. २त - ३की)
९. श्री.कृ.ली.त १त . २४ श्लो
१०. श्री.कृ.ली.त १त - १६
११. श्री.कृ.ली.त. २त - ५की
१२. श्री.कृ.ली.त. ३त २३ की

१३. श्री.कृ.ली.त.३त.२३की.१ च
१४. श्रीकृ.ली.त ४त. ३की
१५. श्री.कृ.ली.त. ६त. ३की
१६. श्री.कृ.ली.त.८त - ४ श्लो
१७. श्री.कृ.ली.त ९त. ७ की
१८. भा.ग.२० - ३९
१९. श्री.कृ.ली.त १२ त - ७की
२०. श्री.कृ.ली.त. १२त. १४ श्लो
२१. श्री.कृ.ली.त. १२त - ४७ श्लो
२२. लग्नाष्टकम्
२३. ग.भा.६

## परिशीलितग्रन्थसूची


१. गानभास्करम् - विद्वान् कन्दाड श्रीनिवासय्यर

२. भक्तिसङ्कीर्तनातरङ्गलहरी - श्रीगालिरघुवरप्रसाद:, वैष्णवी लेजर् ग्राफिस्, हैदराबाद

३. हरिवंशम् - श्री आर्. अनन्तपद्माराय:, भारद्वाज बैण्डिग वर्क्स, राजमण्ड्री

४. श्रीविष्णुसहस्रनामस्तोत्रम् - श्रीपतिस्तुतिमाला, जिय्यर एड्युकेषन ट्रस्ट, सीतानगरम्, गुण्टूरु

५. श्रीमद्भगवद्गीता - पं वशीधरमिश्रा (व्याख्या) सम्पीर्णानन्दविश्वविद्यालय:, वाराणसी,२०००

६. विष्णुपुराणम् - कल्लूरि वङ्कटसुब्रह्मण्यदीक्षित:, श्रीवङ्कटेश्वरार्षभारती ट्रस्ट, हैदराबाद, १९७४

७. श्रीवेङ्कटेश्वरस्तोत्रम् - श्रीपतिस्तुतिमाला, जिय्यर् एड्युकेषन ट्रस्ट, सीतानगरम्, गुण्टूरु

८. भागवतमहापुराणम् - श्री वीरराघवीव्याख्योपेतम्, श्रीत्रिदण्डि श्रीमन्नारायण-रामानुजजिय्यरस्वामीमुद्रितम्, विजयमुद्रशाला, चित्तूरु

९. श्रीकृष्णलीलातरङ्गिणी - वाविल्लरामस्वामिशास्त्रुलु अण्ड् सन्स्, २६, रामानुज अय्यर वीधि, मद्रास

१०. बृहदारण्यकोपनिषत् - रचयिता - श्रीराघवेन्द्रतीर्थ:, सम्पादक: - डा.ए.वि. नागसम्पिगे, एम्.ए.पिहेच्.डि, निर्देशक: - पूर्णप्रज्ञासंशोधनमन्दिरम्, बेङ्गलूरु-२८

ISSN: 2231-0452

# संस्कृतोपलब्धौ शिक्षणक्षमतायाः प्रभावः

*शुभश्री दाश*
*(शोधच्छात्रा, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**उपोद्घातः (Introduction)**

व्यक्तिः स्वानुभवेन प्रतिक्षणं किमपि शिक्षते एव । शिक्षया व्यक्तिव्यवहारेषु परिवर्त्तनं दृश्यते। परिवर्त्तनमिदं यदि कक्ष्याशिक्षणेन आधारितं चेत् शिक्षणेनाभिप्रेरितं भवति। शिक्षणद्वारा ज्ञानविकासः जायते। तदधिगम एव उपलब्धिः। उपोपसर्गात् डुलभष् प्राप्तौ इति धातोः क्तिन् प्रत्यये कृते उपलब्धिरिति पदं निष्पद्यते। अधिगमप्रक्रियायां यः परिणामः जायते, या सफलता प्राप्यते तदुपलब्धिनाम्नाऽभिधीयते। स्तराधारेण छात्राणामुपलब्धौ अपि भेदाः दृश्यन्ते, कारणं शिक्षाग्रहणाय समानमानसिकयोग्यता-सम्पन्नच्छात्राः नागच्छन्ति। मानसिकयोग्यताधारेण छात्राणामुपलब्धिः वैविध्यं धत्ते। अर्जितज्ञानमूल्याङ्कनाय उपलब्धिपरीक्षा भवति। उपलब्धिपरीक्षायाः अर्थः बहुभिः बहुधा स्पष्टीयते। P.D.Pathak महोदयः निगदति यत् यस्याः साहाय्येन विद्यालये पाठ्यमानेषु विषयेषु शिक्ष्यमाणेषु कौशलेषु छात्राणां सफलताज्ञानं वा उपलब्धिज्ञानं प्राप्तुं शक्यते, सैव उपलब्धिपरीक्षा इति। Garrison महोदयः "The achievement test measures the present ability of the child on the external of his knowledge in a specific content area" इति अवादीत्। उपलब्धिपरीक्षानिर्माणं प्रामुख्येण छात्राणाम् अधिगमस्वरूपमापनाय सीमास्वरूपमापनाय च क्रियते। Thorndike, Hagan महोदयौ "When we use an achievement test, we are interested in determining what a person has learned to do after he has been exposed to a specific kind of instruction." इति परिभाषेते। ज्ञानम्, उपलब्धिः, प्रमा इति

एतत्सर्वम् अनर्थान्तरं भवति। संस्कृतवाङ्मये इमे शब्दा: परस्परं पर्यायेण प्रयुज्यन्ते। यद्यपि शास्त्रकारा: क्वचित् ज्ञानस्य द्वैविध्यमङ्गीकुर्वन्ति तथाऽपि, प्रायेण दर्शनेषु एकविधमेव ज्ञानमङ्गीक्रियते। अर्जितं ज्ञानं बुद्धिसहकृतेन व्यक्तिविशेषेण समुपजातं भवति। अत: मनोविज्ञाने ज्ञानम् उपलब्धि: इति भेद: दृश्यते। इदमर्जितं ज्ञानं व्यवहारपरिवर्तनहेतुभूतं पूर्वम् अविद्यमानं सत् सम्प्रति प्रत्यग्गोचरं भवति तदुपलब्धिरिति मनोविज्ञानिनां मतम्। इयमुपलब्धि: व्यवहारेणैव अनुमेया भवति। उपलब्धिरियं ज्ञानात्मिका कौशलात्मिका अनुभूत्यात्मिका च भवितुमर्हति। ज्ञानात्मकोपलब्धि: अज्ञानज्ञान-स्मरणादिभि: चिन्तनादिसम्प्रवर्तनेन तत्प्रकाशनेन च ज्ञायते। अनुभूत्यात्मकोपलब्धिश्च हावभावादिषु शाब्दिकशारीरिकचेष्टादिषु च अभूतपूर्वपरिवर्तनेन परिमाप्यते ज्ञायते वा। तथैव कौशलात्मकोपलब्धि: शाब्दिकाशाब्दिकव्यवहारै: प्रत्यक्षतां याति। एवञ्च प्रतिजीवं स्वतस्सिद्धेन स्वयंप्रकाशेन ज्ञानेन यत् खलु जन्मजातमिति परिकीर्त्यते किञ्चित् पारिस्थिति-कतन्त्रमाश्रित्य विनूतनाज्ञातपूर्वञ्च परिज्ञायते। इदं हि परिज्ञानम् उपलब्धिशब्दभाग् भवति।

**का नाम उपलब्धि: ? (What is achievement ?)**

उपलब्धिर्नाम अधिगन्त्रा समर्जितस्य ज्ञानस्य परिमाणं भवति। उपलभ्यते इति उपलब्धि: इति स्पष्टो भवति। शिक्षणेन अनुदेशनेन वा अधिगन्ता यत् किञ्चित् गृहणाति रक्षति च। सामान्यतया कक्ष्याया: वातावरणं विविधरूपेण सङ्घटितं सत् नानाक्रियाणां समन्वयकं भवति। अत्र शिक्षकक्रिया:, छात्रक्रिया: पारस्परिकक्रियाश्च अन्तर्भवन्ति। यत्र च सम्प्रेषणं, ग्रहणं, चिन्तनम्, अधिगम: मूल्याङ्कनमिति बहूनि तत्त्वानि प्रामुख्यं भजन्ते। अस्यां प्रक्रियायाम् अधिगन्तार: विवेकेन परस्परं तत्त्वानां पार्थक्यं विज्ञाय तदनुसारेण विविधा: क्रिया: निर्वर्तयन्ति। इमा: क्रिया: अभिगन्तृकौशलमाश्रित्य वर्तन्ते। कक्ष्यावातावरणश्च अधिगन्तृकौशलस्य सम्प्रेरकं, तदनुकूलं, समस्यासमाधानात्मकं मनोविज्ञानसङ्घटनात्मकञ्च भवति। अत एव विद्यालयेषु कक्ष्यावातावरणे तदितरपरिस्थितौ च नाना उपलब्धय: अधिगन्तॄणां स्वानुभवस्य आधारेण दृष्टिपथं यान्ति। कक्ष्यावातावरणस्य अनन्यत्वात् परिवारापेक्षयाऽपि तस्मिन् उपलब्धीनाम् आधिक्यं गुणवत्ता च दृश्यते। इयमुपलब्धि: अनुभवजन्यैव भवति। यद्यपि अनुभव: उपलब्धि: ज्ञानम् इति एतत्सर्वं

समानमेव तथाऽपि प्रवाहन्यायेन प्रथमतरङ्गः इव अनुभवः, उत्तरोत्तरतरङ्गाः इव उपलब्धयः भवन्ति। सोऽयं सूक्ष्मः कश्चन भेदः मनोविज्ञानिभिः अङ्गीक्रियते। उपलब्धिः नाम इदं तत्त्वं कक्ष्यावातावरणे सन्दृश्यमानं भेदम् आश्रित्य अधिगन्तृषु अपि भेदं जनयति। उत्तमञ्च वातावरणम् उत्तमोपलब्धिं, सामान्यञ्च सामान्योपलब्धिम्, अधमञ्च अधमोपलब्धिं जनयति।

**उपलब्धिसम्प्रत्ययः (Concept of Achievement)**

उपलब्धिरिति सम्प्रत्ययः बहून् विषयान् अन्तर्भाव्य वर्तते। तदुक्तम् - Dreeban महोदयेन "It usually denotes activity and mastery, making an impact on the environment rather than statistically accepting it and competing against some standard of excellence." विद्यालये पाठ्यमानेषु विषयेषु यावान् अंशः ज्ञानभागः कौशलभागो वा अधिगन्त्रा समर्जितः तावान् अंशः उपलब्धिः इति नाम्ना व्यवह्रियते। या च परीक्षा प्राप्ताङ्कैः व्यवहारपरिवर्तनेन च स्पष्टं ज्ञायते। तथा च शैक्षिकोपलब्धिर्नाम वैदुष्यस्य कश्चन निर्दिष्टः स्तरः भवति। अयञ्च स्तरः शिक्षकनिर्मित-परीक्षाभिः प्रमापितपरीक्षाभिः उभयविधपरीक्षाभिर्वा निश्चीयते।

वस्तुतः विद्यालयेषु उपलब्धिरिति शब्देन किमभिप्रेयते इति चेत् शिक्षणोद्देश्यानां सम्प्राप्तिस्तरः एव उपलब्धिशब्देन सन्दर्शितः भवति। कक्ष्याविशेषस्य निर्दिष्टपाठ्यांशस्य कानिचन शैक्षिकोद्देश्यानि सम्भाव्यन्ते। तेषाम् उद्देश्यानाम् अधिगतिरेव शिक्षणाधिगम-प्रक्रियायाः लक्ष्यं भवति। एवञ्च उपलब्धिर्नाम तानि शैक्षिकोद्देश्यानि कियत् पर्यन्तं छात्रैरधिगतानि इति सूचनादण्ड एव भवति। इमानि उद्देश्यानि एव पाठ्यचर्यायाः लक्ष्यभूतानि भवन्ति यानि च छात्रेषु अपेक्षितं परिवर्त्तनं सम्भावयन्ति। तथा च कस्यचित् ज्ञानांशस्य कौशलांशस्य वा निष्पादनसामर्थ्यस्य सम्प्राप्तिरेव उपलब्धिः भवति। इदमत्र अवधेयं भवति योग्यता उपलब्धिश्च समाने न भवतः इति। यतः योग्याता तु उपलब्धेः उपादानकारणं भवति, न तु कार्यम्। अर्थात् उपलब्धिर्नाम व्यक्तिविशेषेण अर्ज्यमाना, योग्याता नाम

मानसिकी शारीरिकी वा आन्तरिकी क्षमता। यद्यपि उपलब्धिः योग्यतामाश्रित्य वर्तते तथापि योग्यता एव उपलब्धेः एकमात्रनिमित्तकारणं न भवति अपि तु कारणेषु अन्यतमतां भजते।

**उत्तमोपलब्धौ शिक्षकस्य भूमिका (The role of Teacher in good achievement)**

यदि कश्चित् अध्यापकः बहुभ्यः वर्षेभ्यः शिक्षकव्यवसायेन सम्बद्धः तर्हि सः प्रायेण विद्यालयवातावरणेन सुपरिचितो भवति। अयं परिचयः इदं ह्यनुबन्धनं तस्मिन् सफलैः अनुभवैः स्वीये व्यवसाये साफल्यम् आददाति। येन शिक्षकोऽधिगन्तारं यथोचितं मार्गं दिशति। अनुभविनः शिक्षकाः छात्रैस्सह उत्तमसाहचर्यसम्पादने सफलाः, छात्रेषु उत्तमाम् उपलब्धिं जनयितुं च समर्थाः इति। केचित् छात्राः शिक्षकं शिक्षणं च प्रति प्रतिकूलमभिप्रायं धारयन्तोऽपि उत्तमोपलब्धिस्तरम् अध्यगच्छन्। एवम् अनुकूलमभिप्रायं धारयन्तः छात्राः न सर्वदा उत्तमोपलब्धिभाजः दृष्टाः। संस्कृत-शिक्षकाणां शिक्षणक्षमतायाः संस्कृतछात्राणां संस्कृतविषयकोपलब्धेश्च मिथः सम्बन्धः वर्त्तते।

अत्र शिक्षणक्षमता नाम संस्कृतशिक्षकाणां शिक्षणक्षमता एव। छात्रोपलब्धिश्च संस्कृतछात्राणां संस्कृतविषयकोपलब्धिमेव निर्दिशति।

**उपलब्धिपरीक्षायाः उद्देश्यानि (Objectives of Achievement Test)**

१. पाठ्यमानेषु विषयेषु बालकानां ज्ञानस्य सीमामापनम्।

२. पाठ्यक्रमस्य लक्ष्यप्राप्तये वा उद्देश्यप्राप्तये बालकप्रगतेः ज्ञानम्।

३. शिक्षकस्य शिक्षणसफलतायाः अनुमानम्।

४. बालकानां विभिन्नविषयेषु क्रियासु वास्तविकस्थितेः ज्ञानम्।

५. बालकोपलब्ध्या सामान्यस्तरनिर्धारणम्।

६. बालकेभ्यः ज्ञानस्य विभिन्नक्षेत्रेषु दीयमानप्रशिक्षणपरिणामस्य मूल्याङ्कनम्।

**उपलब्धिपरीक्षायाः प्रकाराः (Types of Achievement Test)**

उपलब्धिपरीक्षा द्विविधा। यथा - प्रमापितपरीक्षणम्, शिक्षकनिर्मितपरीक्षणम्। शिक्षकनिर्मितपरीक्षणं द्विविधं यथा - आत्मनिष्ठपरीक्षणम्, वस्तुनिष्ठपरीक्षणम्।

**शिक्षकनिर्मितपरीक्षणम्**

उपलब्धिपरीक्षणार्थं शिक्षकेण प्रश्नपत्रनिर्माणं क्रियते। शिक्षकनिर्मितपरीक्षणं द्वेधा विभक्तुं शक्यते यथा - आत्मनिष्ठ,वस्तुनिष्ठपरीक्षणञ्चेति। सामान्यरूपेण शिक्षकैः सर्वेषां विषयाणामुपरि परीक्षणार्थं प्रश्नपत्रं निर्मीयते। सर्वेषां शिक्षकाणां योग्यतायां समानाभावात् शिक्षकनिर्मितपरीक्षणस्तरे वैविध्यं दृश्यते। अतः तेन छात्राणां मूल्याङ्कनं सार्थकतया न भवति।

**आत्मनिष्ठपरीक्षणम् (Self Test)**

आत्मनिष्ठपरीक्षणं मौखिकपरीक्षा-निबन्धात्मकपरीक्षाभेदेन द्विविधं वर्तते।

**मौखिकपरीक्षा (Oral Test)**

मौखिकपरीक्षा प्राचीनकाले उपलब्धिपरीक्षणस्य सर्वोत्तमसाधनमासीत्। तत्र छात्रस्य मूल्याङ्कनाय सर्वः क्रियाकलापः मौखिकः आसीत्, परन्तु आधुनिकयुगे लिखितपरीक्षायाः प्रचलनात् मौखिकपरीक्षायाः महत्त्वं ह्रसति। तथाऽपि प्राथमिककक्ष्यासु उच्चकक्ष्यासु प्रायोगिकपरीक्षासु, विज्ञानविषयेषु नियुक्त्यर्थं साक्षात्कारेषु च मौखिकपरीक्षायाः नितराम् उपयोगिता अवलोक्यते।

**निबन्धात्मकपरीक्षणम् (Essay type Test)**

लिखितपरीक्षायां निबन्धात्मकपरीक्षणं प्रचलत्सु उपलब्धिपरीक्षणेषु सर्वोत्तमसाधनं वर्तते। अत्र अध्यापकाः प्रश्नान् निर्मान्ति। छात्राः निबन्धरूपेण उत्तरं प्रयच्छन्ति। अतो निबन्धात्मकपरीक्षणमिदं कथ्यते। दोषगुणसम्मिश्रितनिबन्धात्मक- परीक्षणं सम्यग्दृष्ट्या

यदि विचार्यते तर्हि तस्य महती उपयोगिता इदानीमपि परीक्षाव्यवस्थासु अवलोक्यते।

**वस्तुनिष्ठपरीक्षणम् (Objective type Test)**

वस्तुनिष्ठपरीक्षणे उत्तराणि निश्चितानि भवन्ति। अत्र अङ्कनिर्धारणे साम्यता भवति। वस्तुनिष्ठपरीक्षणस्य रचना-प्रयोग-अङ्कनादिविषये बहुमौलिककार्यं विधत्तम्।

**संस्कृतक्षेत्रे उपलब्धिपरीक्षा (Achievement Test in Sanskrit)**

सुप्राचीनसंस्कृतभाषायामुपलब्धिपरीक्षायाः शैली अपि सुप्राचीना दृश्यते। तत्र बाह्यान्तरिकोपलब्धिपरीक्षे प्रामुख्यमभजताम्। बाह्योपलब्धिपरीक्षणं पाठितविषयक-ज्ञानं समीक्षते। आधुनिकोपलब्धिपरीक्षा लिखितरुपा प्राचीनकाले आसीत्। तत्काले उपलब्धिपरीक्षा पूर्णतया मौखिक्येवासीत्। कारणं प्रामुख्येण उपलब्धिपरीक्षायाः साफल्यं कण्ठस्थीकरणमध्यतिष्ठत्। उपलब्धिज्ञानाय सततमौखिकपरीक्षा आचार्यैः व्यधीयत। परन्तु छात्राणामध्ययनसमाप्त्यनन्तरं छात्रोपलब्धिपरीक्षणं विद्वत्सभया अन्वस्थीयत। तत्र विद्वद्भिः प्रश्नाः अपृच्छ्यन्त, छात्रैः मौखिकरूपेण समाधीयन्त। प्राचीनकाले संस्कृतोपलब्धिपरीक्षणं शलाकया वा शास्त्रार्थमाध्यमेन जायते स्म। इदानीं संस्कृतोपलब्धिपरीक्षणे आधुनिकरूपं सन्दृश्यते। साधारणविद्यालयेषु प्रवेशिकाद्युपलब्धिपरीक्षासु च वस्तुनिष्ठप्रश्नाः बाहुल्येन उपयुज्यन्ते।

**शिक्षणक्षमता (Taching Competency)**

शिक्षणस्य परिणामः एव विकासस्य मूलमन्त्रः स यस्मिन् कस्मिन् क्षेत्रे भवतु। शिक्षणस्य परिणामः अधिगमनाम्नाभिधीयते। व्यवहारेषु उत्तरोत्तरसामञ्जस्य- पूर्णप्रक्रिया एव अधिगमः। अतः शिक्षणमेका जटिलप्रक्रिया वर्तते। यावत् शिक्षणं सरलं रुचिकरं बोधगम्यं पथप्रदर्शकञ्च न भवति, तावत् अधिगमः साधुः न जायते। तावत् साध्याधिगमस्य साफल्यं साधनशिक्षणप्रक्रियामाश्रित्य वर्तते। शिक्षणस्य साफल्यार्थं विषयज्ञानमेव बहु आवश्यकमिति। विषयज्ञाने सति शिक्षणस्य साफल्यार्थं प्रभावकारकाणां कौशलानां उपयोगिता वर्तते इति कविकुलगुरुः कालिदासः न्यगदत्।

योग्याध्यापक: विषयज्ञाने, तदाविष्कारे च दक्ष: भवेत्। अध्यापकस्य कृते पाण्डित्यं केवलं नास्ति पर्याप्तम् अपि तु स: वाक्चतुर:, प्रत्युत्पन्नमति:, तार्किक: रुच्युत्पादकश्च भवेत्। शिक्षाया: साफल्यं तावत् शिक्षणक्षमतामाश्रित्य वर्तते। यत: क्षमताविहीनं शिक्षणं न क्वापि साफल्यमापादयति। साम्प्रतिकसमये शिक्षणं प्रविधियुक्तं वर्त्तते। प्रविधियुक्तं शिक्षणमपि शिक्षणक्षमता वक्तुं शक्यते, यत्र प्रभाव्यध्यापकस्य लक्षणं वर्तते तदापि प्रशिक्षणे न अवाप्यते। प्राचीनकाले शिक्षका: वंशानुक्रमाधारेण जन्मत: स्वयंसिद्धा: आसन्। न काऽपि शिक्षणयोग्यता आसीत्। परन्तु शिक्षणप्रविधि: कस्मिन्नपि शिक्षणं क्षमतास्तरे कस्यामपि व्यक्तौ शिक्षणकौशलविकासाय सम्भाव्यं स्पष्टरुपेण प्रस्तौति। अत: शिक्षणकौशलविकासस्य सम्भाव्यतां विविच्य बह्व्य: शिक्षकप्रशिक्षणसंस्था: व्यवस्थाप्यन्ते। याभि: संस्थाभि: बहव: प्रशिक्षिताध्यापका: निष्पाद्यन्ते। शिक्षणशक्तिर्भवति शिक्षणक्षमता, यत: शिक्षणक्षमता शिक्षकप्रभाव:, शिक्षकसामर्थ्यं, शिक्षणसाफल्यं, शिक्षकयोग्यता इति बहव: शब्दा: अनर्थान्तरे प्रयुज्यन्ते, अनेन विवाद: जागर्ति। शिक्षणक्षमतामाध्यमेन शिक्षक: तात्कालिकपरिणामं वा दीर्घकालिकपरिणामं वा अवधत्ते किं पूर्वनिश्चितशिक्षणक्षमताधारेण परिणामनिष्पादनाय विभिन्नविद्यालयेषु, विभिन्नप्रकृतिनिष्ठच्छात्रेषु, विषयेषु, स्तरेषु अध्यापका: व्यवहरिष्यन्ति इति अत्र यद्यपि विवाद: जागर्ति तथापि शिक्षणक्षमता छात्रोपलाब्धिं प्रभावयति इत्यत्र नास्ति विप्रतिपत्ति:। प्रभाविशिक्षक: न तु केवलं स्वविषयस्योपरि दक्ष: स्यात् अपि तु शिक्षणक्षमताऽधिकारी स्यात्। शिक्षणक्षमता छात्रोपलब्ध्या परिमाप्यते। सफलाधिगम: सफलशिक्षणस्य परिणाम: सफलशिक्षणं शिक्षणक्षमताधीनं वर्तते।

**उपसंहार: (Conclusion)**

सफलशिक्षणं तदेव शिक्षणं यत् प्रभावपूर्णाधिगमं सङ्घटयति। तत्र को विधि: का प्रक्रिया व्यवह्रियते इति सैद्धान्तिकप्रश्न: नास्ति। शिक्षणक्षमतया शिक्षणं प्रभावि छात्रोपकारि च भवति। शिक्षकयोग्यता प्रतिपादनाय प्रभाविशिक्षणकारकं प्रामुख्यं निर्वहति। प्रभाविशिक्षकै: विद्यालयस्य गौरवसंवर्धने राष्ट्रविकासपथि संस्करोति। योग्यशिक्षका: राष्ट्रस्य नागरिकाणां विकास्योत्तरदायित्वं निर्वहन्ति। गुणवद्भि:

योग्यनागरिकैः राष्ट्रस्य प्रगतिर्जायते, राष्ट्रस्य प्रगत्या योग्यनागरिकाः, योग्यनागरिकेभ्यः, योग्यशिक्षकाः, योग्यशिक्षकाय च शिक्षणक्षमतायाः महती आवश्यकता वर्तते।

## सहायकग्रन्थसूची


1. " The Human Factor in Education" - A.A.D Souza, New Delhi.
2. " Teacher moral and Student achievement." - Anderson, L.W., Journal of Educational Research.
3. " Teacher effectiveness" - Mitzel H.E., Encyclopedia of Educational Research.
4. " A Study of teaching competencies among secondary teachers" - Passi, S.K. Sharma, Department of Education, University of Indore, 1981.
5. "Factorial structure of teaching competnecies among secondary school Teachers" - Rolph, M, Ph.D. Thesis, M.S. University of Baroda.
6. " Measuring Educational achievement" - Robert L. Ebel.
7. Shiksha surabhi - Department of Education, S.K.S.V, Puri.

ISSN: 2231-0452

# न्यायदर्शने शैक्षिकतत्त्वानि

*विद्याधर हरिचन्दन*

*(शोधछात्र:, शिक्षाविभाग:, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:)*

जीवनस्य चरमोद्देश्यं प्रति सम्प्रेरणं तत्र च श्रेय:प्रेयसो: ज्ञानकर्मणो: अध्यात्म-भूतयो:, आदर्शव्यवहारयोश्चानवद्यं सन्तुलनं दर्शनस्य प्राणभूतम्। दर्शनं हि पुरातनं व्यापकं मौलिकञ्च शास्त्रम्। इदं खलु तत्त्वज्ञानम्, आध्यात्मिकविद्या, आन्वीक्षिकी, ब्रह्मविद्या, मीमांसा, सम्यग्दर्शनमित्यादिभि: विविधैरभिधानैरभिधीयते परं सर्वेषु तत्त्वेषु अस्य गाम्भीर्यं वैशिष्ट्यञ्च अविच्छिन्नतया शोभते इति नास्ति संशय:। दु:खनिवृत्तिसुख-प्राप्त्युपायानां निर्धारणाय जागरूकै: मननशीलै: पुरुषै: मार्गा: प्रदर्शिता:। तेष्वेव मार्गेषु ये वेदप्रामाण्यमङ्गीकुर्वन्ति ते भवन्ति षडास्तिकदार्शनिका:, वेदनिन्दका: षट् नास्तिकदार्शनिका इति ख्याता:। प्रत्येकस्मिन् दर्शनशास्त्रे तदभिहितविभिन्नतत्त्वानि मानवचरित्रविकासाय मतिं वर्धयितुं प्रवर्तन्ते। तदेवात्मतत्त्वं शिक्षाबलेनाधिगन्तुं मानवस्य चरमं लक्ष्यं भवति । शिक्षा चैतन्यरूपा एका नियन्त्रिता प्रक्रिया यया व्यक्तित्वव्यवहार: परिवर्तयितुं शक्यते। यदा दर्शनं शिक्षाक्षेत्रे अवतरति तदा शिक्षादर्शनमिति उच्यते। षडास्तिकदर्शनेषु गौतममुनिप्रणीतं न्यायदर्शनं सर्वासां विद्यानां मूलमस्ति।

**न्यायदर्शनम्-**

न्यायदर्शनस्य प्रवर्त्तक: महर्षिर्गौतम:, अक्षपादनाम्ना प्रसिद्धो वर्तते। अत: अस्य दर्शनस्य नाम अक्षपाददर्शनमिति वर्तते। इतरभारतीयदर्शनमिव न्यायदर्शनेऽपि दर्शनस्य विभिन्नपक्षाणां साङ्गोपाङ्गवर्णनं दृश्यते। परन्तु न्यायस्य प्रमुखयोगदानं ज्ञानमीमांसाक्षेत्रे वर्तते। न्यायदर्शनस्य मुख्यविषय: ज्ञानम्।

"नियमेन ईयते" इति "न्याय" शब्दस्य निरुक्तिः,परं दर्शनक्षेत्रे तु "नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति न्यायः" कथ्यते। न्यायभाष्यकारवात्स्यायनस्तु प्राह - "कः पुनरयं न्यायः ? प्रमाणैरर्थपरीक्षणं न्यायः। प्रत्यक्षागमाश्रितिमनुमानं साऽन्वीक्षा। प्रत्यक्षागमाभ्यामीक्षि तस्यान्वीक्षणमन्वीक्षा,तया प्रवर्त्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम् इति।[१]

तर्केण विषयानुसन्धानमन्वीक्षा कथ्यते, तथा समेकिता विद्या "आन्वीक्षिकी" नाम्ना प्रवृत्ता। आन्वीक्षिक्या न्यायशास्त्रस्य वा अध्ययनेन वादकलापाटवं प्राप्यते, अत एवेयं "वादविद्याऽपि" कथ्यते। आन्वीक्षिकी न्यायविद्या वा विषये आचार्येण प्रशंस्यते यत्-

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां शाश्वदान्वीक्षिकी मता।।**[२]

न्यायदर्शने प्रमाणस्यैव सर्वोपरि महत्त्वमस्ति, अतोऽस्य "प्रमाणशास्त्रम्" संज्ञापि भवति। प्रमाणैरसाध्यसिद्धौ हेतुरेव क्षमः, अत एव "हेतुविद्या" अप्यभिधीयते। श्रुतिवचनैस्सह तर्कमपि महत्त्वपूर्णमाकलयच्छास्त्रमिदं "तर्कशास्त्रम्" नाम्नाऽपि उल्लिख्यते। तदिदं न्यायशास्त्रं महर्षिगौतमेन जगतो विविधाभिर्यातनाभिः पीडितस्य प्राणिवर्गस्य कल्याणार्थं विरचितम्, यथाहि गङ्गेशोपाध्यायः- "अथ जगदेवं दुःखपङ्कनिमग्नमुद्दिधीर्षुः अष्टादशविद्यास्थानेष्वभयर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय।[३]

जैनदर्शनवत् न्यायदर्शनमपि यथार्थवादी भवति। न्यायदर्शनानुसारं बाह्यवस्तुनामस्तित्वं ज्ञानात् स्वतन्त्ररूपेण भवति। हर्ष-विषाद-भय-क्रोधादिभावनाकृते मनः आधारो भवति। यावत्पर्यन्तं मनसि अनुभूतिः नैव प्राप्यते तावत् तेषामस्तित्वं न भवति।

न्यायशास्त्रं पदार्थज्ञानस्य उपस्थापकमस्ति। पदार्थज्ञानात्पूर्वं ज्ञानस्य बोधः भवतीति विचार्य न्यायशास्त्रे प्राथम्येन ज्ञानस्य स्वरूपं प्रतिपादितम्। न्यायमतेन ज्ञानं

प्रत्येकं वस्तुनः प्रकाशकमस्ति। तेनैव पदार्थस्य यथार्थज्ञानं भवति। ज्ञानं च द्विधा जायते - स्मृतिरूपम् अनुभवरूपञ्च। ज्ञातविषयं ज्ञानं स्मृतिर्भवति, किन्तु अनुभवस्तु पदार्थसाक्षात्कारेण संभवति। अनुभवोऽपि द्विधा वर्तते - अयथार्थानुभवः यथार्थानुभवश्च। अयथार्थानुभवस्तु संशय-तर्क-विपर्ययरूपाः भवन्ति। यथार्थानुभवश्च यथार्थज्ञानं जनयति अतः यथार्थानुभवः प्रमा भवति। प्रमाजन्यत्वात् यथार्थज्ञानमेव प्रामाणिकं मन्यते।

न्यायशिक्षादर्शनं यथार्थवादि दर्शनमित्यपि कथ्यते। डां. सर्वपल्लीराधाक्रीष्णन् महोदयेन न्यायदर्शनं तर्कसम्मतयथार्थवाद इति उक्तम्। न्यायशब्दस्य एकोऽर्थः उचितः अथवा वाञ्छनीयः इति अर्थः।

**न्यायदर्शनानुसारं शिक्षायाः अभिप्रायः-**

१. न्यायदर्शनानुसारं शिक्षायाः अभिप्रायः विद्या अथवा ज्ञानं भवति। न्यायदर्शनं हेतुविद्या इति कथ्यते। न्यायशब्दस्य तात्पर्यं भवति नीयते अनेन इति न्यायः।

२. दर्शनेऽस्मिन् शिक्षायाः अभिप्रायः भवति 'अनुवीक्षणम्' अर्थात् तर्कद्वारा कस्यापि विषयस्य अनुसन्धानम्। अनु इत्यस्य अर्थः भवति पश्चात् तथा वीक्षणस्य अर्थः भवति विशेषावलोकनम्। अनया दृष्ट्या अनुवीक्षणस्य अर्थः भवति अनुसन्धानम्।

३. दर्शनेऽस्मिन् प्रमाणस्योपरि विशेषरूपेण बलं प्रदीयते। यस्य माध्यमेन ज्ञानप्राप्तिः भवति तत् प्रमाणमित्युच्यते। प्रमाणं भवति ज्ञानस्य मुख्यकारणं तथा च ज्ञानोपलब्धेः अन्तिमानुभवः। न केवलं पदार्थानां यथार्थज्ञानप्राप्तौ सहायकं प्रमाणशास्त्रस्य वास्तविकता अनुरूपमेव ज्ञानोत्पन्नं भवति। एतदर्थं प्रमाणमेव उपयुक्ता शिक्षा तथा प्रमाणप्रक्रिया उपयुक्तशिक्षाप्रक्रिया भवति।

४. न्यायदर्शनानुसारं वयं शून्यमस्तिष्केण आरम्भं नैव कुर्मः। अस्माकं निजानुभवस्य संस्काराणां एवं परम्पराणां च आधारेण ज्ञानं अस्माकं कोषे आसीत्। विज्ञानेन अनावरणमात्रं क्रियते। न्यायशास्त्रं नवीनज्ञानप्रदानं न करोति। परन्तु यत्

ज्ञानेन अस्माकं पदार्थसम्बन्धियथार्थज्ञानं भवति तेषामुपायानां वर्गीकरणं करोति। तद्यथा-

क) प्रत्यक्षम् अथवा अन्तर्दृष्टिः।

ख) अनुमानम्।

ग) उपमानम् ।

घ) शब्दः नाम आप्तप्रमाणम्।

५. न्यायशास्त्रे अपरमज्ञानोत्पत्तौ कारणानां विवेचनं विस्तृतरूपेण कृतं वर्तते। अप्रमाज्ञानं तस्य ज्ञानस्य भेदानां परिचयः अध्यापकस्य अध्येतृणां च कृते उपयोगी भवति। अप्रमात्मकज्ञानस्य चत्वारि कारणानि वर्तन्ते। स्मृतिः, संशयः, भ्रमः, तर्कश्च।

६. न्यायशास्त्रे कारणात् कार्यस्य उत्पत्तिरभिमताऽस्ति। एवं चेत् कार्यं कारणात् सर्वथा भिन्नं वर्तते। कार्योत्पत्तेः पूर्वं कारणस्य प्रागभावो भवति। यद्यपि कार्यं स्वकारणे समवायसम्बन्धेन तिष्ठति तथापि कार्यकारणयोः अयं सम्बन्धः न्यायशास्त्रीयदृष्टिकोणेन स्वाभाविको विद्यते। अस्य तात्पर्यमिदमस्ति यत् कार्यं स्वसमवायिकारणात् पृथक् अस्ति। अतः न्यायशास्त्रे अयं सिद्धान्तः असत्कार्यवादः इत्युच्यते।

यथा - **असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।**
**शक्तस्य शक्यकरणात् कारणाभावाच्च सत्कार्यम्।।**[४]

७. न्यायशास्त्रीयदृष्टिकोणेनापि ईश्वर एव जगतः कर्त्ताऽस्ति। अन्यदर्शनानाम् अपेक्षया न्याये ईश्वरस्य सत्ता वर्तते। न्यायशास्त्रे ईश्वरसिद्धये बहवः तर्काः प्रस्तुताः तद्यथा -

(क) घटादिकार्याणां यथा लोकेऽवश्यमेव कश्चित् कर्त्ता भवति तथैव जगद्रूपस्य कार्यस्य कर्त्ताऽपि अवश्यं स्यात्।

(ख) प्रलयकाले सृष्टिरियं परमाणुरूपेऽवस्थिता भवति। यदा पुनः सृष्टिर्भवति

तदा परमाणूनां द्व्यणुकैः सह संयोगं कश्चित् चेतन एव कर्तुं शक्नोति। स च ईश्वरातिरिक्तः कश्चिन्न दृश्यते।

(ग) जगतः किमपि अधिष्ठानम् अवश्यं स्यात्। तदपि ईश्वरातिरिक्तं न भवितुं शक्नोति।

(घ) जगति कलाकौशलाभ्यामारभ्य कर्त्ताऽपि ईश्वर एव प्रतीयते नान्यः कश्चित्।

(ङ) वेदानां कर्त्तृत्वेनापि ईश्वरस्य सत्ता स्वीकर्तुं शक्यते।

(च) ईश्वरास्तित्वं शास्त्रसम्मतमप्यस्ति।

(छ) अपेक्षाबुद्ध्याऽपि ईश्वरस्यास्तित्वं सिद्ध्यति।

**शिक्षायाः उद्देश्यानि-**

**१. यथार्थज्ञानप्राप्तिः-** न्यायदर्शने प्रतिपादितानां विषयाणाम् अवलोकनेन ज्ञायते यत् शिक्षायाः प्रमुखोद्देश्यं भवति यथार्थज्ञानप्राप्तिः। न्यायदर्शनं परिदृश्यमानं जगत् मिथ्या इति न मन्यते। परन्तु वास्तविकमिति मन्यते। न्यायदर्शनानुसारं ज्ञानं प्रत्यक्षं, इन्द्रियजनितान्तर्ज्ञानं, लौकिकम्, अलौकिकम्, अनुमानम्, उपमानं तथा च शब्दैश्च प्रमाणितं भवेत्। मिथ्या- संशय-भ्रान्तिभिश्च रहितं भवेत्।

**२. आध्यात्मिकविकासः-** न्यायदर्शनानुसारं शिक्षायाः अपरमुद्येश्यं भवति आध्यात्मिकविकासः। यस्यार्थः भवति व्यक्तेः आत्मा-जीव-ईश्वर-जगत्- सद्विचारादिषु विषयेषु ज्ञानस्य विकासः। उच्यते यत्-

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां विद्योद्देशे परीक्षिता।**[५]

**३. मोक्षप्राप्तिः-** न्यायदर्शनानुसारं मोक्षप्राप्तिरपि शिक्षाया अपरमुद्देश्यम्। यदा मनुष्यः संशयरहितज्ञानम् अनुभवति तदा मनुष्यस्य आत्यन्तिकदुःखस्य उच्छेदो भवति।

आत्यन्तिकदु:खनिवृत्त्यां सत्याम् अपवर्ग: भवति। तदुक्तम् - **दु:खजन्म-प्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग:।** इति।[६]

**पाठ्यचर्या -**

न्यायदर्शनानुसारं शिक्षाया: पाठ्यचर्यायां लौकिकमलौकिकञ्चेति विषया: स्यु:। लौकिकविषयेषु भाषा,साहित्यं,व्याकरणं, प्राकृतिकमध्ययनं च स्यात्। शिक्षाया: पाठ्यचर्यायां तर्कशास्त्रमवश्यं स्यात्। यतो हि न्यायदर्शनं वाकोवाक् अन्वीक्षिकी पञ्चावयवयुक्तवाक्यम् इत्यादिभि: नामभि: परिचितं भवति। अलौकिकज्ञानविषयेषु दर्शनशास्त्रमध्यात्मशास्त्रं, आत्मानुभूति: अन्तर्ज्ञानं चेत्यादय: क्रिया: आयान्ति। ईश्वरप्रामाण्यविषय: न्यायदर्शनमिति नाम्ना ख्यात: उच्यते- **मिति: सम्यक् परिच्छित्ति:।**[७]

**शिक्षणविधय:-**

न्यायदर्शनानुसारं शिक्षायाम् एते शिक्षणविधय: प्रयुक्ता: स्यु:। यथा- तर्कविधि:, आगमन-निगमनविधि:, विश्लेषण-संश्लेषणविधि:, चर्चाविधि:, विचारविमर्शविधि:, समूहविधि: अथवा शास्त्रार्थविधि:, स्वाध्यायविधिश्चेत्यादय:। शब्दप्रमाणप्रस्तुतिसमये प्रश्नोत्तरं, व्याख्या विचारविमर्श: व्याख्यानविधेश्च प्रयोग: क्रियते। धार्मिकप्रवचनं, वैज्ञानिकानां वचनं पर्यवेक्षिताध्ययनं, पुस्तकाध्ययनञ्च इत्यादीनां विधीनां प्रयोग: न्यायदर्शने भवति।

**विद्यार्थी तथा अध्यापक:-**

विद्यार्थी जिज्ञासु: ब्रह्मचारी वा भवेदिति न्यायदर्शनम् उररीकरोति । स: राग-द्वेष-मोहादिभि: शून्यो विद्याभ्यासे प्रवृत्तश्च स्यात्। विद्यार्थी विनम्र: नियमशीलश्च च भवेत्। स्वकीयज्ञानस्य वृद्धये विद्यार्थी विवेकबुद्ध्या च युक्त: सन् जागरितज्ञानस्य बुद्धिं कुर्यात् । ज्ञानग्रहणानन्तरं तस्य अभ्यास: करणीय:। अन्यथा अपवर्गप्राप्ति: न भवति। न्यायसूत्रं सङ्केतयति यत्-

**ज्ञानग्रहणाभ्यासस्ताद्विधैश्च सह संवाद:।**
**तं शिष्यगुरुसब्रह्मचारी विशिष्टश्रेयोऽर्थिभिरनुसूयिभिरभ्युपेयात्।**[८]

महर्षिगौतम: ,कणाद:,मेधातिथि:,भाष्यकार-वात्स्यायन:,नागार्जुन: दिङ्नाग:, न्यायवार्त्तिककार: उद्योतकर:, धर्मकीर्त्ति:, धर्मत्तर:, नायष्पति:, उदयन:, जयन्त:, वर्धमान:, रुचिदत्त:, वरदराज:, केशवमिश्रप्रभृतय: महान्त: विद्वांस: न्यायदर्शनस्य प्रवर्त्तका: शिक्षकाश्च आसन्।

**अनुशासनम् -**

न्यायदर्शनानुसारं तत्त्वज्ञानस्य कृते समाधेरावश्यकता भवति। एतदर्थं अस्य अभ्यास: करणीय:। न्यायभाष्ये तदर्थमुच्यते - समाधिविशेषाभ्यासात् इति।[९] सत्यस्य तथा ज्ञानस्य प्राप्त्यर्थं शरीरस्य तथा मनस: नियन्त्रणं कुर्यात्। न्यायदर्शनानुसारं तत्त्वज्ञानस्य कृते पूर्वफलानुबन्धम् इत्यस्य अभ्यासं कुर्यात्। तदुक्तम् - **पूर्वफलानुबन्धादुत्पत्ति:** इति।[१०]

योगाभ्यास्यस्य कृते यम-नियम-प्रत्याहार इत्यादीनां व्रतानां पालनं करणीयम्। अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहादीनां धर्माणां पालनं करणीयम्। अनेन आत्मसंस्कार: भवति। अनेन ज्ञानेन न्यायदर्शनम् आत्मानुशासनस्योपरि बलं प्रददाति। एवञ्च बाह्यान्तरिकानुशासनस्योपरि बलं प्रदीयते।

**विद्यालय:-**

विद्यालयसन्दर्भे कोऽपि स्पष्ट: विचार: न्यायदर्शने न प्राप्यते। न्यायदर्शनानुसारं विद्यालयस्य तात्पर्यं गुरुगृहम् आश्रम: वा भवति।

न्यायविचारधारा आधुनिकलोकतान्त्रिकदर्शनेन साकं साम्यं भजते। व्यवहारदृष्ट्या अपि न्यायदर्शनं सर्वेषां कृते अत्यन्तमुपयोगी। अत: शिक्षाया: उपरि अस्य प्रभाव: नूनं भवति भविष्यति च।

## सन्दर्भा:

१. न्यायभाष्यम्-१/१/१
२. अर्थशास्त्रम्- १/२
३. तत्त्वचिन्तामणि:-१
४. सांख्यकारिका-९
५. न्यायदर्शनम् पृ.सं.-१
६. गौतमसूत्रम् -१-१-२
७. न्यायकुसुमाञ्जली
८. भारतीयशिक्षादर्शनम्- पृ.सं.-८९
९.न्यायसूत्रम् ४-२-३८
१०. न्यायसूत्रम् ४-२-४१

## सहायकसन्दर्भसूची

१. महर्षिगौतमप्रणीतम् न्यायदर्शनम् - उदयवीर शास्त्री, विरजानन्द वैदिक संस्थान, गाजियावाद।
२. न्यायसूत्रम् - उदयवीर शास्त्री , वैदिक संस्थान, गाजियावाद।
३. श्री ईश्वरकृष्णविरचिता सांख्यकारिका - डा.देवेन्द्रनाथ पाण्डेय, जगदीश संस्कृत पुस्तकालय, जयपुर।
४. भारतीयशिक्षादर्शनम् - डा.रामसकल पाण्डेय, विनोदपुस्तकमन्दिर, आगरा।
५. तत्त्वमीमांसा, ज्ञानमीमांसा, मूल्यमीमांसा एवं शिक्षा - डा.आर.ए.शर्मा, आर.लाल बुक डिपो, मेरठ।

ISSN: 2231-0452

# उपनिषत्संवर्णिता शिक्षणप्रक्रिया

*आर्. शिवरामकृष्ण सिंह*

*(शोधच्छात्रः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च ॥**[१]

**तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते॥**[२]

परा च परमात्मविद्या। अपरा च धर्माधर्मसाधनतत्फलविषया। उपनिषद्वेद्याक्षरविषयं हि विज्ञानमिह परा विद्येति प्राधान्ये विवक्षितं, नोपनिषच्छब्दराशिः। वेदशब्देन तु सर्वत्र शब्दराशिर्विवक्षितः। शब्दराश्यधिगमेऽपि यत्नान्तरमन्तरेण गुर्वभिगमनादिलक्षणं वैराग्यं च नाक्षराधिगमः सम्भवतीति पृथक्करणं ब्रह्मविद्यायाः परा विद्येति।

उपनिषच्छब्दोऽयम् उप, नि इत्युपसर्गद्वयपूर्वकात् पद्लृ विशरणगत्यवसादनेषु इत्यस्मात् धातोः निष्पन्नः। अनादिकालीनम् आत्मस्थाज्ञानं नितान्तं शिथिलीकरोतीत्यर्थं सूचयत्ययं शब्दः।

**विद्यासन्धयः**

तैत्तिरीयोपनिषदः शिक्षावल्यां पञ्चमहासंहिताः वर्णिताः। तत्सन्दर्भे अधिविद्यासम्बद्धमहासंहितायाः उल्लेखोऽपि लभ्यते। यत्र विद्यायाः अपरिहार्याणि अङ्गानि वर्णितानि दृश्यन्ते।

''अथाधिविद्यम्। आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम्। विद्यासन्धिः। प्रवचनं संधानम्। इत्यधिविद्यम् ।''

अस्मिन् प्रक्रमे विद्यायाः उद्गमस्थानम् आचार्यः। अत एव सः पूर्वरूपं कथ्यते। शिष्यः उत्तररूपं भवति। यतो हि शिष्यस्य विद्यैव लक्ष्यम्। उभयोः अनयोः सन्धानं विद्यया जायत इत्यतः विद्या सन्धिरिति व्यवह्रियते । सर्वमेतत् प्रवचनद्वारा जायते इत्यतः प्रवचनमेव सन्धानं भवति।

**शिक्षा**

प्राचीनकाले शिक्षैकं साधनमेवासीत् यन्माध्यमेन धर्मार्थकाममोक्षप्राप्तिरेव परममुद्देश्यं समभावयन् भारतीयाः। मोक्षप्राप्तिरेव जीवनस्य चरमो विकासः ।

**अध्यापकः**

प्राचीनभारते त्रिप्रकारकाः अध्यापकाः भवन्ति स्म। आचार्यः, गुरुः, उपाध्यायश्च। आचार्यस्तु समस्तान् संस्कारान् परिपूर्य वेदानां शिक्षां ददाति स्म। ते स्वयमपि संयमितं जीवनं यापयन्ति स्म।

उपाध्यायः इत्याख्यः शिक्षकः वृत्त्यर्थं शिक्षणं करोति स्म। सः कस्यापि वेदस्य एकं भागमथवा वेदाङ्गम् अध्यापयति स्म।

गिरति अज्ञानान्धकारम् इति गुरुः। गृणाति उपदिशति इति गुरुः।

आश्रमाः शिक्षाकेन्द्रभूता आसन् ।

**छात्रः**

प्रारम्भिकशिक्षायाः पश्चात् उपनयनसंस्कारकालो जायते स्म। उपनयनं नाम गुरोः समीपं प्रेषणमिति। उपनयनसंस्कारात् वैदिकशिक्षां प्राप्तुमर्हति छात्रः। उपनिषत्काले छात्रस्य अभिरुचिं योग्यतामनुसृत्य शिक्षां प्रददुःशिक्षकाः।

**पाठ्यक्रमः**

शिक्षणोद्देश्यानां परिपूर्तौ पाठ्यक्रमः सहायकरूपेण भवति उपनिषत्कालिकायाः शिक्षायाः पाठ्यक्रमोऽतीव समृद्धो विविधश्च। परा विद्या उपनिषद्विद्या। परा विद्यैव अध्यात्मविद्यारूपेण प्रतिपादिता या तु विद्यानां श्रेष्ठतमा स्वीकृता।

**शिक्षणविधिः**

''अभिलषितोद्देश्यसाधनानुकूलव्यापारवान् उपायः विधिः''। तदानीन्तनाः पद्धतिः, विधिः, प्रणाली, युक्तिरिति शब्दाः पर्यायवाचकशब्दाः।

**उपनिषत्कालीनशिक्षणपद्धतयः**

अतिगहनानां तत्त्वानां बोधनक्रमोऽपि अत्र उपनिषत्सु वैशिष्ट्यं भजते। यतः पामराणां दुःखग्राह्यम् आध्यात्मतत्त्वं कथं वा तेषां मनसि अनायासं प्रविष्टं भवेदित्यत्र बोधनकौशलं परिगणितं भवति। उपनिषत्सु अधोलिखिताः पद्धतयः समवर्णिषत।

प्रमुखतया दशोपनिषत्सु एताः शिक्षणपद्धतयः दृश्यन्ते।

| | | |
|---|---|---|
| परोक्षपद्धतिः[३] | - | Enigmatic Method |
| सूत्रपद्धतिः[४] | - | Aphoristic Method |
| व्युत्पत्तिपद्धतिः[५] | - | Etymological Method |
| आख्यायिकापद्धतिः[६] | - | Mythical Method |
| सादृश्यपद्धतिः[७] | - | Analogical Method |
| वादपद्धतिः[८] | - | Dialectic Method |
| समन्वयपद्धतिः[९] | - | Synthetic Method |
| तात्कालिकोत्तरपद्धतिः | - | Adhoc Method |
| प्रत्यावर्तनपद्धतिः[१०] | - | Regressive Method |
| स्वगतभाषणपद्धतिः[११] | - | Monological Method |

**उपागमः**

शिक्षणीयांशानां, विधीनां तत्फलानां च विषये या दृष्टिः, यः विचारः वर्तते स एव उपागमशब्देनोच्यते। शिक्षणविधीनां दार्शनिकाधारः उपागमः भवति।

"It states a point of view or philosophy or an assumption which one believes but cannot necessarily prove" इति।

एकास्मिन्नुपागमे बहूनां विधीनां समवायः भवितुमर्हति। अतः उपागमः विध्यपेक्षया व्यापकार्थं बोधयति।

ऊनविंशतिशताब्दादारभ्य शिक्षाक्षेत्रे महत् परिवर्तनं सञ्जातम्। क्षेत्रस्यास्य सर्वेष्वपि अङ्गेषु अनेकानि आविष्करणानि विविधदेशस्थैः शिक्षाविद्भिः प्रकाशितानि। अनेके अभूतपूर्वा विषयाः प्राकाश्यं नीताः। कार्यमेतत् अनुस्यूततया चलदेव वर्तते। यद्यपि विदुषां मध्ये केषुचिदंशेषु एकाभिप्रायः साधयितुं न शक्यते, अथाऽपि अत्यधिकैः आदृतः अंशः परिगणनार्ह एव भवति। शिक्षणविभागे विपर्यासोऽयं साधु दृग्गोचरम् आयाति। उपनिषत्कालादारभ्य समीपकालपर्यन्तं विधिशब्दः अध्यापनविषये उपयुज्यमानः आसीत्। अयमेव विधिशब्दः रीतिः, विधानं, पद्धतिः इत्यादिभिः पर्यायवाचकशब्दैरपि उपयुक्तः आसीत्। किन्तु इदानीन्तनकाले उपागमशब्दः प्रसिद्धिं गतः। अयं तु शब्दः यद्यपि विधिशब्दस्य स्थाने प्रयुक्तः अथाऽपि न तस्मिन्नेवार्थे। तत्प्रयोक्तॄणां मते उपागमो नाम सन्दर्भोचितानां केषाञ्चनविधीनां समाहारो भवति। अनेन विधिसमुदाय एव उपागम इति वक्तुं शक्यते। क्रमिकरूपेणवर्गीकृताः विधय एव उपागमः इति केचन अभिप्रयन्ति। एवमेव भविष्ये विविधोपागमानां सम्मेलनेन नव्योपागमस्य एकस्य आविष्कारः भवेदेव। ईदृशस्य उपागमस्य स्वरूपं उपनिषद्विषयकम् अधः सूच्यते।

**उपनिषदुपागमसोपानेषु आदौ विद्यते**

**१. शान्तिपाठः**

शिष्याचार्ययोः प्रमादकृतान्यायेन विद्याग्रहणप्रतिपादननिमित्तदोषप्रशमनार्थम् इयं शान्तिरुच्यते। आध्यात्मिकाधिभौतिकाधिदैविकरूपदुःखत्रयनिवारणार्थं विद्यायाः निर्विघ्नग्रहणप्रतिपादनार्थं विद्यायाः परम्परासंपादनार्थं च अयमुपयुज्यते। पुनश्च कक्ष्यायां शिष्यस्य चित्तैकाग्र्यार्थमपि शान्तिपाठः क्रियते। एवम् अध्ययनाध्यापनप्रक्रिया सुष्ठु चालयितुं पार्यते।

दृश्यते च कठोपनिषदि शान्तिपाठः -

''ओं सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु। मा विद्विषावहै।

ओं शान्तिः! शान्तिः!! शान्तिः!!!'' इति।

**२. उपक्रमः**

उपक्रमस्य मुख्यं कार्यं विषयसूचनमस्ति। शिक्षकः आदौ साक्षात् विषये न प्रविशति। कामपि पद्धतिम् आनीय सरस-सरलरीत्या प्रतिपादयति। कठोपनिषदि च कथापद्धतिं स्वीकृत्य आख्यायिकारूपेण नाचिकेतोपाख्यानमुपस्थाप्य आत्मविद्या-विषयः इति सूचितं वर्तते। यथा च ''ॐ उशन् ह वै....''[१२]

इत्यादिना विषयसूचनं च

**''येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके।**

**एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः ॥''**[१३] इति।

अस्ति च छान्दोग्योपनिषदि षष्ठाध्याये प्रकरणप्रतिपाद्यं अद्वितीयम् आत्मवस्तु 'एकमेवाऽद्वितीयम्'[१४] इति। अत्र ज्ञातव्यः विषयः इत्थं वर्तते - प्रकरणभेदेन विषयभेदः आगच्छेत्। अत एव कदाचित् प्रत्येकमपि प्रकरणस्य आदौ पृथक् विषयः सूचनीयः इत्यागच्छति। अतः एवं छान्दोग्ये दृश्यते। यतो हि कदाचित् आत्मभिन्नः अमुख्योऽपि विषयः प्रतिपाद्यते।

आख्यायिकायां कदाचित् विद्यायाः प्रामुख्यमपि दृश्यते। अधिकारी कीदृशः इत्यादिकमपि आयाति। एतेन छात्राणामेकाग्रताम् औत्सुक्यं च वर्धयितुं शक्यते। यथा-

**''देवैरत्रापि विचिकित्सितं किल त्वं च मृत्यो यन्न सुविज्ञेयमात्थ।**

**वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरस्तुल्य एतस्य कश्चित्''**[१५]

इति आत्माविद्यायाः महत्त्वं जिज्ञासोः योग्यता च वर्ण्येते ।

**३. स्वरूपम्**

अस्मिन् प्रधानविषयस्य स्वरूपं सम्यक् प्रतिपाद्यते। विषयस्पष्टतायै 'ज्ञातादज्ञातं प्रति' इति शिक्षणसूत्राधारेण उदाहरणप्रत्युदाहरणैः व्याख्यानं प्रश्नकरणं कक्ष्यानुप्रयोगः कथाकथनम् इत्यादीनि अनेकशिक्षणविधानानि असकृत् प्रयुज्यन्ते। तथा वक्ष्यमाणपाठ्यांशे पदस्यार्थज्ञानं प्रयोग-प्रमिति-विशेषादयः स्वरूप-वर्णनविन्यासे अनुप्रयुज्यन्ते।

दृश्यते च काठके -

**दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता ।**
**विद्याभीप्सितं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्त।।**[१६]

**अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितम्मन्यमानाः।**
**दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः।।**[१७]

पुनश्च आत्मविद्यास्वरूपं स्पष्टतया -

**न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् ।**
**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ।।**[१८]

**४. अभ्यासः**

चतुर्थमिदं सोपानम्। प्रकरण - प्रतिपाद्यवस्तुनः पौनःपुन्येन प्रतिपादनम् अभ्यासः। प्रतिपादितं च छान्दोग्ये षष्ठेऽध्याये अद्वितीयात्मवस्तुनः तत्प्रकरणमध्ये 'तत्त्वमसि' इत्येवंरूपेण नवकृत्वः प्रतिपादनम्। अत्र सूत्ररूपेण स्वरूपं लघुवाक्यरूपेण नववारं अभ्यासः कृतः वर्तते। वारं वारं प्रतिपादनेन छात्राणां मनसि विषयावधारणं सम्यक् भवति। कठोपनिषदि च ओङ्कारोपदेशरूपेण आत्मवस्तुना प्रथमाध्याय-द्वितीयवल्ल्यां पञ्चदशमन्त्रादारभ्य त्रयोविंशतिपर्यन्तं पौनःपुन्येन आत्मस्वरूपं भिन्नपदैः लक्ष्यते।

**५. प्रयोजनम्**

पाठ्यमानस्य वा प्रकरणप्रतिपाद्यस्य विषयस्य फलं यत् वर्तते तदेव प्रयोजनमित्युच्यते। फलश्रवणेन फलानुभवेन एव विद्यायाः संपूर्णता भवति नान्यथा। अतः प्रयोजनकीर्तनम् अत्यपेक्षितम्। उक्तं च काठके द्वितीयेऽध्याये निर्विशेषात्मज्ञानेन अमृतत्वप्राप्तिः। तद्यथा -

**''अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत्।**

**अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते।।''**[१९] इति।

**६. दुष्फलम्**

प्रायः आधुनिकशिक्षणपरम्परा इयं सर्वत्र प्रयोजनपरकैव दृश्यते। यत्र साधुप्रयोगेण प्रतिफलं सिद्ध्यति तत्र दुष्टप्रयोगेण दुष्फलं प्राप्यते। तस्मात् यद्यध्यापकः एव दुष्फलानि दुष्परिणामान् वा संसूचयति तर्हि छात्रः न कदापि तद्विपदि गच्छेत् इति दुष्फलमिति सोपानस्य प्रयोजनम्। अस्ति च अस्मिन् काठके-

**नाविरतो दुश्चरितान्नाशान्तो नासमाहितः।**

**नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ।।**[२०]

इति विद्याया अनधिकारिणः लक्षणम् उक्तम्। अविद्याग्रस्तानां दुर्दशा च ।

**अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितम्मन्यमानाः।**

**दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः।।**[२१] इति।

**७. अर्थवादः -**

विद्यायाः विषयस्य वा स्थाने स्थाने प्रशंसनमर्थवादः इत्युच्यते। एतेन अध्येतॄणां जिज्ञासा ऐकाग्र्यं च वर्धेते। यथा छान्दोग्ये षष्ठेऽध्याये ''उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतम् अविज्ञातं विज्ञातम्'' इति उपनिषद्विषयस्य प्रशंसा।

काठके प्रथमाध्याये -

**य इमं परमं गुह्यं श्रावयेद् ब्रह्मसंसदि।**

**प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते।।**[२२]

**८. उपपत्तिः** (Logic)

प्रतिपाद्यविषयं प्रमाणयितुं या युक्तिः उपस्थाप्यते सा उपपत्तिः । यथा छान्दोग्ये षष्ठाध्याये -

**''सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं**

**स्यात् वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्''**[२३]**।**

अत्र दृष्टान्तपद्धत्या दुर्ज्ञेयविषयस्य दृष्टान्तेन साकं योग्यांशे समानत्वं कल्पयति।

**९. उपसंहारः**

यः विषयः पाठारम्भे उपस्थापितः स एव विषयः अन्ते च संग्रहेण प्रतिपाद्यते। एवं संक्षेपवर्णनेन मुख्यं विषयं मनसि धारयितुं (स्मर्तुं)शक्यते। यथा छान्दोग्ये षष्ठाध्यायस्य 'एकमेवाऽद्वितीयम्'[२४] इति उपक्रमे सूचितविषयः एव ''ऐतदात्म्यमिदं सर्वम्''[२५] इति उपसंहारेऽपि प्रतिपादितं वर्तते तथा।

काठके अपि उपसंहारे -

**अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा**

**सदा जनानां हृदये सन्निविष्टः।**

**तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण**

**तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति।।**[२६]

**१०. शान्तिपाठः -**

आरम्भे उक्तानि शान्तिपाठप्रयोजनानि अत्रापि संगच्छन्ते। पुनः विश्रान्तिजन-नमेवात्र मुख्यं प्रयोजनम्। अत्र अध्ययने क्लान्तानां प्रशान्ततायै अग्रिमपाठ्यांशस्य संसिद्धतायै च सोपानमिदं सहकरोति।

शान्तिपाठः काठके -

ओं सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।

तेजस्विनावधीतमस्तु। मा विद्विषावहै। ओं शान्तिः! शान्तिः!! शान्तिः!!!

इति उपर्युक्तानाम् उपनिषत्सम्बद्धोपागमानां विषयांशानां परिशीलनेन तात्कालिकः गुरुशिष्यसम्बन्धः, आश्रमादिषु प्रक्रान्ता अध्ययनाध्यापनरीतिः अनुशासन-वैखरीत्यादयः सुष्ठु अवगम्यन्ते। वस्तुतः इदानीन्तनच्छात्राध्यापकसम्बन्धः सर्वोऽपि तामेव रीतिं तत्र तत्र किञ्चित् परिवर्तितरूपेण अनुसरतीत्यत्र न भवति कोऽपि वादविवाद इति भावयितुं शक्यते।

**सन्दर्भाः**


१. मुण्डकोपनिषत् १-१-४
२. तत्रैव १-१-५
३. श्वेताश्वतरोपनिषत् १-४,५
४. माण्डूक्योपनिषत् ७
५. छान्दोग्योपनिषत् ६-८-१,५
६. कठोपनिषत् १-२
७. बृहदारण्यकोपनिषत् २-४-१, १४
८. तत्रैव ३-१
९. प्रश्नोपनिषत् १-०१
१०. बृहदारण्यकोपनिषत् ३-६-१
११. तत्रैव ३-३
१२. कठोपनिषत् १-१
१३. तत्रैव १/२०
१४. छान्दोग्योपनिषत् ६/२/१
१५. कठोपनिषत् १/२२
१६. तत्रैव १/२/४
१७. तत्रैव १/२/५, मुण्डकोपनिषत्१-२-८
१८. कठोपनिषत् १/२/१८
१९. तत्रैव १/३/१५
२०. तत्रैव १/२/२४

२१. तत्रैव १/२/५
२२. तत्रैव १/३/१७
२३. छान्दोग्योपनिषत् ६/१/४
२४. तत्रैव ६/२/१
२५. तत्रैव ६/८/७
२६. कठोपनिषत् २/३/१७

## आधारग्रन्थसूची


१. उपनिषत्सारसन्दर्भः - आचार्यदिगम्बरमहापात्रः, गाजियावादः

२. उपनिषद्भाष्यम्-श्री शङ्करभगवत्पादाचार्यः-महेश अनुसन्धानसंस्थानम्,वाराणसी,१९८२

३. पुरातनी शिक्षा - डॉ. लोकमान्यमिश्रः, मृगाक्षी प्रकाशनम्, लखनऊ, २००४

४. शिक्षण - विधियों की रूपरेखा - श्री रामखेलावन चौधरी, वाराणसी, १९६१

५. संस्कृतशिक्षणम् - डा. च.ल.ना. शर्मा, भारतमुद्राप्रकाशनम्, केरला, १९९६

३. An Encyclopedic History of Indian Philosophy, Vol.2, PP. 34-40

ISSN: 2231-0452

# साम्प्रतिकपर्यावरणं तथा तस्य प्रभावः

*दत्तहरि बेहेरा*

*(शोधच्छात्रः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

परिवर्तनशीलेऽस्मिन् संसारे बुद्धिमान् मानवः सम्प्रति अल्पीयसि काले अल्पेनैव श्रमेण पूर्वापेक्षया अधिकफलप्राप्त्यर्थं निरन्तरं प्रयतमानो वर्तते । मानवस्य एतादृशः प्रयास एव समाजे श्रेष्ठस्थानप्राप्तये तस्य साहाय्यं विदधाति । इदानीन्तनकाले मानवजीवनस्य प्रत्येकं पक्षः वैज्ञानिकानुसन्धानैः आविष्कारैश्च प्रभावितो विद्यते । तेन मानवानां दृष्टिरपि वैज्ञानिकी संजाताऽस्ति।

शिक्षा बालकाय नवनवानुभवान् प्रदाय तं सुयोग्यं निर्माति । एतेन सः स्वीयवातावरणेन सह सामञ्जस्यं स्थापयन् स्वस्मिन् निहितशक्तीः योग्यताश्च पूर्णतया विकासयति । परिणामतः स स्वयोग्यतानुसारं स्वपरिवारस्य, समाजस्य राष्ट्रस्य च विशिष्टक्षेत्रे योगदानं कर्तुं शक्नोति ।

"शिक्षैव जीवनं जीवनमेव शिक्षा" इति वचनानुसारं शिक्षायाः आवश्यकता-स्वीकारे विभिन्नानां विचारकाणाम् ऐक्यमतं दृश्यते । एतदपि अङ्गीक्रियते यत् शिक्षायाः अभावेन मानवस्य विकासः नैव सम्भवति । शिक्षैव तस्य शारीरिक-मानसिक-बौद्धिक-सामाजिकविकासेभ्यः मार्गं प्रदर्शयति। जीवनस्योद्देश्यानां प्राप्त्यर्थं सहायतां प्रददाति। तं पूर्णतां प्रति अग्रे सारयति तथा संघर्षमयजीवनं सरलीकर्तुं मार्गं प्रसारयति । समुचितशिक्षया एव सशक्तसमाजः भवितुमर्हति अपि च राष्ट्रमुन्नतेः शिखरप्रदेशं चुम्बति।

शिक्षा सामाजिकपरिवर्तनस्य मानवैकत्वभावनायाः, स्वात्माध्ययनस्य, निःस्वार्थभावनायाः प्रकाशार्थं मार्गं प्रदर्शयति । शिक्षाऽऽधारेण नेतृत्वप्रशिक्षणं, सामाजिकसंघटनस्य परिचालनं सुचारुतया भवितुमर्हति । लोकतान्त्रिकसमाजे प्रतिव्यक्ति गुणाधिक्यं शैक्षिकमार्गदर्शकत्वं स्वनागरिकत्वस्य वर्धनार्थं सततप्रयतमानः दृश्यते ।

शिक्षायाः प्रतिफलनं समाजे भवति; यतो हि शिक्षायाः प्रभावः समाजस्योपरि पतति । उत्तमाः विद्यालयाः, उत्तमाः अभिभावकाश्च उत्तमसमाजं निर्मान्ति । अपि च उत्तमसमाजस्य निर्माणार्थं सुनागरिकाणाम् आवश्यकता नितरां वरीवर्ती । वातावरणानुगुणं छात्राणां भाविनागरिकाणां वा शारीरिकमानसिकविकासः जायते। अनुकुलपर्यावरणे सुसंगठितसमाजस्याभ्युदयः भवितुमर्हति । मानवस्य विकासाय वंशानुक्रमेण साकं पर्यावरणस्यापि विशेषमहत्त्वपूर्णं स्थानं वर्तते । व्यवहारविद्भिः मनोवैज्ञानिकैः एतावदङ्गीकृतं यत् स्वस्थपर्यावरणेन बालकेषु अधिकं परिवर्तनं सम्भवति।

परितः सर्वतः आसमन्तात् व्रियते इति पर्यावरणम् । यथा चराचरात्मकं स्थावरजङ्गमात्मकं वा समस्तं वस्तुजातं सर्वतः सर्वथा आच्छाद्यते सा क्रिया पर्यावरणपदवाच्या भवति । परि + आ उपसर्गात् आवरणार्थकात् वृञ्-धातोः ल्युट्-प्रत्यये पर्यावरणम् इति शब्दोऽयं निष्पद्यते । पर्यावरणान्तर्गततया तेषां सर्वेषां सोपानानां संगठनानां प्रभावाणाञ्च सम्मेलनं क्रियते यानि तावत् कस्यापि जीवस्य जातेः वा उद्भवं विकासं तथा मृत्युं प्रभावयन्ति । अपि च वातावरणे तानि सर्वाणि समुपलभ्यन्ते यानि व्यक्तेः जीन्स् (Zeens) अतिरिच्य अन्यान् सर्वान् पक्षान् प्रभावयन्ति ।

साम्प्रतिकसमाजस्य प्रगतिपथे पर्यावरणं गुरुत्वपूर्णं स्थानं भजते । समाजस्य देशस्य वा विकासे पर्यावरणस्य प्रभावः दरीदृश्यते । अतः पर्यावरणस्य प्रभावविषये अधः स्पष्टतया आलोच्यन्ते । सामान्यतया पर्यावरणस्य प्रभावः एतेषां विकासे पतति यथा -

१. व्यक्तेः शारीरिकविकासे,

२. व्यक्तेः मानसिकविकासे,

३. व्यक्तेः बौद्धिकविकासे,

४. सामाजिकविकासे च।

**शारीरिकविकासे पर्यावरणस्य प्रभावः**

शिशोः शारीरिकविकासः मातृगर्भादेवारभ्यते । यदा मातृगर्भे शिशोः सम्पूर्णशरीरस्य निर्माणं भवति तदानीमपि तस्योपरि पर्यावरणस्य प्रभावः द्रष्टुं शक्यते।

अत्र पर्यावरणं मानवकृतपर्यावरणं न भवति, प्राकृतिकपर्यावरणमेव। उदाहरणत्वेन जापानदेशस्य हिरोसीमा एवं नागसाकी इति नगरोपरि आमेरीकादेशेन परमाणुवोमा पातिता । तेन नगरद्वयस्य ध्वंसः जातः । अनन्तरकाले यदा तत्र पुनः जनसमावेशः प्रारब्धोऽभवत्तदानीं तत्रत्यपर्यावरणस्य प्रभावो दृष्टिपथे आगतः । ये शिशवः तत्र जन्मलाभं कुर्वन्ति तेषां प्रायः सर्वाणि अङ्गानि सुष्ठुरूपेण कार्यं कर्तुम् अक्षमाणि भवन्ति । एवमन्यस्योपरि ते भाराः भवन्ति । स्वकीयकार्यं स्वयं निर्वोढुमसमर्थाः भवन्ति । ते किं वा समाजस्य सेवां करिष्यन्ति ? अनेन तत्रत्यपर्यावरणं कीदृशं विषाक्तं जातमेवं तस्य प्रभावोऽपि कीदृश इति ज्ञातुं शक्यते । पर्यावरणं स्वस्थं न भवति चेत् शारीरकविकासे बाधा प्राप्यते । यतो हि शारीरिकविकासार्थं न्यूनातिन्यूनं मुक्तः वायुः , जलञ्चापेक्षते । यदि जलं, वायुश्च प्रदूषितो भवति तर्हि प्रदूषितवायुसेवनेन जलपानेन च शरीरे रोगः संक्रमते । विभिन्नरोगाणां संक्रमणेन शारीरिकक्षयः जायते। अरिष्टाटिल्महोदयेन यथा प्रोक्तम् - "स्वस्थे शरीरे स्वस्थमनसः एव शिक्षा" अर्थात् शरीरं स्वस्थं भवति चेत् शिक्षामुपार्जयितुं शक्नुमः । यदि शरीरं स्वस्थं न तिष्ठति तर्हि किमपि साधयितुं न शक्नुमः । अपि च उक्तं वर्तते "शरीरमाद्यं खलु धर्मसाधनम्" । अनेन प्रकारेण प्रथमं तावत् शारीरिकविकास अपेक्षितः । अतः शारीरिकविकासे पर्यावरणस्य प्रभावः अन्यतम इति ज्ञायते ।

**मानसिकविकासे पर्यावरणस्य प्रभावः**

मनसोऽवस्था मानसिकावस्था । मानसिकावस्थायाः विकासाय स्वस्थपर्यावरणस्य आवश्यकता नितरामपेक्षते । शिशोः, बालकस्य, व्यक्तेः मानसिकस्वास्थ्योपरि पर्यावरणस्य प्रभावः यथा दृश्यते नान्यस्य कस्यापि प्रभावः द्रष्टुं शक्यते । अतो यदि वातावरणमनुकूलं भवति तर्हि विकासोऽनुकूलो भवति, यदि वातावरणं कलुषितं भवति तर्हि बालः कुपथगामी भवति इत्यत्र नास्ति लेशोऽपि संशयस्यावकाशः । यतो हि शिशुः आजन्मनः समाजस्य वातावरणेन साकं वसति। अनेन वातावरणस्य प्रभावानुसारेण प्रेरितो भवति ।

मानसिकपर्यावरणस्य सन्तुलनमावश्यकतया भौतिकसामाजिकपर्यावरण-सन्तुलनाभ्यामेव सम्पादयितुं शक्यमिति सम्यगवधेयम् । शरीरयात्रा मनोधर्मानुसारिण्येव प्रवर्तते । वस्तुत: जनसामान्यस्य मानसिकसंस्कार एव पर्यावरणसंस्कारस्य सुमहत्साधनं दृश्यते । बाह्यस्वच्छता न श्रेयसी तावद् भवितुमर्हति यावदात्मन: सुविचारजागरणं शौचञ्च न साध्यते ।

मानसिकपर्यावरणमिति शब्देन मानससम्बद्धस्य आचारविचारसमन्वितस्य वातावरणस्यार्थो विवक्षितो भवति । मनसा परिष्वक्तान्येव श्रोत्रादीनीन्द्रियाणि शब्दस्पर्शरूपरसगन्धानां विषयाणां ग्रहणे समर्थानि भवन्ति । मनसाऽऽलिङ्गितान्येव च वागादीन्द्रियाणि वचनग्रहणचलनानन्दविसर्जनादीनां कर्मणामनुष्ठाने प्रभवन्ति । मनो हि ज्ञानकर्मोभयात्मकमिन्द्रियं श्रोत्रादिवागादिद्वारेणैव ज्ञाने कर्मणि च प्रवर्तते । पर्यावरणस्य चिन्तनं तत्प्रारूपनिर्धारणमपि मानसिकपर्यावरणम् । मननिदिध्यासन- साक्षात्काराणां श्रवणाधीनत्वात् मन:पर्यावरणपरिभाषादिकं शृणोति, मनुते, निश्चिनोति, साक्षात्करोतीत्येतन्मानसिकमेव पर्यावरणम्।

"यन्मनसा मनुते तद्वाचा वदति" इति विश्वजनीनो भावोऽत्र प्रमाणम् । अत एव-

**यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवेति ।**
**दूरं गमं ज्योतिषां ज्योतिरेकं तन्मे मन: शिवसङ्कल्पमस्तु ।।**

(शुक्लयजुर्वेद: - अ. ३४/का. १)

इत्यादिवैदिकप्रार्थना मानसिकं पर्यावरणमेव स्वस्थयितुं मनस: शिवसंकल्पकारित्वं समर्थयति। अपि च स्वस्तिवाचनपुण्याहवाचनादिमन्त्रपाठा: यज्ञानुष्ठानादिकर्माणि च मानसिकपर्यावरणद्वारेणैव सामाजिकं भौतिकं च पर्यावरणं स्वस्थयन्ति । अत: स्वस्थपर्यावरणस्य उत्पत्ते: विनाशे मानवस्य भूमिका अत्यन्तगुरुत्वपूर्णा भवति। अनुकूलवातावरणेन मानसिकविकासोऽपि च सुनागरिकाणां निर्माणं सम्भवति । अनेन प्रकारेण मानसिकविकासे पर्यावरणस्य प्रभाव: कीदृशो वर्तते इति ज्ञातुं शक्यते।

**बौद्धिकविकासे पर्यावरणस्य प्रभाव: -**

शिशो: वयोवर्द्धनेन साकं बुद्धे: विकासोऽपि जायते । बौद्धिकविकास: द्विधा विभक्तुं शक्यते यथा शिक्षागतबुद्धे: विकास:, बाह्यगतबुद्धे: विकासश्च । शिक्षागतबुद्धे:

विकासः सामान्यतः विद्यालयेषु , गुरोः सकाशात्, पुस्तकानामध्ययनेन भवितुमर्हति। आचारव्यवहारादयः बाह्यबुद्धित्वेन उच्यन्ते । कुत्र कीदृशः व्यवहारः करणीयः, कथमाचरणीयम्, केन साकं कीदृशः वार्तालापः करणीय इति बाह्यबुद्धौ आयाति । सर्वत्र बुद्धेः प्रभावः गुरुत्वपूर्णो भवति । मानवः स्वीयबुद्धिबलेन यत्किमपि असाध्यं साधयितुं समर्थो भवति, व्यवहारार्थं या बुद्धिः अपेक्षते सा बुद्धिः तत्रत्यपर्यावरणेषु, परिवारेषु, ग्रामेषु च प्राप्यते । मानवो यत्र निवसति तत्रत्यपर्यावरणं तं प्रभावयति इत्यत्र नास्ति लेशोऽपि संशयस्यावकाशः । अतः यदि कलुषितपर्यावरणं भवति तर्हि कुबुद्धिः मस्तिष्के प्रविशति । इयं कुबुद्धिः नैकानि कुकार्याणि कर्तुं प्रेरयति। अनेन स्वीयभविष्यत्, परिवारस्य भविष्यत्, देशस्य भविष्यच्च नष्टं यास्यति। यदि संस्कारयुक्तवातावरणं भवति तर्हि बालकः संस्कारवान् भवति , उत्तमबुद्धेः विकासः जायते । सर्वत्र सः सुव्यवहारं प्रदर्शयति । अनेन सर्वेषां प्रियभाजनं भवति । व्यवहारस्य वैपरीत्यं दृश्यते चेत् निन्दाभाजनं जायते । उच्यते हि -

**"व्यवहारेण जायन्ते मित्राणि रिपवस्तथा" ।**

बुद्धिहीनः मनुष्यः असहाय इत्यपि वक्तुं शक्यते । बुद्धिः नास्ति चेत् कुत्रापि गन्तुं न शक्यते । किमपि कर्तुं च न शक्यते । यदि वा क्रियते तर्हि तत्र सफलता प्राप्तुं नैव शक्यते । सम्प्रति मानवः स्वीयबुद्ध्या आकाशमार्गे अटति, संगणकयन्त्रमाध्यमेन अल्पीयसि काले बहूनि कार्याणि सम्पादयितुं शक्नोति। इतोऽपि उन्नतिपथे अनुदिनमग्रे सरति। अतो बुद्धेः प्रभावः महान् वर्तते । बुद्धेः विकासे पर्यावरणस्य प्रभावः सम्पूर्णतया दृश्यते ।

**सामाजिकविकासे पर्यावरणस्य प्रभावः**

समाजोपयोगी सामाजिकप्राणी भवितुमर्थात् सामाजिकविकासाय यादृशं पर्यावरणमपेक्षते तत्सामाजिकपर्यावरणमुच्यते । सुसमाजगठनार्थं सामाजिकपर्यावरणस्य महत्त्वं वरीवर्ति । सामाजिकपर्यावरणपदेनापि मानवस्य तदीयक्रियाणां च व्यवस्थितिरेव विवक्षिता भवति। समाजो हि व्यक्तेरेवैकं प्रारूपम्, व्यक्तिभिरेव समाजस्य संघटनात्। समाजस्य मूलभूता आवश्यकता शिक्षा, रक्षा, प्राप्तिः, परिचर्या इत्यादीनामेवं

तद्गुणविशिष्टानां व्यक्तीनां च व्यवस्थितेन संघटनेन परिकल्प्यते । तत्र प्रयोजककर्तृत्वम् आवश्यकतानां स्वतन्त्रकर्तृत्वं तु व्यक्तीनामेव भवति । मानवा: स्वसंस्कृते: रीतीनां पद्धतीनां शिक्षादीनां च द्वारेण सामाजिकीं व्यवस्थां कुर्वन्ति। आवश्यकतानुसारेण च तस्यां परिवर्तनं परिवर्धनं च क्रियते । अत: समाजो यदन्तरिमा व्यक्तयस्तिष्ठन्ति ये मानवा: निवसन्ति स तान् परित: आवृणोति तदिदं वातावरणमेव सामाजिकपर्यावरणं भवति ।

## सहायकग्रन्थसूची

१. पर्यावरण और शिक्षा - डॉ. बी. एल्. जाटब, २००४

२. पर्यावरणशिक्षा - डॉ. मदन मोहन झा, २००१

३. पर्यावरण शिक्षा - डॉ. एम. के. गोयल, २००४-०५

४. शिक्षा, समाज और विकास - चाँद किरण, २००४

५. स्वास्थ्यशिक्षा - जी. पी. शौरी, २००५

६. Problems of Indian Education - Prof. B.C. Rai, 1998

ISSN: 2231-0452

# संस्कृताध्ययनाभिरुचेर्विकासे प्रहेलिकानां योगदानम्

*एन्.वि.श्रीनिवास*
*(शोधच्छात्रः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**प्रहेलिकायाः स्वरूपम् -**

संस्कृतजगति काव्यमहत्त्वम् अतीव विद्यते । तेषु संस्कृतकाव्येषु त्रयः भेदाः सन्ति - (1) पद्यकाव्यम् (2) गद्यकाव्यम् (3) चम्पूकाव्यम् इति । पद्यकाव्येष्वपि अवान्तरभेदास्सन्ति।

**गद्यं पद्यं च मिश्रं च तत्त्रिधैव व्यवस्थितम् ।**
**पद्यं चतुष्पदी तच्च वृत्तं जातिरिति त्रिधा ।।** (काव्यादर्शः 1-11)

पद्येषु प्रहेलिकायुक्ताः श्लोकाः बहवः विद्यन्ते । प्रहेलिकाशब्दस्यार्थः गुरुबालप्रबोधिकाकारः ''प्रहेलयति अभिप्रायं सूचयति इति प्रहेलिका'' इत्यवोचत्। भरतकोशोऽपि ''प्रवह्लिः, प्रवल्ही, प्रवह्लिका, प्रहेलिः, प्रहेलिका'' इति पञ्चपर्यायपदानि विद्यन्ते । अमरसिंहोऽपि प्रहेलिकायाः पर्यायपदत्वेन ''प्रवह्लिका'' इति प्रयुक्तवान् । शब्दरत्नावलीकारः प्रवह्लिका, प्रश्नदूती इत्यकथयत् । शब्दकल्पद्रुमकारोऽपि ''प्रहलति अभिप्रायं सूचयतीति प्रहेलिका इत्युक्तवान् । एवं साहित्यदर्पणव्याख्याने तृतीयपरिच्छेदे चतुष्षष्टिकलासु प्रहेलिका अन्यतमा इत्यलिखत्। कादम्बर्यामपि बाणभट्टः ''अक्षरच्युतकमात्राच्युतकबिन्दुमतीरूढ-चतुर्थपादप्रहेलिका पादानादिभिः'' इति प्रयुक्तवान्।

एवं बहुभिः आलङ्कारिकैः प्रहेलिकायाः अर्थस्य भाष्यमकारि। प्राचीनलक्षणमेकं प्रहेलिकाविषये इत्थं दृश्यते ।

**''व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् ।**
**यत्र बाह्याभ्यन्तरावर्थौ कथ्येते सा प्रहेलिका ।।**''(प्रहेलिका: 1-108)

**प्रहेलिकाः -**

सारस्वतसाहित्ये स्थितासु नैकासु प्रक्रियासु प्रहेलिका अन्यतमा। भाषावैशिष्ट्यदृष्ट्या प्रहेलिकामुद्दिश्य समग्रचर्चा करणीया। एतस्मिन् शोधपत्रे प्रहेलिकायाः स्वरूपस्वभावौ सङ्ग्रहरूपेण विव्रियेते। साहित्ये परिणतिपरिनिष्ठताप्तये प्रहेलिका आविर्भूता इति वक्तुं शक्यते। प्रहेलिका प्राचीना वा नवेति अंशः परिशीलनीयः।

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषष्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ।।** (ऋग्वेदः )

**उभतो द्वे दीर्घिके मध्येऽग्निस्ततोऽमृतं**
**यो विन्दति तद्विन्दत्यमृतम् ।।** (उपनिषदि)

**गङ्गायमुनयोर्मध्ये बालरण्डा तपस्विनी।**
**बलात्कारेण गृह्णीयात् तद्विष्णोः परमं पदम् ।।** (तन्त्रशास्त्रम्)

एवं वेदोपनिषदतन्त्राद्यतिरिक्ततया तिरुनामादिष्वपि प्रहेलिकाच्छाया दृग्गोचरी भवति। सभासु राजास्थानेषु सम्मेलनेषु च एतासां प्रचारः वरीवर्तीति तत्तत्कथाभ्यः विज्ञायते। चमत्कारवैचित्र्ये साहित्यस्य प्रधानाङ्गं वर्तते। अविचारितरमणीयविचार्यमाण-रमणीयसमस्तसूक्तव्यापिसूक्तैकदेश-दृश्य-शब्दगतार्थगत-शब्दार्थगत-अलङ्काररस-प्रख्यातवृत्तचमत्कारगताः इति इमाः दशधा विभज्यन्ते। एतेषु दशस्वपि सर्वेषु चमत्कारः यद्यभविष्यत् तदानीं साहित्यसरसत्वं जायते। अधो निर्दिष्टोदाहरणैः चमत्कारः दृग्गोचरो भवति।

आनन्दवर्धनः वाच्यव्यङ्ग्ययोः भेदविज्ञापने एतं श्लोकमुदाहृतवान् -

**कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम् ।**
**सभ्रमरपद्माघ्राणशीले वारितवामे सहस्वेदानीम्।।**(ध्वन्यालोकः1-54)

इयमेका हृद्यप्रहेलिका। एतस्यां नैकविधव्यङ्ग्यः स्फुरितो भवति। उपपत्तेः दन्तक्षययुक्तनायिकां पत्यादयः आमनन्ति। तदानीं त्वस्मदीयसखी एवमब्रवीत् यत्

नैकवारम् अहमेवायं तथापि अशृणोः वा ? मधुकरस्थितपद्माघ्राणमकार्षीः वेदनामनुभव नखक्षतयुक्तप्रेयसीं को वा न कुप्यति इति वाच्यार्थः। मधुकर एव एतत्कार्यमकार्षीत् इति न्यायः। अतः इयमाशङ्कनीया इति पतिमुद्दिश्य व्यङ्ग्यार्थः। एतदनन्तरं दन्तक्षतादिकार्याणि न करणीयानीति उपपत्तिमुद्दिश्य प्रेयसीदन्तक्षतादयः पतिकोपकारणयुक्ताः भान्ति न तु सख्या, अतस्तावत् आनन्दयुक्ताः न भवेयुः इति सपत्नीः उद्दिश्य एतस्यां या काऽपि शङ्का न करणीया इति पार्श्वस्थजनानुद्दिश्य, उपपत्तिकारणात् चुम्बनादयः प्राप्तव्यश्चेदपि बहिरङ्गरूपेण चिह्नयुक्ता न भवेत् इति नायिकामुद्दिश्य इत्येवं नैकव्यङ्ग्यप्रतीकाः भवन्ति। इयं हृद्यप्रहेलिका। एनाम् आलङ्कारिकाः वस्तुध्वनिरूपेण स्वीकुर्वन्ति।

प्रहेलिकाभ्यः न तु केवलचमत्कारोदयः अपि च तासां नैकप्रयोजनानि सन्ति। तत्तच्छास्त्रविषयपरिज्ञानं लोकज्ञानेन साकं सदालोचनशक्तिः अभिवर्धते, मनोवैज्ञानिकाः समाजोपादेययुयुत्साकमनादीनाम् उदात्तीकरणार्थं क्रीडादीनामुपयुक्ततां वदन्ति। विद्यार्थिनां क्रीडादिभ्यः शरीरपुष्टिः- अनुशासनम् - उदात्तभावाः सत्येन लभ्या भवन्ति। अपि च प्रहेलिकाभ्यः मनःपरिणतिः आलोचनाशक्तिः, जिज्ञासा, धारणा, समन्वयशक्तिः इत्यादि प्रयोजनानि सम्भवन्ति। अत एव एताः क्रीडाप्रायाः इति प्राचीनाः अवदन् । तत्तत्स्थानेषु, सभासु गोष्ठीकार्यक्रमेषु प्रहसनसमयेषु प्रहेलिकारूपेण परीक्षणं कुर्वन्ति स्म। परीक्षोपयुक्ताः प्रश्नाः गम्भीराः आसन् । परीक्षकाणां प्रश्नावगमनं कृत्वा समादधति स्म । प्रश्नानां नैकप्रकारयुक्तत्वात् प्रहेलिकासंख्या प्रवर्धिता **"प्रहेलयति इत्थमभिप्रायं सूचयति इति प्रहेलिका"** इति गुरुबालप्रबोधिकाकारः व्युत्पत्तिं दर्शयामास।

**"प्रहेलिका सा स्यात् वचस्तत् वृत्तिकारि यत्"** इति अन्यलक्षणम्। साहित्यदर्पणव्याख्याता आचार्य कृष्णमोहनशर्मा, काव्यादर्शव्याख्याता विद्याभूषण श्रीरङ्गाचार्यशास्त्री एतल्लक्षणं कस्मदीयमिति नावोचन् - भावादिनिगूढयुक्ता प्रहेलिकेति तल्लक्षणसारः । आचार्यदण्डी एवं प्रत्यपादयत् -

**क्रीडागोष्ठीविनोदेषु तज्ज्ञैराकीर्णमन्त्रणे।**
**परव्यामोहने चापि सोपयोगाः प्रहेलिकाः॥** (प्रहेलिकाः1-52)

"क्रीडार्थं या गोष्ठी सभा तत्र ये विनोदाः विचित्रवाग्व्यवहारैः प्रमोदाः तेषु तथा तज्ञैः प्रहेलिकाज्ञैः आकीर्णे व्याप्तसमाजे यन्मन्त्रणं गुप्तभाषणं तस्मिन् तथा परस्य बोद्धव्यपुरुषभिन्नस्य व्यामोहेन अभिप्रेतार्थानवगमने च प्रहेलिकाः सोपयोगाः उपयुक्ताः सन्तीति भावपद्यशब्दालङ्कारादिरूपणेयं न काव्ये प्रयुक्ता तथापि विदुषां क्रीडागोष्ठीविनोदादिषु उपयुक्ता इति भावः" इति व्याख्यातं विद्याभूषण श्रीरङ्गाचार्यशास्त्रिवर्येण व्याख्यातम्। (काव्यादर्शे - ३६२, भण्डारकरपरिशोधना)

नाटिकाकाले सम्यक् एतासाम् अभिज्ञानसत्त्वात् अस्या उपयोग आसीत्। क्रीडाप्रायविनोदगोष्ठीषु, समाजे रहस्येन सम्भाषणे एतासामुपयोगः भवतीति दण्डिनोक्तत्वात् प्रहेलिकास्वरूपस्वभावोद्देश्यानि कीदृशानि इति ज्ञायते । एतां दण्डिसूक्तिमेव साहित्यदर्पणव्याख्यातारः प्रहेलिकासन्दर्भमवोचन् । दण्डिनः प्रहेलिकोपयुक्तत्वं विज्ञाय १६ भेदान् ऊचुः - समागत, वाञ्छित, प्रमुषित, परुष, प्रकल्पित, निभृत, सम्मूढ, पारिहारिक, समानशब्द नामान्तरित एकच्छन्नोभयच्छन्न सङ्कीर्ण व्युत्क्रान्त समानरूपाण्या प्रहेलिका अधिकप्रचारं प्रापुः । अत एव १६ भेदानवोचत्। अवशिष्टाः दुष्टप्राया इत्यवादीत्। भोजेन षडेव प्रत्यपादिषत। विश्वनाथेन च्युतदत्ताक्षरादिक इत्याद्यायोजि। किन्तु संख्या नोक्ता आचार्य हेमचन्द्रोऽपि एवमेवावादीत्। साहित्यदर्पणकाव्यानुशासनव्याख्या भोजस्य सरस्वतीकण्ठाभरणात् उदाहृतवती। विदग्धमुखमण्डनकर्ता कवीन्द्रकण्ठाभरणकर्ता च प्रहेलिकानां वैविध्यमङ्गीचक्रुः।

भावगूढतादिभ्यः चमत्कारापादनमेव प्रहेलिकालक्षणम्। बहिर्लापिकान्तर्लापिकवर्णव्यञ्जनादिचित्रकर्तृक्रियाप्रहेलिकासु अन्तर्भावा भवन्तीति "प्रहेलिकामुक्तावली" इत्यस्मिन् ग्रन्थे उक्तम्। किन्तु केन केन व्यलेखि इति न ज्ञायते। पृथक्तया स्थितप्रहेलिका एकत्रीकृत्य लेखकः एव तन्नाम स्थापितवान् न वेति न ज्ञायते। मम प्रपितामहोक्तप्रकारेण ७०-८० भेदाः सन्ति।

संस्कृते प्रहेलिकाः लक्षपरिमिताः सन्ति। तासां सर्वासां वर्णनमत्र दुष्करमेव। यथा संस्कृते तथेतरभाषास्वपि प्रहेलिका दरीदृश्यन्ते। संस्कृतेऽपि विविधप्रहेलिकाः मनांसि रञ्जयन्ति।

**सामान्यप्रहेलिकाः**

**वने जाता वने त्यक्ता वने तिष्ठति नित्यशः।**
**पुण्यस्त्री न तु सा वेश्या यो जानाति स पण्डितः।।** (प्रहेलिकाः 1-1)

* समाधानम् :- अत्र वनशब्दः जलार्थे प्रयुक्तः न तु अरण्यार्थे। अतः वने जाता नाम जले जाता जले त्यक्ता, जले तिष्ठति नित्यशः सा ''नौका'' । सर्वैः धनं दत्त्वैव सा अनुभूयते।

**एकचक्षुर्न काकोऽयं बिलमिच्छेन्न पन्नगः।**
**क्षीयते वर्धते चैव न समुद्रो न तु चन्द्रमाः।।** (प्रहेलिकाः 1-5)

* समाधानम् :- सूची (एकाक्षी)

**शङ्करं पतितं दृष्ट्वा पार्वती हर्षनिर्भरा।**
**रुदन्ति पन्नगाः सर्वे हा हा शङ्कर शङ्कर।।** (प्रहेलिकाः 1-19)

* समाधानम् :- अत्र पार्वती न गौरी, पर्वतकुलीना। शङ्करः नाम चन्दनवृक्षः। अतः चन्दनवृक्षस्य पतनं दृष्ट्वा एका पर्वते जाता हर्षमुपागता। सर्पास्तु आश्रयस्य विनाशकारणात् रुदन्ति।

**रामस्य भगिनी सीता तस्य पत्नी सपत्नजा।**
**पार्वतीपतिर्गोविन्दः कालस्य कुटिला गतिः।।**
(प्रहेलिकाः 1-42)

* समाधानम् :- श्लोके पदानामन्वयकाठिन्यात् विपरीतार्थः अवभासते। अतः तस्य अन्वयः एवं स्यात्। यत् पार्वती + ई + पतिः = पार्वतीपतिः, अत्र ई नाम लक्ष्मीः लक्ष्म्याः पतिः गोविन्दः, तस्य भगिनी पार्वती। तस्य = गोविन्दस्य अवतारेषु

रामस्य पत्नी सीता, सपत्ननाम रावणकुम्भकर्णादिराक्षसानां संहरणार्थं जा = जाता, सीता इत्यर्थः।

**उपसंहारः**

संस्कृतकक्ष्याः अधिकतया व्याख्यानभूयिष्ठाः एव भवन्ति । अध्यापकाः अपि स्वीयं कर्म शीघ्रं समापयितुं प्रयतन्ते । तेन कक्ष्यासु छात्रैः जामितानुभूयते । छात्रेषु उत्साहवर्धनार्थं यद्यपि क्रीडाः विद्यन्ते तत्र शरीरपुष्टिः, अनुशासनम् इत्यादयः एव लभ्यन्ते। परं मनःपरिणतिः, आलोचनाशक्तिः, जिज्ञासा, धारणा, समन्वयशक्त्यादीनि प्रयोजनानि प्रहेलिकाद्वारा प्राप्यन्ते इति बहूनां प्राचीनानाम् अनुभवः। अतः संस्कृताध्ययनाभिरुचेः उत्पादनार्थं प्रहेलिकाः तेषामनुप्रयोगश्च अनिवार्यः । अतः संस्कृतकक्ष्यासु छात्राभिरुचेः संवर्धनार्थं क्रियाशीलतायाः परिरक्षणार्थं च प्रहेलिका अत्यन्तमुपकरोतीति मम अभिप्रायः ।

## सहायकग्रन्थसूची


(१) 'अमरकोशः' - अमरसिंहः, आर जैन प्रिंटिंग प्रेस, दिल्ली, २००८

(२) 'औचित्यविचारचर्चा' - क्षेमेन्द्रः - चौखम्भा ओरियन्टालिया, वाराणसी, १९८२

(३) 'कादम्बरीकथामुखम्' - बाणभट्टः, चौखम्भा संस्कृतसंस्थान, वाराणसी, २०००

(४) 'काव्यादर्शः' - दण्डी, मेहरचन्द लछमनदास, दिल्ली, १९८५

(५) ध्वन्यालोकः - आनन्दवर्धनः, चौखम्भा संस्कृतभवन, वाराणसी, २००४

(६) 'प्रहेलिकाः' - श्रीभाष्यं विजयसारथि - दीप्ति प्रिन्टर्स, हनमकोण्डा, २००४.

(७) 'सरस्वतीकण्ठाभरणम्' - भोजः - Indiragandhi National Centre for the Arts, New Delhi, 2009

(८) 'साहित्यदर्पणम्' (प्रथमपरिच्छेदः)-विश्वनाथः - चौखम्भा पब्लिकेशन्स, नई दिल्ली, 2001

ISSN: 2231-0452

# माध्यमिकस्तरे संस्कृतपद्यशिक्षणविधीनां प्रयोगः तद्वैशिष्ट्यञ्च

*मदन सिंह*
*(शोधच्छात्रः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**उपोद्घातः**

संस्कृतसाहित्ये पद्यं प्रमुखं स्थानं भजते । पद्यद्वारा छात्राणां भावग्रहणयोग्यता, सौन्दर्यग्रहणयोग्यता च वर्द्धते । तेन च परितः विद्यमानं सर्वमपि रमणीयं रूपं कलात्मकदृष्ट्या दृश्यते । सौन्दर्ये अन्तर्निहितस्य चिरन्तनसत्यस्य ज्ञानेन ''सत्यं, शिवं, सुन्दरम्'' इत्यादिमूल्यानुगुणं छात्राणाम् आत्मविकासः, सांवेगिकविकासः, आध्यात्मिकविकासश्च सम्भवति। एवं पद्यानां रसास्वादनेन आनन्दानुभूतिः ततश्च परमार्थप्राप्तिः लक्ष्यते । पद्यनिर्माणसमये याः भावनाः कल्पनाश्च कवेः अन्तःकरणे प्रादुर्भूताः तासां भावनानां कल्पनानां च छात्राणामन्तःकरणे पुनरुद्भावनमेव पद्यशिक्षणस्य प्रधानमुद्देश्यम् । एवञ्च पद्यशिक्षणं छात्राणां मानसिकविकासाय, कल्पनाशक्तेः रचनात्मकप्रवृत्तेश्च विकासाय, सौन्दर्यानुभूतये च उपयुज्यते।

शैक्षिकप्रक्रियायां शिक्षकः, शिक्षार्थी पाठ्यक्रमश्चेति त्रीणि तत्त्वानि भजन्ते प्राधान्यम्। त्रीण्यपि तत्त्वानि परस्परं सम्बध्यन्ते । यथा प्रोक्तम् - ''आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम् । विद्या सन्धिः'' .......[१] इति शिक्षकश्च पाठ्यक्रमान्तर्गतानां विभिन्नविषयाणां ज्ञानदानार्थं काँश्चन विशिष्टान् मार्गाननुसरति, काश्चन विशिष्टाः क्रियास्सम्पादयति । विशिष्टक्रियामार्गादयः इमे विधिप्रविध्यनुदेशनादिपदैः व्यवह्रियन्ते। एवञ्च शिक्षाशास्त्रज्ञः **थाँमस्.एम्.रिस्क** कथयति यत् -

**पाठस्य सामान्यविशिष्टोद्देश्यान्यधिगन्तुं निर्दिष्टनियमानुसारं छात्राध्यापकैरनुष्ठेयानां परस्परसम्बद्धानां विकासात्मिकानां क्रियाणां शृङ्खलैव विधिः** इति।

व्यवहारे समुचितपरिवर्तनमेव शिक्षणम् । शिक्षणेन अधिगमः जायते । शिक्षणाधिगमप्रक्रियायां जायमानानां समस्यानां परिहारार्थं शिक्षाविद्भिः काले काले नवनवविधयः आविष्कृताः वर्तन्ते । एतान् अभिनवविधीन् उपयुज्य शिक्षकाः शिक्षणक्रियां सफलां रुचिकराम् आकर्षिकां च कर्तुं सर्वदा प्रयतन्ते ।

साम्प्रतं प्रत्येकं ज्ञानक्षेत्रे निरन्तरविकासत्वात् सर्वत्र दृष्टिः प्रसारयितुं न शक्यते। तदनुगुणम् अल्पेनैव श्रमेण अल्पीयसि काले च बहून् विषयान् ज्ञातुं सम्प्रयतते मानवः। न केवलं ज्ञानप्राप्तिक्षेत्रे अपि तु शिक्षणस्य, शिक्षणदानस्य च क्षेत्रे पूर्वोक्तरीत्या अल्पश्रमेण अल्पसमये च बहुषु छात्रेषु अधिगमोत्पादनं कर्तुं प्रयतते । एतत् सर्वं समाधातुं विधिरेव प्रभवति ।

विभिन्नशिक्षणविधीनां प्रयोगेण अध्ययनं प्रभावशालि रोचकञ्च भवति । निम्नोक्तकारणैः शिक्षणविधीनां वैशिष्ट्यमुच्यते -

१. पाठ्यवस्तुनः सार्थकतायाः सुग्राह्यत्वस्य च सम्पादनम् ।

२. पाठ्यविषयस्य रोचकत्वाकर्षणीयत्वयोः सम्पादनम् ।

३. लब्धज्ञानस्य परिपुष्टीकरणम् ।

४. अधीतस्य स्थैर्यकल्पनम् ।

५. छात्राणां भाषाध्ययने सक्रियताप्रवर्धनम् ।

६. अनुभवसीम्नः विस्तारः ।

७. शिक्षणस्य प्रभावजनकाभिवर्धनम् ।

एवञ्च शिक्षणविधीनां वैशिष्ट्यं स्पष्टीभवति । अतः संस्कृतशिक्षणेऽपि विशिष्य पद्यशिक्षणप्रसङ्गे अधिगमसम्पादने प्राचीनार्वाचीनविधीनां प्रयोगः कर्तव्यः । तेन पद्यशिक्षणं रोचकं भवति, छात्राश्च संस्कृतं प्रति नितरामाकृष्टाः भवन्ति । अतः शिक्षाविद्भिः परिकल्पिताः प्रतिपादिताश्च एते अधोलिखिताः विधयः माध्यमिकस्तरे संस्कृतपद्यशिक्षणे प्रामुख्येन उपयुज्यन्ते ।

**माध्यमिकस्तरे संस्कृतपद्यशिक्षणविधयः -**

**दण्डान्वयविधिः -**

संस्कृतभाषया उपनिबद्धानि काव्यानि क्लिष्टपदयुतानि । तादृशकठिन-काव्यानां सुगमया रीत्या अवबोधनाय अन्वयं बहूपकरोति । अतः पद्यशिक्षणे अन्वयः विशिष्टं स्थानं भजते । अन्वयः इति पदे अनु अयश्चेति पदद्वयस्य सम्मेलनं वर्तते। गद्यक्रमम् अनु अयति इत्यर्थः । अन्वयेन पद्याधिगमः सुकरो भवति । अन्वयस्य भेदद्वयं निरूपितं, खण्डान्वयः दण्डान्वयश्चेति ।

''दण्डवत् खण्डवच्चैव द्विभेदोऽन्वय उच्यते'' इति ।

तत्र प्रथमविधिः दण्डान्वयविधिः इत्थं परिभाषितः -

**आद्यं विशेषणं योज्यं विशेष्यं तदनन्तरम् ।**
**क्त्वाणमुल्ल्यप्प्रभृत्येवं पूर्वं दण्डान्वयो भवेत् ।।**[२] इति ।

अर्थात् दण्डान्वये प्रथमे विशेषणपदं तदनु संज्ञादिविशेष्यपदं तत्पश्चात् क्त्वा, णमुल् इत्यादिप्रत्यययुक्तक्रियापदानाम् उल्लेखः क्रियते । एषः क्रमः संस्कृतगद्यवाक्येषु भवति। किञ्च पद्यरचनायाम् एतादृशस्य क्रमस्य प्राधान्यं न भवति । अतः अनेन क्रमेण छन्दोबद्धश्लोकानां गद्यरूपेण अन्वयकरणं दण्डान्वय इति कथ्यते । दण्डान्वये पद्यस्य श्लोकस्य वा क्रमरहितवाक्यानि गद्यरूपाणि क्रियन्ते । श्लोकस्य पूर्णवाक्येन परिणतिः दण्डान्वये भवति । एतस्मिन् प्रधानवाक्यस्य अन्वेषणं कृत्वा आश्रितपदानि ज्ञायन्ते। विधौ अस्मिन् शिक्षकः प्रश्नोत्तरं यथावसरं करोति । एतत् प्रश्नोत्तरं मातृभाषायां प्रचलति। प्रश्नानां सम्बन्धः व्याकरणेन भवति । यतो हि पद्ये कर्तृकर्मक्रियादि ज्ञातुं प्रश्नाः क्रियन्ते। अनेन छात्राः स्वयमेव वर्ण्यविषयेण परिचिताः भवन्ति । माध्यमिकस्तरे उच्चस्तरे च विधिरयं उपयोक्तुं शक्यते । तथापि नाऽयं मनोवैज्ञानिकविधिः।

**खण्डान्वयविधिः -**

अन्वयस्य द्वितीयो भेदः खण्डान्वय इति । खण्डान्वये दण्डान्वयविधिरिव आदौ प्रधानवाक्यस्य अन्वेषणं क्रियते । तदनन्तरं श्लोकस्य भावानां व्याख्यार्थं प्रयासः विधीयते। तथाहि-

**कर्तृकर्मक्रियास्तावच्छ्लोके योज्यास्ततः परम् ।**
**किमो रूपं पुरस्कृत्य तृतीयादि नियोजयेत् ॥**
**ल्यबन्तश्च तुमन्तश्च क्त्वान्तं कर्मविभूषितम् ।**
**खण्डान्वये पुनः प्रश्नपूर्वमन्ते प्रयोजयेत् ॥**[३] इति ।

खण्डान्वये आदौ श्लोकान्तर्गतानां कर्तृकर्मक्रियादीनां योजनं क्रियते । अर्थात् आगतानां कर्तृकर्मक्रियादिपदानाञ्च अवबोधः कार्यते । तदनु किम् इति पदस्य रूपम् अर्थात् श्लोके वर्तमानानां संज्ञापदानां सर्वनामपदानां वा स्पष्टीकरणार्थं कः, कम्, कस्मै, का, कैः इत्यादिपदानां प्रश्नेषु प्रयोगः क्रियते । एवमेव विशेषणादीनां ज्ञापने कीदृशः, कथम्भूतः, किम्भूतः इत्यादिपदानां तृतीयाविभक्तिसंयुतैः पदैः सह प्रयोगः क्रियते । यथा - केन कृतम्? कया कृतम् ? इति । एवमेव वाक्ये समागताः ल्यप्प्रत्ययान्ताः तुमुन्प्रत्ययान्ताः क्त्वाप्रत्ययान्ताः वा धातवः व्याख्यायन्ते । अन्ते तु वाक्ये स्थितानि कर्मादिपदानि प्रश्नानां साहाय्येन स्पष्टीक्रियन्ते ।

किञ्च खण्डान्वयविधौ प्रधानक्रियायाः अन्वेषणं सर्वप्रथमं क्रियते, तस्याः क्रियायाश्च सम्बन्धः कर्त्रा दृश्यते । इदम् अन्वेषणकार्यं प्रश्नानां साहाय्येन भवति। इमे प्रश्नास्तु श्लोकानां कथावस्तुना सम्बद्धाः भवन्ति । प्रश्नद्वारा श्लोकानां साहित्यिकं पक्षम् उद्घाटयितुं प्रयासाः क्रियन्ते । एतेन छात्रेषु पद्यस्य भावबोधनं रसास्वादनञ्च भवति । खण्डान्वयविधिरयं आकाङ्क्षाविधिप्रश्नोत्तरविधिरित्यादिनाम्नाऽपि व्यवह्रियते। यतो हि अत्र प्रश्नानाम् आकाङ्क्षा भवति शिक्षणकाले ।

मनोवैज्ञानिकदृष्ट्या खण्डान्वयविधिः उत्तमो वर्तते । अस्मिन् छात्राणां सहयोगेन पाठं रुचिकरं कर्तुम् अध्यापकः सफलो भवति । शिक्षकेण सह छात्राः

अपि सक्रिया भूत्वा प्रश्नानां माध्यमेन स्वविचारशक्तेः प्रयोगं कुर्वन्ति । अनेन छात्राणां जिज्ञासावृत्तिरपि विकसिता भवति । खण्डान्वयविधिः सामूहिकशिक्षणे अतीव श्रेयस्करो वर्तते । अस्मिन् चितानां प्रश्नानां साहाय्येन श्लोकार्थं छात्राः ज्ञातुं शक्नुवन्ति । अपि च अनेन न केवलं पद्यानां सूक्ष्मभावं ज्ञातुं किन्तु रसास्वादनं कर्तुमपि समर्थाः भवन्ति छात्राः । छात्राणां संस्कृतभाषायाम् अभिव्यक्तिकौशलं संवर्धयितुं खण्डान्वयविधिरुपकरोति । माध्यमिकस्तरे उच्चस्तरे च विधिरयं श्रेयस्करो वर्तते ।

**व्याख्याविधिः -**

वस्तुतः उच्चकक्ष्यायाः कृते विधिरेषः अत्यन्तं महत्त्वपूर्णः उपयोगी च । ''कयाचित् विदुष्या उच्चमाध्यमिकस्तरेऽपि व्याख्याविधिः अपेक्षितः इत्युक्तम्''[४]। परन्तु अस्य प्रयोगः माध्यमिकस्तरेऽपि अपेक्षितः। अनेन विधिना पाठनेन माध्यमिकस्तरीयछात्राः श्लोकार्थं सम्यक्तया अवगच्छन्ति। अयं मनोवैज्ञानिक-विधिः। व्याख्याविधौ आदौ कठिनशब्दाः, तत्पश्चात् विषयवस्तुनः भावाः विचाराः च स्पष्टीक्रियन्ते । किञ्च अनेन विधिना प्रथमे अध्यापकः श्लोके विद्यमानानां शब्दानामर्थं मातृभाषया, अनन्तरं समग्रश्लोकस्य सरलार्थं वदति । अपि चात्र कवेः परिचयः, कवेः शैली, कवेः अभिप्रायः, कवेः सन्दर्भः इत्यादीनां व्याख्या क्रियते। किञ्च श्लोके प्रयुक्तानां छन्द-अलङ्कार-गुण-रस-रीत्यादीनाम् उल्लेखः क्रियते। एवञ्च आवश्यकतानुसारं व्याकरणसम्बद्धटिप्पणी क्रियते। पद्यगत-व्याकरणांशाः सूत्रद्वारा अवबोध्यन्ते । विषयवस्तुनः गूढार्थमपि व्याख्याद्वारा स्पष्टीक्रियते । पाठ्यविषयस्य भाषा-शैल्यादीनां ज्ञानमत्र प्रदीयते ।

अनेन विधिना अध्यापकः कथाद्वारा पद्यस्य भावार्थं स्पष्टयितुं प्रयत्नं विधत्ते। शब्दार्थापेक्षया भावार्थस्य महत्त्वं विधौ अस्मिन् प्रदीयते । अत्र छात्राणां कल्पनाशक्तेः विकासार्थं प्रयत्नः क्रियते । अपि चात्र अध्यापकः पद्यस्य दार्शनिकपक्षं स्पष्टीकरोति । किञ्च अध्यापकः स्वयं भृशं परिश्रम्य पाठ्यवस्तुनः पूर्णं ज्ञानं व्याख्याविधिना प्रददाति। विधौ अस्मिन् अध्यापकस्य सक्रियता छात्राणां

निष्क्रियता चावलोक्यते । तथा छात्राः अध्यापकाश्रिताः भवन्ति । इत्थं पद्यशिक्षणे छात्रेषु सरलया रीत्या अधिगमोत्पादने व्याख्याविधिः सक्षमो भवति ।

**हरबार्ट पञ्चपदी विधिः (Hurbort five steps method)**

पद्यशिक्षणे ''आधुनिकी प्रणाली''[५] अद्यतनकाले विशिष्य प्रशिक्षण-महाविद्यालयेषु माध्यमिकोच्चमाध्यमिकविद्यालयेषु च एषा आश्रीयते । हरबार्टमहोदयस्य चत्वारि पदानि तस्य शिष्यैः अनुयायिभिः च अधिकानि स्पष्टानि महत्त्वपूर्णानि च कर्तुं प्रयत्नः कृतः । परिणामतः ''हरबर्टवर्यस्य शिष्यौ''[६] ''तस्य चत्वारि पदानि''[७] अधोलिखितप्रकारेण पञ्चपदेषु पर्यवर्तयताम् ।

पञ्चानामपि पदानाम् एकैकशः दिङ्मात्रेण इह व्याख्यानं क्रियते । तद्यथा -

1. **प्रस्तावना (Preparation) :** आदौ शिक्षकेण छात्राः पाठोन्मुखिनः कारणीया इति पदस्यास्य मुख्योद्देश्यम् । विषयस्य आरम्भणात् प्राक् पाठ्यमानविषये छात्राणां रुच्युत्पादनमेव प्रस्तावनायाः अन्यत् प्रमुखमुद्देश्यम् । अत्र पूर्वज्ञानेन सह नवीनज्ञानस्य सम्बन्धः स्थाप्यते । अतः प्रस्तावना नाम पूर्वज्ञानस्य नूतनज्ञानस्य च मध्ये एकं संयोगसूत्रम् । पूर्वज्ञानाधारितप्रश्नैः नवीनज्ञानाय अभिप्रेरणम् अपि अत्र विधीयते । प्रस्तावनायाः अन्ते छात्राणां समक्षं स्पष्टीकरणेन उद्देश्यकथनमपि भवति ।

2. **प्रस्तुतीकरणम् (Presentation) :** प्रस्तावनायाः साहाय्येन शिक्षकः छात्रान् पाठयितुं सम्प्रेर्य ततः प्रस्तुतीकरणपदे नवीनज्ञानं पाठ्यमानविषयवस्तु वा छात्राणां समक्षं प्रस्तौति। अस्मिन् पदे एव छात्राणां सहयोगेन मूलपाठस्य विकासः कार्यते। अर्थात् शिक्षकः छात्राणां मानसिकक्रियां सक्रियां कृत्वा नवीनपाठं कृत्वा नवीनपाठं ग्रहीतुं सम्प्रेरयति ।

3. **तुलना (Comparison) :** पाठ्यविषयं स्पष्टीकर्तुं तुलनायाः अपेक्षा वर्तते । अस्मिन् पदे नवीनज्ञानम् इतोऽपि अधिकं सरलं, स्पष्टम्, आकर्षकं, बोधगम्यं च कर्तुं छात्राणां पूर्वार्जिततथ्यैः सह नूतनतथ्यानां परस्परसम्बन्धस्थापनेन तुलना क्रियते।

4. **सामान्यीकरणम् (Generalization) :** कस्यापि पाठस्य वास्तविकलक्ष्यं सामान्यीकरणम् एव भवति। मूलपाठं सम्यक् अवगत्य तस्य तुलनां सम्बन्धस्थापनं च कृत्वा अनन्तरं तस्मिन् पदे चिन्तयितुं विचारयितुं च छात्रेभ्यः अवसरः प्रदीयते। एतस्य आधारेण शिक्षकः ईदृशनियमान् निर्माति, ये नियमाः विविधसमस्यासु परिस्थितिषु च प्रयोक्तुं शक्यन्ते । छात्राः स्वयं सम्बुद्ध्या विषयं सामान्यीकृत्य स्वज्ञानकोषे यथा चिरं स्थापयेयुः तथा शिक्षकेण अत्र प्रयत्नः क्रियते । सम्पूर्णपाठस्य सारांशः पुनरावृत्तिः च अस्मिन्नेव सोपाने शिक्षकः विदधाति ।

5. **प्रयोगः (Application) :** अर्जितस्य ज्ञानस्य आवश्यकतानुसारम् उपयोगः एतस्य उद्देशः । प्रयोगस्य साफल्यासाफल्यं वा शिक्षणम् अवलम्बते । सामान्यीकरणप्रक्रियया निर्मितनियमानाम् आधारेण समुचितप्रयोगार्थम् अवसरः कल्प्यते । शिक्षकः विभिन्नप्रयोगाणाम् अनन्तरं नियमस्य सत्यतायाश्च परीक्षणं करोति । एवं रीत्या शिक्षकः विभिन्नपरिस्थितिषु छात्राणां प्रयोगम् अवलोक्य एव पाठस्य पुष्टिं करोति । इत्थं हरबार्टमहोदयस्य पञ्चानामपि पदानां प्रयोगः शिक्षणे सरलतां सम्पादयति ।

**निष्कर्षः -**

शिक्षाक्षेत्रे अन्येषु क्षेत्रेषु वा विधिं विना किमपि कार्यं सुष्ठुरीत्या सम्पादयितुं न शक्यते । यथा - **यः शास्त्रविधिमुत्सृज्य वर्तते कामचारतः ।**

**न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ।।**[८]

अविधिना कृतमकृतमेव इति लोकोक्तिरपि । अतः माध्यमिकस्तरे संस्कृतपद्यशिक्षणविधीनां प्रयोगः कक्ष्याशिक्षणं सरलं, सरसं, रोचकं च सम्पादयतीति।

## सन्दर्भाः

१. तैत्तिरीयोपनिषद् १/३/३
२. संस्कृतशिक्षणम् नवीनप्रविधयश्च-डा. च.ल.ना. शर्मा तथा डॉ. फतेह सिंहः - पृ.८४
३. तत्रैव पृ.८६
४. संस्कृतशिक्षणम् - डा. (श्रीमती) सन्तोषमित्तलः, पृ.१६९
५. 'संस्कृताध्यापनम्' - डा. कानाल नलचक्रवर्ती, पृ.१८८
६. शैक्षिकप्रविधिः - डा. रमाकान्तमिश्रः - 'जिलर् (Ziller), रीन् (Rein)', पृ.५०
७. तत्रैव पृ.५१, स्पष्टता (Clearness), सम्बन्धः/सहयोगः (Association), व्यवस्था (System), विधिः (Method)
८. श्रीमद्भगवद्गीता - १६/२३

## सहायकग्रन्थसूची

१. तैत्तिरीयोपनिषद्, गीताप्रेस, गोरखपुर
२. श्रीमद्भगवद्गीता, गीताप्रेस, गोरखपुर
३. शैक्षिकप्रविधिः - डा. रमाकान्तमिश्रः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००६
४. संस्कृतशिक्षणम् नवीनप्रविधयश्च - डा. च.ल.ना. शर्मा तथा डॉ. फतेह सिंहः - आदित्य प्रकाशनम्, जयपुरम्, २००८
५. संस्कृतशिक्षणम्-डा. (श्रीमती) सन्तोषमित्तलः, नवचेतना पब्लिकेशन, जयपुरम्, २००६
६. 'संस्कृतशिक्षणे प्रायोगिकाध्यापनविधानम्' - डा. कानाल नलचक्रवर्ती, श्री वेंकटाम्बा पब्लिकेषन्स्, तिरुपतिः, १९९७
७. संस्कृतशिक्षण - डा. रघुनाथ सफाया, हरियाणा साहित्य अकादमी, चण्डीगढ़, १९९७
८. संस्कृत शिक्षण - डा. रामशकल पाण्डेय, विनोद पुस्तक मन्दिर, आगरा-२, २००३
९. संस्कृत शिक्षण विधि - कर्ण सिंह, एच. पी. भार्गव बुक हाउस, आगरा, २००५

ISSN: 2231-0452

# ज्ञाननिर्मितिवादे क्रीडाविधिः

*धन्या, पी.वी.*
*(शोधच्छात्रा, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

शिक्षणप्रक्रिया अध्यापककेन्द्रितशिक्षणविधीनां प्रयोगेणैव बहुकालेभ्यः प्रचलति। अध्यापकः स्वीयाशयान् अथवा पाठ्यपुस्तकीयाशयान् प्रबोधयति। नीरसश्रोतारः छात्राः तान् पठन्ति। एतादृशरीतिः उद्देश्याधिष्ठिताऽसीत्। किन्तु ज्ञाननिर्मितिमातृकाधिष्ठितबोधने ज्ञानन्तु विषयाधिष्ठितं सन्दर्भानुगुणं च भवति। छात्राः वातावरणानुगुणं ज्ञानस्य निर्माणमत्र कुर्वन्ति। ज्ञाननिर्मितिसिद्धान्तानुसारं नूतनज्ञानं प्राथमिकज्ञानात् अनुभवाद्वा प्राप्यते। तदनु छात्राः स्वीयानुभवबलेन अथवा चिन्तनशक्त्या विचिन्त्य विषयावगमनद्वारा अनुभवद्वारा च नूतनज्ञानं सम्पादयति। वादोऽयं छात्रकेन्द्रितः। अतः पठनवातावरणन्तु विषयवस्तुसंबन्धि, विविधतत्त्वाधारितं - सत्त्वस्वरूपि, पाठनीयविषयवैविध्यपूर्णं, विषयानुभवसंपादनयोग्यं, तदनुगुणकार्यप्रणालीयुक्तं च भवेत्। प्रत्येकमपि छात्रः स्वीयानुभवेन मनसः चिन्तनशक्त्यनुगुणं स्वबुद्ध्या प्रतिसंदर्भं विषयञ्च स्वीकरोति। एतत् सर्वमपि वैयक्तिकं, स्वीयाशयानुगुणं च भवति।

ज्ञाननिर्मितिवादमातृकाशिक्षणे शिक्षणं निश्चितोद्देश्यपूरणाय, पाठनीयांशान् लघ्वंशरूपेण विभज्य तदनु तत्संबन्धसाहचर्यप्रदानेन छात्राः स्वयं निर्दिष्टक्रियाकलापद्वारा पठन्ति। एतद्वादानुसारं छात्राः सम्पूर्णांशान् पठन्ति। तदपि छात्रेच्छानुगुणं चिन्तनानुगुणं च संभवति। अत्र अध्यापकः अध्ययनसहायी, कदाचित् ज्ञानप्रदाता, प्रेरकश्च भवति। John Dwyer वादस्यास्य विषये एवं अभिप्रैति। वादोऽयं छात्रकेन्द्रितः भवति, न तु पाठ्यक्रमाधारितः[१]। Bogley एवं Hunter मते अनया पद्धत्या पठनप्रक्रिया सोत्साहिनी भवति। एवं सक्रियात्मकपठनद्वारा पठितविषये स्थिरता उन्नतचिन्तनशैली च समागच्छति।

पूर्वं छात्रैः ज्ञानार्जनाय अवश्यं पारम्परिकरीत्या पठनीयमासीत्। एवं पठितस्य पुनः स्मरणस्यावश्यकता च नासीत्। किन्तु अत्र ज्ञातस्य अथवा पठितस्य पुनः पुनः उपयोगः नूतनज्ञानसम्पादने अपेक्ष्यते। तत्तु छात्रस्य स्वभावानुगुणं, बुद्ध्यनुगुणं, पूर्वज्ञानानुगुणं तस्य प्रयोगानुगुणं, पठनलक्ष्यानुगुणञ्च भवति। अत्र ज्ञाननिर्माणं प्रामाणिकक्रियाद्वारा भवति।

Dwyer, Navak & Pasner प्रभृतय: विश्वसन्ति यत् कक्षीयपारस्परिकक्रिया: ज्ञाननिर्माणं सुगमं कुर्वते इति ज्ञाननिर्मितिवादस्य वैशिष्ट्यम् -

१. अत्र पठनप्रक्रिया निष्क्रियात्मिका न, परं सक्रियात्मिका सार्थकी प्रक्रिया भवति।

२. नूतनज्ञानप्राप्ति: पाठकानां पूर्वज्ञानाधारिता भवति।

३. सामाजिकपारस्परिकक्रिया पठनप्रक्रियां सुगमं करोति।

४. पाठकानां सार्थकरीत्या पठनं प्रामाणिकपठनोद्देश्याधारितं भवति।

५. अत्र छात्रा: स्वीयोत्तरदायित्वे एवं स्वायत्तीकरणे च प्रेरिता: भवन्ति, तथा अध्यापका: पठनप्रक्रियां सुगमीकुर्वन्ति। ज्ञाननिर्मितिवाद: अध्यापककेन्द्रितपठनव्यवस्थां छात्रकेन्द्रितरूपेण, अध्यापकं ज्ञानसंप्रेषकरूपेण च परिवर्तयति। ये छात्रा: ज्ञानस्य स्वीकर्तार: आसन् ते इदानीं ज्ञाननिर्मातार: अभूवन्। वादोऽयं छात्रेभ्य: तुलनात्मकपठनस्य, शैक्षिकस्वातन्त्र्यस्य, ज्ञानविषयस्य, अन्यै: स्वीयसहपाठिभि: साकं पठनस्य च अवकाशं प्रददाति। २००५ National Curriculum Frame work (NCF) द्वारा अवगमनानुगतपठनस्य प्राधान्यं प्रदत्तम्। नाम ज्ञाननिर्मितिवादानुगतपठनशैलीस्वीकरणाय निर्देश: प्रदत्त इति।[2] NCERT द्वारा २००५ मध्ये NCF द्वारा निर्दिष्टविषयानुगुणं पाठ्यपुस्तकानां निर्माणं कृतम्। अधुना भारते परिवर्तितनूतनपाठ्यपुस्तकानुगतशिक्षणं नाम ज्ञाननिर्मितिवादमातृकाशिक्षणं प्राचाल्यते।

**सक्रियात्मकाध्ययनाध्यापनप्रक्रियातत्त्वानि -**

१. अत्र छात्रा: सक्रिया:, अध्यापक: ज्ञाननिर्माणे सहायक: निर्देशको वा भवति। ते छात्रा: स्वयं ज्ञानमार्जयन्ति च।

२. अध्यापक: पठनवातावरणस्य निर्माणं, समीपे प्राप्यवस्तूनां मातृकाणां च साहाय्येन करोति।

३. शिक्षणव्यवस्थाऽत्र जीवितसंबन्धिनी भवति।

४. छात्राणां विविधकौशलानां विकास: अत्र संभवति।

५. छात्रा: पठने स्वतन्त्रा: भवन्ति अत्र।

६. स्वाभाविकवातावरणे ज्ञानोपार्जनं भवति।

७. शास्त्रीयविषयाणां, गणितादिविषयाणां ज्ञाननिर्माणं परीक्षण - प्रत्यक्ष - प्रयोजनादिविधीनां प्रयोगेण भवति।

८. भाषाशिक्षणे अध्यापक: व्यवहारस्य प्राधान्यं प्रददाति न तु व्याकरणांशानाम् ।

एवं शिक्षणव्यवस्था परिवर्तिता। तदनु शिक्षणकार्यक्रमे अपि परिवर्तनानि समागतानि। शिक्षाक्षेत्रे "क्रीडानां प्रयोग:" इत्यमुमंशं पाठनविधिरूपेण प्रप्रथमतया Coldwell cook इत्येते Perse Grammar School मध्ये आंग्लभाषापाठनाय प्रयुक्तवन्त:।[३] छात्रेभ्य: पठनप्रक्रिया अधिकभारयुक्ता एवं श्रमयुक्ता च भवति। ते पठनलक्ष्याणि, तेषां सामाजिकापेक्षाञ्च न जानन्तीत्यत: पठनप्रक्रिया तेभ्य: अभिप्रेरणयुक्ता न भवति। अत: छात्रेभ्य: तत्रापि प्राथमिकस्तरीयछात्रेभ्य: दीयमानानि कार्याणि क्रीडारीत्या स्यु:, तेन सुष्ठु कार्याणि सम्पद्येरन्।

John Bellingham वदति यत् There is no difference between work & play as regards the nature of activity concerned. The only difference lies to the spirit of individual participation in the activity.[४] नाम क्रीडाया: कार्यकरणस्य च भेद:, तस्य प्रकृतौ एवमेव वैयक्तिकभागग्रहणे च वर्तते इति। क्रीडा तन्त्रयुक्ता एवं सन्तोषप्रदायिका च अप्रयोजिका, अश्रद्धयुक्ता वा न भवति। क्रीडायां भागग्राहकाणां कृते क्रीडा: प्रेरणाप्रदायिका: आनन्दप्रदायिका: इत्यत: तत्र ते सकारात्मकरीत्या भागं गृह्णन्ति। छात्रेभ्य:, अध्यापकेभ्यश्च शिक्षणप्रक्रियां प्रभावीकरोति क्रीडा। तद्वारा शिक्षणं ललितमेवमाकर्षकञ्च संपद्यते। अधिक: श्रम:, अधिका श्रद्धा, अधिक: समय: च क्रीडाविधे: प्रयोगार्थमपेक्ष्यते। तद्वारा क्रिया स्वाभिप्रेरिता ऐच्छिका एवं सन्तोषयुक्ता च भवति। किन्तु तस्य कार्यस्य लक्ष्यन्तु कदापि न त्यजति। Bellingham महोदय: वदति यत् –

Play - Way method is soft in process but genuine and effective in result.[५]

ज्ञाननिर्मितिवादानुगुणं ज्ञाननिर्माणार्थं क्रीडाविधे: प्रयोग: बहुधा कर्तुं शक्यते। क्रीडाद्वारा छात्रेभ्य: समस्यानिवारणे प्रावीण्यं दीयते। क्रीडा वातावरणस्य स्वीयापेक्षानुगुणं परिवर्तनस्य क्षमतां प्रददाति। एवं स्वीयक्षमताधिकस्य अपि क्रियाया: सम्पूरणाय क्रीडा प्रेरणां ददाति। क्रीडा द्विधा विभक्तुं शक्यते।

१. सहकृतक्रीडा: (Co-operative games)

२. मात्सरिकक्रीडा: (Comparative games) इति।

Forbel महोदयः अभिप्रैति "स्वतःप्रवृत्तेः अत्युन्नतरूपं भवति क्रीडा" इति।[६] कर्मनिरतता शिशोः सहजप्रवणता अथवा अन्तर्निहितस्वभावः भवति। नाम आबाल्यात् सर्वदा कार्यकरणं तेषां सहजस्वभावः। तस्य शिक्षाक्षेत्रे प्रयोगेण अथवा पठनपाठनकार्यक्रमे संबन्धस्थापनेन शिक्षणम् आयासरहितरीत्या भवितुमर्हति। तत्तु क्रीडाविधिद्वारा एव सम्भवति। ज्ञानस्य पूर्वार्जितज्ञानसाहाय्येन निर्माणे क्रीडाविधिः अत्यधिकं सहायकारी भवति। लघुविषयाणां गणित - व्याकरणादि - कठिनविषयाणां च पाठने क्रीडाविधिः प्रयोक्तुं शक्यते। एतद्विषये बहुधा अनुसन्धानम् चलति शिक्षाक्षेत्रे। ज्ञाननिर्मितिसिद्धान्तानुगुणं शिक्षणार्थं प्रयुज्यमानेषु परीक्षण - प्रत्यक्ष - प्रयोजनादिविधिषु क्रीडाविधिरपि अन्यतमः इति निश्चप्रचमेव।

सन्दर्भाः

1. Methods and Techniques of Teaching - (P.No.233)
2. National Curriculam Frame Work 2005 - 2.3 (P.No.14)
3. Methods and Techniques of Teaching - (P.No.237)
4. Accadamic Dictionary of Edu. - (P.No.233)
5. Ibid
6. Methods and Techniques of Teaching - (P.No.233)

## सहायकग्रन्थसूची

1. Methods and Techniques of Teaching - S. K. Kochar., Sterling Publishers Private Limited, New Delhi - 110016.
2. Academic's Dictionary of Education - John Bellingham, Academic (India) Publishers - New Delhi - 110008.
3. Principles, Methods & Techniques of Teaching - J.C.Aggrawal, Vikas Publishing House Pvt Ltd, New Delhi, 2004.
4. Methods and Techniques of Teaching - Dr.Digumarti Bhaskara Rao, Sonali Publications, Dariyaganj, New Delhi, 2007.
5. https://archive.org>education.

ISSN: 2231-0452

# शैक्षिकोपलब्धौ अभिप्रेरकतत्त्वानां योगदानम्

*कैलाश सैनी*
*(शोधच्छात्रः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**उपोद्घातः -**

शिक्षा जीवनपर्यन्तं प्रचलति ; परन्तु शिक्षणं निश्चितकालपर्यन्तमेव भवति। शिक्षणेन बालकस्य सर्वाङ्गीणविकासः सम्भवति । तेषु सर्वेषु शिक्षणेषु अभिप्रेरणस्य महत्त्वपूर्णं स्थानं वर्तते। प्रत्येकम् अध्यापकः अभिप्रेरणप्रविधिभिः परिचितः स्यात् । शिक्षणस्य मुख्यमुद्देश्यं शिक्षणमेव न अपि तु अधिगमोऽपि । अभिप्रेरितः छात्रः शिक्षणस्य विभिन्नक्रियाकलापेषु ध्यानं ददाति, अधिकं साफल्यञ्च प्राप्नोति। अभिप्रेरणयुक्तः छात्रः स्वशक्तीनां क्षमतानां च प्रयोगम् उचितदिशि करोति। उचिताभिप्रेरणेन छात्रेषु उच्चादर्शानां स्थायिभावनानाञ्च विकासो भवति । अभिप्रेरणेन बालकेषु नैतिकः चारित्रिकश्च विकासः सम्भवति । अभिप्रेरणस्य स्रोतः "अभिप्रेरकः" इति नाम्ना ज्ञायते। अभिप्रेरकतत्त्वस्य परिचयः अधोलिखितरूपेण प्रस्तुतोऽस्ति ।

मनोवैज्ञानिकाः मनोविज्ञानव्यवहारस्य विशदव्याख्यां कुर्वन्ति । व्यवहारवादिनः व्यवहारस्य यान्त्रिकव्याख्यां कुर्वन्ति । किन्तु आधुनिकमनोवैज्ञानिकाः अस्याः विचारधारायाः समर्थनं नैव कुर्वन्ति । ते मन्वते यत् व्यवहारः यन्त्रवन्नैव भवति । तस्य कानिचन प्रेरकतत्त्वानि भवन्ति । यथा - कवेः हस्ते लेखनी विद्यते, वातावरणमपि सम्यगस्ति, लेखनविषयोऽपि स्पष्टो वर्तते, सर्वे पदार्थाः सज्जिताः सन्ति । किन्तु लेखनी नैव चलति । किञ्चिदपि लेखनस्य सामर्थ्यं नैवास्ति । लेखनस्य प्रेरणा नैवास्ति। इयं प्रेरणा कुत्रापि मेलितुं सम्भवति कर्त्तव्यबोधाद्, स्वजनस्य प्रेम्णा, स्वनायिकायाः प्रेम्णा, स्वमनसः शान्तिकारणाच्च काऽपि प्रेरणा तस्य कारणं भवत्येव। प्रेरणां विना किमपि कार्यं नैव सम्भवति । अनुभवेन व्यवहारेणापि प्रेरणा प्राप्तुं शक्यते । जीवने समस्तव्यवहारेषु प्रेरणैव मूलकारणं भवति । यदा सुतः रुग्णो भवति तदा जननी अहर्निशं जागरणं करोति। अयं व्यवहारः प्रेरकतत्त्वानां परिणामो वर्तते। उच्चशैक्षिकोपलब्धये छात्राः सम्पूर्णरात्रौ पठन्ति । अयमभिप्रेरकतत्त्वानां प्रभावोऽस्ति।

अभिप्रेरणमेकः मानसिक-शारीरिकसम्प्रत्ययोऽस्ति, यत् क्रियाः प्रारम्भयति, दिशश्च प्रदर्शयति।

**अभिप्रेरकस्य परिभाषा**

अभिप्रेरणयैव सम्बन्धितः सम्प्रत्ययः प्रेरकः वर्तते । अत्र आवश्यकता-व्याकुलता-प्रोत्साहनानि च सम्मिलितानि भवन्ति । यत्किमपि तत्त्वं मनुज-व्यवहारमुत्पादयति, कस्याञ्चिदेकस्यां निश्चितदिशि परिवर्तयति, मनुजस्य अन्तर्निहितमानसिकशारीरिकीमवस्थाञ्च कञ्चित्कार्यविशेषं प्रति प्रेरयति, तत्तत्त्वं 'प्रेरकः' इति नाम्ना अभिधीयते । **मेक्डूगल**विचारकेण कथितम्-

"Motives are conditions psychological and physiological with in the organism that dispose it to act in certain ways". **- Mcdougall**[1].

**गेट्स**महोदयानुसारेण - "अभिप्रेरकजन्तूनां निहितमानसिकशारीरिकी अवस्थितिः वर्तते। यया जनाः विशिष्टविधिमनुसृत्य कार्यं सम्पादयन्ति ।[2]"

**मैगोच**महोदयेन उक्तम् - "अभिप्रेरकजन्तूनां काचित् दशाऽस्ति , या दत्तकार्यस्य अभ्यासार्थं सङ्केतं करोति। तस्य कार्यस्य सन्तोषजनकं समापनं परिभाषते।[3]"

**शैफर**महोदयेन कथितम् - "अभिप्रेरकं क्रियायाः प्रवृत्तिरस्ति, या प्रणोदनेन उत्पद्यते, यस्याः समायोजनेन च समाप्तिर्जायते ।[4]"

**गैट्स**महोदयेन उल्लिखितम् - "अभिप्रेरकस्य विविधस्वरूपाणि भवन्ति यथा- आवश्यकता, आकाङ्क्षा, स्वाभाविकस्थितिः, निश्चितप्रवृत्तिः, अभिवृत्तिः, रुचिः, स्थाय्युद्दीपकश्च इत्यादीनि ।[5]"

**अभिप्रेरकस्य प्रकारः**

उपर्युक्तपरिभाषाणामनुशीलनेनेदं वक्तुं शक्यते यदभिप्रेरकं मनुष्याणां विशिष्टास्ति कापि दशा। येन काश्चित् आवश्यकताः अन्तः सञ्चाल्यन्ते, तथा वाञ्छितफलाय लक्ष्याय वा निर्दिश्यते । अमुं सम्पूर्णव्यवहारमेव "अभिप्रेरकः" इति वदामः । सामान्यतः अभिप्रेरकाः द्विधा विभक्तुं शक्यन्ते ।

**१) मुख्याभिप्रेरकाः (Primary Motives)**

मुख्याभिप्रेरकाः प्रारम्भिकाभिप्रेरका इत्यपि कथ्यन्ते । यतो हि एते मानवजातेः

जन्मना एव संलग्ना: भवन्ति । अभिप्रेरका एते शारीरिकजैविकावश्यकता: पूरयन्ति। यथा -

१. बुभुक्षा, पिपासा च ।

२. श्वसनम् ।

३. कामभावनाया: तृप्ति:/यौनसन्तुष्टि:।

४.मानवशरीरस्थमलानां विसर्जनम् ।

५. अधिकजागरणानन्तरं निद्राया: आवश्यकता ।

६. भौतिकवातावरणेन सुरक्षाया: आवश्यकता (चक्रवात:, वर्षा:, आतप:, अग्नि:, वन्यजन्तूनां भयमित्यादय:।)

**२) गौणाभिप्रेरका: (Secondary Motives)**

गौणाभिप्रेरका: जन्मनो नैव भवन्ति । जना: स्वशारीरिकावश्यकतां सम्प्राप्य पुन: तस्या: पूर्ते: गौणाभिप्रेरकान् प्राप्तुमिच्छन्ति । यथा- स्वभावनाया: विकास:, संरक्षणस्य स्वीकृति:, आवश्यकता, शक्त्यभिप्रेरक:, उपलब्ध्यभिप्रेरकश्चेत्यादय:। ते च अभिप्रेरका: मनोवैज्ञानिकसामाजिकावश्यकता: उत्पादयन्ति । गौणाभिप्रेरका: निम्नप्रकारेण वर्तन्ते-

१. स्वतन्त्रताया:, आत्मनिर्भरताया: आवश्यकता च ।

२. आत्माभिव्यक्ति:, आत्मप्रदर्शनं वा ।

३. शक्तिप्रदर्शनम् ।

४. मैत्रीभाव: सामाजिकजीवननिर्वहणस्यावश्यकता च ।

५. समाजे सम्मानप्राप्ते: मान्यताप्राप्तेश्च आवश्यकता ।

६. उपलब्धे: आवश्यकता ।

७. सुरक्षाया: आवश्यकता ।

एते एव मनुष्याणां गौणाभिप्रेरका: कथ्यन्ते । एवमभिप्रेरका: मानवजीवने अत्यन्तमावश्यका: भवन्ति । अनेन प्रकारेण बालका: पुरस्कारेण दण्डेन च, किशोरा: प्रशंसया निन्दया च अत्यधिकं प्रोत्साहनं प्राप्नुवन्ति । कार्ये रुचिवर्धनमेवमुत्साहवर्धनमपि भवति । स्वप्रगते: शुद्धज्ञानेन च्छात्रा: अधिककार्यकरणार्थं प्रेरिता: भवन्ति । तेषां छात्राणां प्रगति: च सम्यग् भवति । व्यक्तिगतप्रतियोगितया बालक: पूर्वत:

सम्यगङ्कप्राप्त्यर्थं निरन्तरं प्रयत्नं करोति । प्रत्येकं परीक्षायां स्वोपलब्धीनां पूर्वोपलब्ध्या तुलनां करोति। विकासे जायमाने स: सुखं सन्तोषं च अनुभवति । सामूहिक-प्रतियोगितायाः माध्यमेन छात्रेषु परस्परं प्रगते: स्वस्थभावना उत्पाद्यते । छात्रा: सामाजिककार्येषु प्रतिभागितां स्वीकृत्य आत्मसम्मानाय अभिप्रेरिता: भवन्ति। अभिप्रेरकै: विना शिक्षणे प्रभावात्मकता नैव सम्भवति। अभिप्रेरणायाम् अभिप्रेरक-तत्त्वानि प्राणभूतानि भवन्ति । प्रेरक: कश्चन शक्तिपुञ्ज: वर्तते । य: छात्रान् निश्चितलक्ष्यं प्रति अभिप्रेरयतीति ।

## सन्दर्भा:

1. Medougall, F. J. - "Educational Psycholgy", California, Wadswor M, 1962, P- 87.
2. Dr. S.S. Mathur, "शिक्षा मनोविज्ञान", विनोद पुस्तक मन्दिर, आगरा, 2001, P. 190.
3. Dr. Girish Pachori, "शिक्षा के मनोवैज्ञानिक आधार", आर. लाल बुक डिपो, मेरठ, 2006, P. 174.
4. Dr. Girish Pachori, "शिक्षा के मनोवैज्ञानिक आधार", आर. लाल बुक डिपो, मेरठ, 2006, P. 174.
5. Dr. Madhu Parashara & others, "अधिगम का मनो-सामाजिक आधार एवं शिक्षण", P.146.

## सहायकग्रन्थसूची

1. ***Sharma R. A.***, Dovelopment of learner & teaching learning process, R. Lall Book Depot. Meerut, 1980
2. ***Mathur S. S.***, Development of learner & teaching learning process, Vinod Pustak Mandir, Agra, 2001
3. ***Peel E.A.,*** The motivation of learning, Oliver & Boyd Ltd. Edinburg, 1967
4. ***सिंह:, डा. फतेह:,*** शिक्षामनोविज्ञानम् , आदित्यप्रकाशनम्, जयपुरम् , २००५
5. ***रेड्डी, पि. नागमुनि,*** शिक्षामनोविज्ञानम् , राष्ट्रीयसंस्कृतविद्यापीठम्, तिरुपति: (आ.प्र.), २००९
6. ***राघवाचार्य:, पी. वैंकट:,*** शिक्षामनोविज्ञानम्, केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपति:, १९७१

ISSN: 2231-0452

# सर्जनात्मकतासंवर्धने परिवारस्य भूमिका

***डा.दिल्लीप कुमार मिश्र***

*(शोधसहायकः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

सर्जनात्मकतायाः विभिन्नः अर्थः मनोविज्ञानिभिः शिक्षाशास्त्रिभिश्च स्वस्वदृष्टिकोणानुसारं कृतः वर्तते । तदिह किञ्चित् प्रदर्श्यते ।

Webster शब्दकोशानुसारम् 'Creativity' शब्दः 'Kere' इत्यस्मात् लाटिनशब्दात् आगतः, यस्यार्थः अस्तित्वे आगमनम् (Bring into existance) इति । किञ्च यदा 'Creativity' क्रियापदरूपेण प्रयुज्यते तदा तस्यार्थः निर्माणम्, मौलिकतया उत्पन्नम्, अस्तित्वे आगमनम् (आनयनं) वा, परन्तु यदा 'Creativity' विशेषणरूपेण प्रयुज्यते तदा तस्यार्थः योग्यता (Ability), शक्तिः (Power), कल्पना (Imagination) च भवति। अपि च 'Creativity' इति शब्दस्य तात्पर्यम् उत्पादनक्षमता सामर्थ्यं (Ability of create) वा इत्यनेन भवति।

किञ्च Creativity इति शब्दः 'Creatus' लाटिन् भाषातः उत्पन्नः, यस्यार्थः भवति 'to bring into being' इति वदन्ति अपरे। विचार्यमाणे इयं नवीनतां, मौलिकतां, विशिष्टताम्, अपूर्वतां चाश्रित्य वर्तते। यतः यदेव कर्म अपूर्वं, मौलिकं, विशिष्टं च वर्तते तदेव सर्जनमित्युच्यते। यतः अविद्यमानस्य कल्पितमेव सर्जनात्मकता इति ।

सर्जनमिति शब्दः 'सृज् विसर्गे' इत्यस्माद्धातोः निष्पन्नः । वैदिककालादारभ्य अयं शब्दः उत्पादनं, सृष्टिः सर्जनमित्याद्यर्थे प्रयुज्यते। सर्जनात्मकताशब्दस्य व्युत्पत्त्यर्थे विचार्यमाणे स चार्थः नावीन्यं, सृष्टिं, काञ्चित् प्रक्रियां निष्पादनं वा सूचयति ।

केचन मनोविज्ञानिनः वैज्ञानिकदृष्टिकोणानुसारं सर्जनात्मकतायाः अर्थमित्थं प्रतिपादयन्ति यत् – प्रयोगशालायां कार्यं कुर्वाणाः एव सर्जनात्मकाः भवन्ति इति। यतः प्रकृतेः नवीनदृष्ट्या मौलिकविवेचनां कुर्वन्ति अतः ते सर्जनात्मकाः।

**Guilford** (1950) महाभागः आचष्टे यत् – "सङ्कुचितार्थे सर्जनात्मकव्यक्तेः कश्चन गुणः सामर्थ्यं वा भवति सर्जनात्मकता" इति। तदुक्तं तेन – **"Creativity means a pattern of traits that are characteristics of creative person."** इति।

**Spearman** (1930) महोदयः सर्जनात्मकतां मानसिकप्रक्रियारूपेण परिभाषते। तस्यायमाशयः – "सर्जनात्मकता एका मानसिकप्रक्रिया" (Creativity is a mental process) इति।

**Rhodes** (1961) महाभागः सर्जनात्मकता चतुर्णां तत्त्वानां समाहारः इत्यभिप्रैति। तत्त्वानि च **Person, Process, Product, Press** इति। एतस्य सर्जनात्मकतापरिभाषा **'Four P's'** इति नाम्ना ज्ञायते। अपि च तेन उक्तम् यत् – **"Creativity is a noun, naming the phenomena in which a person communicates a new concept (which is a new product)"** इति।

परिवारः बहुधा सर्जनात्मकतां प्रोत्साहयति। बालक-बालिकानां सर्जनात्मककार्याणि परिवारवर्गैः प्रशंसनीयानि येन ते सर्जनात्मककार्यं कर्तुं प्रेरिताः भवन्ति। सर्जनात्मककार्याणाम् अवरोधेन सर्जनात्मकशक्तेः परिप्रकाशः न सम्भवति। अधः सर्जनात्मकशक्तिवर्धने परिपारवर्गैः के उपायाः आश्रयणीयाः इति सूचिताः सन्ति–

1. सर्जनात्मकतायाः विकासाय पर्याप्तः अवसरः देयः।
2. सर्जनात्मककार्यार्थं सन्ततयः प्रेरणीयाः प्रोत्साहनीयाश्च।
3. स्वसन्तानानां रुच्यनुगुणं प्रोत्साहः प्रदेयः।

4. बालकाय स्वतन्त्रचिन्तनाय अवसरः कल्पनीयः ।

5. परिवारस्य प्रशान्तता रक्षणीया ।

6. सर्जनात्मककार्यप्रदर्शनाय पर्याप्तः अवसरः सन्ततिभ्यः प्रदेयः।

7. सन्ततीनां जिज्ञासायाः यथासम्भवं पूर्तिः करणीया।

बहुभिः अध्ययनैः मनोविज्ञानिनः शिक्षाविद्वांसश्च सर्जनात्मकशक्तिवर्धने के उपायाः आश्रयणीयाः इति प्रत्यपादयन् । तैः प्रतिपादिताः केचन प्रमुखाः उपायाः यथा —

**1) उपयुक्तवातावरणम् (Adequate environment)** — सर्जनात्मकतायाः वर्धने वातावरणं बहुधा उपयोगि वर्तते । उपयुक्तवातावरणेन मानवस्य अन्तर्निहितशक्तेः विकासः जायते । अतः शुद्धं, स्वच्छं, मनोमुग्धकरं च वातावरणं कल्पनीयम् ।

**2) उपयुक्तावसरप्रदानम् (Giving adequate opportunities)** — सामान्यतः सर्जनात्मकाः मानवाः साधारणतया तिष्ठन्ति व्यवहरन्ति च । अतः सर्जनात्मकशक्तिप्रदर्शनाय पर्याप्तः तथा उपयुक्तः अवसरः तेभ्यः प्रदेयः । किञ्च मानवेषु उच्च-मध्यम-सामान्यरूपेण सर्जनात्मकशक्तिः विद्यते । अस्याः शक्तेः प्रदर्शनाय तेभ्यः तादृशः अवसरः देयः यथा ते उन्मुक्ततया स्वच्छन्दतया च सर्जनात्मकशक्तिप्रदर्शने समर्थाः भवेयुः । किञ्च पर्याप्तावसरप्रदानेन तेषां बुद्धिशक्तिः वर्धते ।

**3) जिज्ञासायाः पूर्तिः (Fulfillment of curiosity)** — साधारणतया सर्जनात्मकाः मानवाः जिज्ञासवः भवन्ति । प्रतिविषयं तेषां जिज्ञासा बहुधा जायते । जिज्ञासितविषये समाधानं प्राप्तुं तेषां मनः उत्सहते । अतः तेषां जिज्ञासायाः पूर्तिः अवश्यं करणीया । अन्यथा तेषां मनसि उन्मादता आयाति ।

**4) सर्जनात्मकभावनाव्यक्तीकरणाय प्रेरणाप्रदानम् (Motivation for expression of Creative feelings)** — सर्जनात्मकमानवेषु जिज्ञासा कौतूहलं च विचित्रं भवति । नैसर्गिकताकारणेन ते दृढनिश्चयाः आत्मविश्वासिनः च भवन्ति । परिस्थित्यनुगुणं

तेषां जिज्ञासा वर्धते। तादृशपरिस्थितौ तेषां सर्जनात्मकविचाराणां प्रतिबन्धः उपहासो वा नैव कार्यः।

**5) सर्जनात्मककार्याणां प्रशंसा (Appresiation of Creative activities)** — परिवारवर्गैः, सामाजिकैः, विद्यालयाध्यापकैश्च सर्जनात्मककार्याणि प्रशंस्य तदर्थं प्रोत्साहः प्रदेयः। अन्यथा तेषां सर्जनात्मकशक्तिः दमिता भवति। किञ्च अध्यापकस्य व्यवहारोऽपि छात्रस्य योग्यतानुरूपं स्यात्।

**6) व्यक्तित्वस्य विकासः (Development of Personality)** — सर्जनात्मकतायाः व्यक्तित्वस्य च मध्ये अस्ति सहसम्बन्धः। अयं विषयः बहुभिः अनुसन्धानैः प्रतिपादितः। व्यक्तित्वस्य प्रभावः सर्जनात्मकतायां पतति। यस्य व्यक्तित्वं यावत् सम्पन्नः तस्य सर्जनात्मकशक्तिः तादृशी सम्पन्ना। अतः सर्जनात्मकतायाः विकासनाय व्यक्तित्वस्य विकासः कार्यः।

सर्वतोभावेन सर्जनात्मकव्यक्तीनां कार्यकलापाः सकारात्मकभावेन स्वीकार्याः न तु तेषाम् उपहासः निरादरः वा करणीयः। यदि सर्जनात्मककार्याणां प्रतिरोधः क्रियते तत् अभिशाप एव सिद्ध्यति। इत्थं सर्जनात्मकतायाः विका सनाय प्रयासः विधेयः।

आधुनिककाले मनोवैज्ञानिकाः सर्जनात्मकतां मानवशक्तेरेव परिणाम इति मन्यन्ते। सर्जनात्मकता तादृशी शक्तिर्भवति या च मानवकार्यकलापान् बहुधा प्रभावयन्ती दृश्यते। मानवसंस्कृतेः संरक्षणे, विकासे हस्तान्तरणे च एषा साधूपकरोतीति सुविदितम्। इतिहास एवात्र प्रमाणं यत् पारिवारिकपरिवर्तने, राष्ट्रियान्descriptionताराष्ट्रियपरिवर्तने, सामाजिकपरिवर्तने च मूलकारणं भवति सर्जनात्मकता। यत्र मानवः सर्वदा परिणामं वाञ्छति तत्र नितरां सर्जनात्मकता अपेक्षिता भवति। किञ्च एकस्य राष्ट्रस्योन्नतिः तत्र वर्तमानान् सर्जनात्मकमानवान् आधृत्य वर्तते। विना सर्जनात्मकतां राष्ट्रम् अविकसितं तिष्ठति।

किञ्च वर्तमानज्ञानार्जनं नूतनज्ञानान्वेषणञ्च सर्जनात्मकतामाधृत्यैव वर्तते। एतदर्थं सर्जनात्कतामधिकृत्य देशविदेशेषु बहूनि अनुसन्धानानि निर्वर्तितानि। Torrance महोदयः सर्जनात्मकताविषये स्वाभिप्रायमित्थं प्रकटयति यत् – सर्जनात्मकताया उपयोगः बहुधा भवितुमर्हति। तत्र प्रथमः मानवमस्तिष्कस्य, व्यक्तित्वस्य, तदीयकार्यकलापानां चोचितमध्ययनं स्यात् । द्वितीयश्च वैयक्तिकाध्ययनाय सम्प्रेरणं स्यात् । तृतीयः मानसिकविकासार्थं स्वस्थं शरीरमपेक्षितं भवति । सर्जनात्मकता न केवलं समाधानस्य स्रोतः, अपि च मनसः निदानार्थमपि (Psycho-therapy) स्रोतः वर्तते । चतुर्थः सर्जनात्मकतां संवर्धयितुं विविधप्रायोगिककार्यक्रमाणां, नूतनपाठ्यचर्याविधानानां साधनसङ्घटनानाञ्च नियोजनस्यावश्यकता वरीवर्ति । अन्ते च भविष्यतः मार्गनिर्देशनं विकासशक्तिं च सर्जनात्मकतामाश्रित्यैव भवतीति ।

## आधारग्रन्थाः शोधपत्रिकाश्च –

**Books:**

Guilford, J. P. & Fruther B., ‘Fundamentals of Statistics in Educational Psychology’, McGraw Hill, New York, 1978.

Guilford, J.P., ‘Creativity’, American Psychologists, 5, pp.444-454, 1950.

Gupta, S. P. ‘Uchhatara Siksha Manovijnana’, Sarada Pustak Bhavan, 11, University Road, Allahabad, pp. 413-427, 2004.

Gupta, V. & Passi B. K., ‘Creativity in Education’, National Psychological Corporation, Agra, India.

Kumar, A., ‘Personality identification of high & low creative behavior’, 1981.

Rhodes, M., ‘Analysis of creativity’, Phi Delta Kappan, XLII, pp.305-310, 1961.

Torrance, E.P., 'Creative abilities of elementary school children', Teaching creative endeavor, Indiana University, 1968.

Torrance, E.Paw, 'Geogia studies of creative behavior', 183 Cherokee Avenue, Athens, GA 30606.

**Journals:**

European Commission (European Council), 'A Report on creativity', Joint Research Centre, 2008.

Torrance, E.P., 'Why fly? A philosophy of creativity', Norwood : New Jersey, Ablex Publishing Corporation, 1995.

Torrance E.P., 'Handbook of Creativity', p.111.

ISSN: 2231-0452

# The Two Wonderful Birds

***Prof. K. Gayathri Devi***
*(Dept of Sanskrit, Andhra University, Vizag)*

'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा'

The pride of India lies in the language of Sanskrit and its culture. The sages in ancient India have made their religious, philosophical and spiritual speculations in a beautiful poetic language, which led to the famous aphorisms-

'नानृषिः कुरुते काव्यम्' and 'कवयः क्रान्तदर्शिनः'

which mean - poetry is composed only by seers and poets are the prophets. This shows the inseparable relation between poets and seers in India. These poet-philosophers revealed the truths through a symbolic description of nature.

There is a beautiful and captivating example in the Rgveda, which suggests the existence of Jivatman and Paramatman in the same body. The present paper discusses the poetic beauty as well as the underlying philosophical thought of the following famous Rgvedic hymn -

द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति
अनश्नन्नन्योभिचाकशीति ।।[१]

The hymn literally means -

There are two birds with pretty wings on a tree, very close to each other

in friendship. One bird is eating the sweet *pippala* fruit while the other bird is witnessing it without eating.

The significance of this artistic hymn is well established in the *Yajurveda, Atharvaveda, Nirukta, Mundakopanishat* and *Swetaswa-taropanishat* quoted in different contexts.

Moreover, Rajasekhara the celebrated author of *Kavyamimamsa*, a standard text on Sanskrit Poetics cited the same hymn at the very beginning of his celebrated work and has commentator Madhusudanamisra interpreted it as an example of the figure *Swarupatisayokti* where the poet conceals the intended sense and superimposes the description of the non-contextual sense.

Here the intended sense is not at all described and the description of the two birds is the non-contextual meaning, which suggests the practical state of *Jivatman* and *Paramatman* in the same body. The bird eating the fruits is symbolized, as the individual soul, called *Jivatman* eating the fruits of previous births' actions and the bird, which does not eat, is the supreme soul, *Paramatman* as the *Sakshin* - the unbiased witness of it.

Here Madhusudanamisra adds -

विरुद्धशोकानन्दधर्मिणोः एकस्मिन् शरीरे नियम्यानियन्तृभावेन स्थितयोः वैलक्षण्यं भगवती श्रुतिः अतिशयोक्तिनामालङ्कारेण उपदिशति ।[2]

That the vedic scripture instructs us here figuratively to notice the difference between *Jiva* and *Iswara* arising out of their quite opposite characteristics of sorrowfulness and bliss respectively, *Jiva* lives under the control of *Iswara* in the same body.

Here the figure *Swarupatisayokti* or *Rupakatisayokti* brings out the aesthetic beauty of the above poetic hymn as well as the philosophical truth suggested in the hymn.

Thus the relevance of Poetics even in understanding the Vedic Scriptures is aptly pointed out by the Indian Alankarikas, the literary critics who considered *alankarasastra* as the seventh *Vedanga*.

उपकारकत्वादलङ्कारः सप्तममङ्गम्[3]

The first commentary on Rgveda authored by the sage Yaska, who belongs to the 7th century B.C., according to the Indian tradition, interpreted the above mantra while referring to the several names of Atman, in the 14th chapter of Nirukta. His interpretation is briefly as follows.

The present hymn praises Jivatman and Paramatman suggestively. The adjectives *sayuja* and *sakhaya* are to be taken in the sense of the relation of tadatmya-identity and having the same brilliance or similar natured respectively. The word vrksa means vrscyate - perishable, refers to the body *Pippala* is *karmaphala* the fruits of previous actions, which Jiva eats with relishment.

येन यदुपार्जितं तस्य तदेव स्वधा- It is sweet which he earns, Paramatman, being *aptakama* or *nisprha* desireless, only witnesses the creation superimposed in him. आत्मन्यध्यातं जगत् साक्षित्वेनेक्षते ।

Here Paramatman is suggested as antaryamin- all pervading, omnipotent, omniscient and overlord.

On the reflection of Yaska's interpretation of the above *mantra*, it may be noticed that the roots of *Advaita* theory are seen in the ancient Scriptural interpretations.

Sankara also interpreted the same mantra in his *Bhasya* on *Mundakopanisat* (3rd mundaka, 1st Kanda, 1st Mantra)

According to Sankara *sayuja* means the eternal companions and *sakhaya* means manifested alike . *Vrksa* is explained as *ksetra* the body and *jiva* is called as *ksetrajna. Iswara* the *sarvajna* simply is the eternal witness of both the

enjoyer and the enjoyed -

भोज्यभोक्त्रोः नित्यसाक्षित्वसत्तामात्रेण

Later Sayanacharya who belongs to the 14th century A.D., in his famous *Bhasya* on *Rgveda*, interprets the hymn in the light of *advaita* and condemns Bhaskara's followers with regard to their *bhedaabhedavada*.

The *Swetaswataropanisat* quotes the same hymn (4th Adhyaya - 7th mantra) while describing the nature of God and discusses the ways to attain *moksa* or the liberation.

All this shows the importance of this *rk*, which brings out the nature of *jiva*, *iswara* and *prakrti*, the whole essence of *tattvasastra*- the philosophy.

In this context Mundakopanishat gives another mantra to answer the doubt that if *jiva* is identical with *Iswara*, why he is bounded by creation and suffering.

समाने वृक्षे पुरुषो निमग्नो नीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ।।[४]

The first part of the above mantra reveals that though the *purusa* - the *jivatman* lives on the same tree, he suffers helplessly, forgetting its divine nature by ignorance. The second part of the mantra says that when the *jivatman* realizes that the other *Isa* who lives with him, is powerful and being adored by all the devotees, gets rid of *soka*, suffering.

Here it may be explained that according to Advaita Philosophy *Jivatman* and *Paramatman* reflected on the inner sense of human being and so the difference is conditional, which lies in the bondage with ego. When the *jivatman* realizes him as identical with the Supreme self, gets rid of all the suffering and attains *moksa*.

Here Sankara stresses that a compassionate *Guru* imitates to lead the pure and pious life, which ultimately begets one with *moksa* through *sadhana*;

केनचित् परमकारुणिकेन दर्शितयोगमार्गः -

As per the *Dwaita* philosophy, the *jivatman* and the *paramatman* are two separate entities and the divine nature of the *jivatman* may be understood as the supreme love and devotion of the *jivatman* towards the *paramatman*.

Here *Rgveda* emphasizes that the knowledge of the Absolute from which th Vedas and gods emerged, leads to *moksa* or liberation:

ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इतद्विदुस्त इमे समासते ।।[५]

Though the ancient Indian sages showed the ways to the self-realization differently, but it is certain that all paths lead to the one and the same goal, as Swami Vivekananda told.

Thus the ancient Indian wisdom conveyed the highest philosophical truths in a beautiful poetic language. The hard and dry subject of philosophy and religion has been handed over to the generations in India in a lucid way with simple examples.

**References:**

1. Rgveda - 1-164-20

2. Kavyamimamsa - 1st Chapter

3. Ibid.

4. Mundakopanishat - 3-1-2

5. Rgveda - 1-164-39

**Bibliography:**

1. Rgveda

2. Kavyamimamsa - Comm.Sri Krishnamani Tripathi, Choukhamba Publications, Varanasi, 2014

3. Mundakopanishat - SankaraBhasyam, Gitapress, Gorakhpur.

ISSN: 2231-0452

# Spectral features of Vedic Phonemes for Speech Processing

*Dr. B. Chandrasekharam*
(System Analyst, R S Vidyapeetha, Tirupati)

In ancient India, the Vedic scholars, in order to preserve the Vedic texts free of distortions in oral transmission, have developed a sophisticated system known as varnakramapatha that describes every phoneme along with its various features. This is of five types :

1. Shuddha varnakrama (शुद्धवर्णक्रमः)
2. Svara varnakrama (स्वरवर्णक्रमः)
3. Matra varnakrama (मात्रावर्णक्रमः)
4. Anga varnakrama (अङ्गवर्णक्रमः)
5. Varnasara varnakrama (वर्णसारक्रमः)

The first type gives a description of the segmental phonemes of the given word, the second describes the phonemes along with the accents, the third, phonemes, their accents and duration is given, and in the fourth, phonemes, their accents, duration and syllabic division is mentioned and in the last, i.e. the varnasara, describes the phonemes along with all the above features.

The following verse mentions this :

केवलः स्वरसंयुक्तः मात्रिकासहितस्तथा ।
अङ्गं च वर्णसारं च पञ्च वर्णक्रमाः स्मृताः ।।

The varnakrama is thus a schematic and graded description of phonemes. The first type deals with segmental phonemes, the second and

third types with supra-segmental phonemes, the fourth type with syllabic level description and the fifth type a combination of phonetic and syllabic features dealing with the phonological status of each phoneme.

According to the following verse, a syllable has twenty-six features or dharmas. A vowel has eight features, so also a consonant while accents have ten features.

एकस्योच्चारियुक्तस्याप्यच: संव्यञ्जनस्य च।

धर्मा: षाड्विंशति प्रोक्ता: क इति इत्थमुदाहृता:।।

The features of a vowel are –

ध्वनि: स्थानं च करणं च प्रयत्नं कालता स्वर:।

देवताजातिरेतैश्च वर्णधर्मा: प्रकीर्तिता:।।

The features of a vowel are 1. Dhvani (sound) 2. Sthāna (place of articulation) 3. Karaṇa (articulator) 4. Prayatna (effort) 5. Kāla (duration) 6. devatā (deity) 7. jati (class) 8. svara (accent).

The features of a consonant are –

ध्वनि: स्थानं च करणं प्रयत्नं कालता तथा।

देवताजातिरङ्गं च व्यञ्जनानां विधीयते।।

Consonants have similar features like a vowel, except that for svara (accent) they have anga (syllabic - division).

The above features are further explained:

1. Dhvani (sound): This refers to production of articulate sounds. According to the Taittairiayapratishakhya, in the production of sounds, a primitive sound element arises in the area between the chest and the throat, due to the movement of breath in the body. The air that constitutes this primitive sound element is changed to three varieties as it passes through the glottis. If the glottis is close, the variety called nada is produced: if the glottis is open, the variety svasa called is produced : and if the glottis is midway between close and open, a third variety, hakara called is produced :

संवृते कण्ठे नाद: क्रियते। (TPr. 2.4)

विवृते श्वासः। (TPr. 2.5)

मध्ये हकारः। (TPr. 2.6)

These three are the original material of which individual articulated sounds are made :

ताः वर्णप्रकृतयः। (TPr. 2.7)

According to

नादोऽनुप्रदानं स्वरघोषवत्सु। (TPr. 2.8)

हकारो हचतुर्थेषु। (TPr. 2.9)

अघोषेषु श्वासः। (TPr. 2.10)

The material that goes into making up vowels and unaspirated voiced consonants is nada, for h and voiced aspirate stops it is hakara, and voiceless consonants have svasa for their basic material.

2. Sthāna (Point of Articulation) and karaṇa (Articulator) : The sthāna is that which is approached, the karaṇa that which approaches. Generally, the articulator is an area of the tongue, viz. root of the tongue (jihvamula), middle of the tongue (jivha-madhya) and tip of the tongue (jihvagra), whilst the opposing points of articulation are 'root of the jaw (hanumula)' i.e. soft-palate, palate (talu) and teeth (danta) or teeth-roots (danta-mula). The same classification is extended to the lips, so that in the articulation of the bilabials the lower lip is karana and upper lip as sthāna.

3. Prayatna (Effort) : This is of two types, 'internal' and 'external'. The first type consists of processes taking place in the buccal cavity and the second occurring elsewhere (extra-buccal). For the first type the term आस्यप्रयत्न is used referring to region from lips to thyroid cartilage or Adam's apple. बाह्यप्रयत्न refers to processes outside this region. These are further explained below.

4. Kāla (Duration) : It refers to the duration of vowels. The device adopted by the Indians for the purposes of phonological description is that of the matra 'mora'. According to tradition, the duration of vowels is as follows:

A short vowel = 1 matra

A long vowel = 2 matra

A piuta vowel = 3 matras

A consonant has a value of ½ matra : ¼ matra is known as āṇu (moment) and ½ aṇu is known as paramāṇu.

The duration of matra has been described in the Paniniya Siksha as follows:

चाषस्तु वदते मात्रं द्विमात्रं चैव वायसः।

शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रिकम्।। (पा.शि. 49)

1 matra is equivalent to cry of the woodcock, 2 matras to that of the crow, 3 matras to that of the peacock, and ½ matra to that of the mongoose.

We may note that these descriptions are only rough conventional guides, since it is hardly likely that the duration of pluta in connected human speech could be actually so long as the note of a peacock. In absence of delicate instruments, these comparisons served as useful guides. A more acceptable definition of matra is अङ्गुलिस्फोटनं यावान् तावान् कालस्तु मात्रिकः i.e. the duration of matra is equal to the snap of the finger.

5. Devata (deity) : The Vyasa Siksha classifies the varnas into five rāśi-s, and each rāśi is governed by a deity.

अदादेत्प्रथमयषा लृनासिक्याः क्षशोत्तराः।

अनिलाग्निमहीन्द्रर्काः पञ्चानां त्वधिदेवताः।। (व्या.शि. 489-90)

The Air is regarded as the god for letters अ, आ, ए, क, च, ट, च, प, य and ष : fire is the god designate for इ, ई, ऐ, ख, छ, ठ, फ, र and श : the earth

is the god for उ, ऊ, ओ, न, ज, ड, द, ब, ल and ह : the moon is god for ऋ, औ, घ, झ, ढ, ध, भ and व : and sun is the god for लृ, ङ, ञ, ण, न, म, क्ष and स.

The above details are mentioned in the following table :

| Deity | Varnas |
|---|---|
| Vāyu | अ, आ, ए, क, च, ट, च, प, य and ष |
| Agni | इ, ई, ऐ, ख, छ, ठ, फ, र and श |
| Mahī | उ, ऊ, ओ, न, ज, ड, द, ब, ल and ह |
| Indu | ऋ, औ, घ, झ, ढ, ध, भ and व |
| Arka | लृ, ङ, ञ, ण, न, म, क्ष and स |

It is interesting to note here that various deities have been mentioned as gods of different varnas. While it is not known what these deities exactly refer to, it is plausible they refer to various cognitive centers of the human brain (cf. Gods Within, Subhash Kak, Munshiram Manoharlal, Delhi, 2002).

5. Anga (syllabic-division) : The vowel is treated as the nucleus of a syllable and consonants are taken as attachment to the vocalic nuclei. In a given word (comprising various syllables) the question arises whether a consonant forms part of a preceding or the following vowel. This information is known from anga-varnakrama. The general rule is that an intervocalic, as also an absolute initial or initial group, belongs with the following vowel, but that the first consonant of a medial group belongs with the preceding vowel, as also does a final consonant in pausa.

6. Svara (Accent) : Vedic accents are pitch or musical accents in that they involve rise and fall of voice. They are of three types : udatta, anudatta and svarita. It is stated -

उदात्तश्चाऽनुदात्तश्च स्वरितश्च स्वरास्त्रयः।

Accents have the following ten features :

1. devāta (deity) 2. jāti (class) 3. guṇa (quality) 4. aṇgulirekhānyāsa (display on finger line) 5. śiarirasthiti (body posture) 6. kaṇṭhākāśasthiti (glottal

aperture, lit. glottal posture) 7. dhvani (sound) 8. dhvanisāmya (sound similarity) 9. saḍjādi-svarahetu (svara) 10. sthāna (place of articulation).

VEDIC ACCENTS AND INDIAN MUSIC

The musical nature of these accents or tones is referred to in Paniniya Siksha by attributing specific notes in the fundamental scale of music:

उदात्ते निषदगान्धारावनुदात्त ऋषभधैवतौ।
स्वरितप्रभवाह्येते षड्जमध्यमपञ्चमाः।। (पा.शि. 12)

The musical notes of nishada and gandhara are born of the udatta accent. From the anudatta are born the rishabha and dhavaita. The remaining svaras, namely, shadja, madhyama and panchama are born from svarita.

Sounds made by birds and animals are cited to illustrate these musical notes. The Sangitaratnakara mentions -

षड्जं मयूरो वदति गावो ऋषभभाषिणः।
अजाविकं तु गान्धारं क्रौञ्चः क्वणति मध्यमम्।।
पुष्पसाधारणे काले पिकः कूजति पञ्चमम्।
धैवतं हेषते वाजी निषादं बृंहते गजः।।

The peacock utters the shadja svara. The cow begins with rishabha. The goat utters the gandhara svara. The krouncha bird madhyama, and a cuckoo in spring utters panchama svara. The sound made by a horse is standard for dhaivata svara. And the sound made by elephant for nishada.

We shall now describe the features of the phoneme अ based on varnakrama:

Vedic Phonetic Description of अकार - संवृतकण्ठोत्थित संवाराख्य बाह्यप्रयत्नसहित नादध्वनिजनित नात्युपसंहृतहनुस्थान तथाभूतोष्टकरण एकमात्रिक वायुदेवताक ब्राह्मणजाति ह्रस्वसंज्ञा सहित अकारः।

The features of अकार are:

1. dhvani (sound) = produced by tone / resonance
2. sthāna (place of articulation) = jaws not too closely approximated
3. karaṇa (articulator) = lips not too nearly approximated
4. prayatna (effort) = contracted larynx (external effort)
5. kāla (duration) = one matra
6. devatā (deity) = Vayu
7. jāti (class) = Brahmana
8. svara (accent) = varies contextually.

The phoneme short अ is produced by glottal resonance (नाद). Having as its physiological correlate the closed glottis, an external effort characterized by contracted larynx, the lips and jaws being neither excessively drawn together nor excessively apart, having a duration of one matra, Vayu being its deity, and known as hrasva. i.e. short.

Manner of production of अकार (phonetic A): Modern Description

The tip of the tongue generally touches the base of the lower teeth, but its precise position does not appreciably affect the tamber. The soft palate is in its raised position and the vocal cords are in vibration.

Approximate Tongue – positions of the Vowels i and a

Lip – position of A

(i) Height of the tongue : half-open

(ii) Part of tongue which is highest : the part of the back

(iii) Position of the lips : spread

(iv) Opening between jaws : wide

PANINIAN GRAMMAR

Panini takes a varna, e.g. अ as a generic sound standing for all its various varieties. Thus, अ in his grammar stands for eighteen varieties.

This is shown graphically below:




(Similar classification should be understood for dirgha and pluta also. Thus we arrive at 18 variations of अकार in all from the three levels together).

A single letter standing for all its variations is achieved through the concept of savarna. Two phonemes are said to be savarna or homogenous with each other if their place of articulation and effort are the same. It is defined as tulyasya prayatnam savarnam (1.1.9). Those sounds that have same point of articulation and internal effort are said to be homogenous with each other.

According to tradition coming down from the Pratishakhyas Indian phoneticians thought of speech as constituting two basic efforts or mechanisms (prayatna) : internal (ābhyantara) and external (bāhya). The first involves activities occurring within the oral cavity and the second those which occur outside it. For the first the Vajasaneyi-Pratishakhya (and following it Panini) used the term āsya- prayatna, āsya as explained by Palanjali, being the area beginning with the lips and extending up to the Adam's apple. Within this area the internal activities are of two types: constriction (i.e. the various degrees of opening of the jaw) and articulation (i.e. posturing of the active articulator at different half-positions on the upper surface of the oral cavity). The external processes are three:

1. Velic, associated with nasality/non-nasal
2. Glottalic : associated with voice / non – voice
3. Pulmonic : associated with aspiration / non-aspiration

To describe any phone – the Indian phoneticians used two matrices, one indicate the internal activity (having two sub-matrices) as follows:

| | |
|---|---|
| [constriction]<br>[articulation] | [velic]<br>[glottalic]<br>[pulmonic] |

Present Day Pronunciation of अकार

Modern day pronunciation of Sankrit shows much variation, it being acquired as a second language. We now consider the case of अकार and its pronunciation in modern times. It is not pronounced in India with the full openness of अ, as its corresponding short, but usually as neutral vowel. This peculiarity appears very early, being acknowledged by Panini and two of the Pratishakhyas (A.Pr. 1.36 : V.Pr. 1.72.), which call the utterance samvrta, covered up, dimmed. In all parts of India, except Bengal, Sanskritists pronounce it as 'u' in but, run etc. in English (phonetic A). In Bengal, it is pronounced as a in English 'awe' (U in IPS). Punjabi speakers generally pronounce it as x, as in English pat, bad, gas etc.

Developing TTS for Sanskrit poses the question of Standard pronunciation of Sanskrit. Usually the South Indian pronunciation around Andhra, Karnataka Maharashtra region is considered more acceptable.

Spectral features of Phoneme अ :

We now give examples of अकार as found in the Vedic texts and their spectrographic features. These are further explained below:

Ananunasika Udatta Hrasva अकार

अग्न॒ इन्द्र॑श्च दा॒शुषो॑ दु॒रो॒णे सु॒ताव॑तो य॒ज्ञमि॒होप॑ यातम् । अम॑र्धन्ता सोम॒पेया॑य देवा ॥ 4 ॥

1. ANANUNASIKA UDATTA HRASVA A- KARA




Anunasika Udatta Hrasva अकार

न ता मि॑नन्ति मा॒यिनो॒ न धीरा॑ व्र॒ता दे॒वानां॑ प्रथ॒मा ध्रु॒वाणि॑ ।
न रोद॑सी अ॒द्रुहा॑ वे॒द्याभि॒र्न पर्व॑ता नि॒नमे॑ तस्थि॒वांस॑ः ॥ 1 ॥

2. ANUNASIKA UDATTA HRASVA A- kara




Ananunasika Anudatta Hrasva अकार

भ॒द्रं कर्णे॑भिः शृणुयाम देवा भ॒द्रं प॑श्येमा॒क्षभि॑र्यजत्राः ।
स्थि॒रैरङ्गै॑स्तुष्टु॒वांस॑स्त॒नूभि॒र्व्य॑शेम दे॒वहि॑तं॒ यदायु॑ः ॥ 8 ॥

3. ANANUNASIKA ANUDATTA HRASVA A- kara



Anunasika Anudatta Hrasva अकार

न॒हि ते॑ क्ष॒त्रं न स॒हो न म॒न्युं वय॑श्च॒नामी प॒तय॑न्त आ॒पुः ।
नेमा आपो॑ अनिमि॒षं चर॑न्ती॒र्न ये वात॑स्य प्रमि॒नन्त्यभ्व॑म् ॥ 6 ॥




**CONCLUSION:**

In a preliminary study undertaken on Indian Phonetics, it is found that Sanskrit has vast literature on this subject. So far there have not been any systematic studies from the point of Speech processing. The fact that are well defined rules both at segmental and supra-segmental levels makes it worthwhile to conduct further research in this area and study how these rules could be applied for computer processing of Sanskrit in particular and Indian languages in general.

**REFERENCES:**

1. Aithal, Paramesvara. 1991. Vedalakshana. Vedic ancillary Literature. A Descriptive Bibliography, Stuttgart. Franz Steiner verlag.

2. Allen. W. S. 1953. Phonetics in Ancient India. London Oriental Series. Volume I. London: Oxford University Press.

3. Cardona, George. 1983. Phonetics and Phonological Rules in Grammars. In Linguistic Analysis and Some Indian Traditions, pp. 1-36. Pandit Shripad Shastri Deodhar Memorial Lectures. Pune: Bhandarkar Oriental Research Institute.

4. Emeneau, M.B. 1946. The Nasal Phonemes of Sanskrit. In Language, Vol. XXII, pp.86-93.

5. Varma, Siddheshwar. 1929. The Phonetic observations of Indian Grammarians. London 1929. Indian reprint edition, Delhi, 1961.

6. Whitney, W.D. 1971. On the nature of designation of accent in Sanskrit. In Transactions of the American Philological Association for 1869-70, pp. 20-45.

# राष्ट्रियसंस्कृतविद्यापीठम्
**(मानितविश्वविद्यालयः)**
**तिरुपतिः - ५१७ ५०७ (आं.प्र.)**

क्रमाङ्कः__________ दिनाङ्कः__________

## महस्विनीसदस्यतापत्रम्

अस्माकं ______________________________ विश्वविद्यालयस्य/ महाविद्यालयस्य/ विद्यापीठस्य/संस्थानस्य पुस्तकालयाय विद्यापीठस्य शोधपत्रिकायाः **महस्विन्याः** ________________________ वार्षिकं ग्राहकत्वमपेक्षितम्।

अहं ______________________________ विद्यापीठशोधपत्रिकायाः **महस्विन्याः** ________ वर्षाणि व्यक्तिगतसदस्यः/संस्थागतसदस्यः भवितुमिच्छामि।

**महस्विन्याः** वार्षिकशुल्कं रू.२५५/- बैंकड्राफ्टद्वारा **कुलसचिवः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः-५१७५०७** इति नाम्ना प्रेषयामि।

बैंकड्राफ्टसंख्या __________ बैंकनाम ______________________

बैंकड्राफ्टतिथिः __________ *हस्ताक्षरम्*

नाम सङ्केतश्च ________________________________________

✂- - - - - - - - - - - - - - - - - - - - - - - - - - - - - - -

## स्वीकृतिपत्रम्

प्रो/डॉ/श्री/श्रीमती ______________________________ सकाशात् **महस्विन्याः** वार्षिक/एकाङ्क शुल्कं रू. ________ मुद्रारूपं/ड्राफ्ट सं.__________ दिनाङ्के __________ सधन्यवादं प्राप्तम्।

*हस्ताक्षरम्*